नं० ४८०२

नाम- तन्त्रसारः

कर्त्ता - कृष्णानन्दवागीशभट्टाचार्यः

पत्रसंख्या- ३३० पत्राणि सं० x

विषयः - तन्त्रम्

तंत्रसार

तंत्रसारः

गें. तं. सा. १

ॐ श्रीगणेशाय नमः ॐ नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुर
वंदितं गुरुं च ज्ञानदातारं कृष्णानंदेन धीमता तन्त्र।
क्रमतो ह्याक्याज्ञानार्थं प्रतिपद्य च सौकर्यार्थं च संदे
पात्तंत्रसारः प्रतन्यते उच्यते प्रथमं तत्र लक्षणं गुरु।
शिष्ययोः शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेश।
वान् शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्
आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः निग्रहानुग्र
हे शक्तो गुरुरित्यभिधीयते इति गुरुलक्षणम् अ।
थ शिष्यलक्षणम् शान्तो विनीतः शुद्धात्मा श्रद्धावा
न्धारणक्षमः समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो
यती एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा
गुरुता शिष्यतापि च तयोर्वत्सरवासतः तथा चोक्तं
सारसंग्रहे सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्ष
येत् स्वप्नेन कालनियमः स्वप्नेन नियमो नहि इ।
ति नारदवचनात् तत्रैव राज्ञि चामात्यजो दोषः पत्नी
पापं स्वभर्तरि तथा शिष्यार्जितं पापं गुरुः प्राप्नोति।
निश्चितम् रुद्रयामले शिववाक्यम् गुरुशय्यास.
नं यानं पादुकोपानत्पीठकं स्नानोदकं तथाच्छाया
लंघयेन्न कदाचन गुरोरग्रे पृथक्पूजामौद्धत्यं च वि
वर्जयेत् दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत्।
इति शिष्यलक्षणम् यथा योगिनीतंत्रे पितुर्दीक्षां न
गृह्णीयात्तथा मातामहस्य च सोदरस्य कनिष्ठस्य।

वैरिपक्षाश्रितस्यच इतिगणेशविमर्शिन्याम् यतो
दीक्षापितृदीक्षादीक्षास्ववनवासिनः विविक्षाश्रमि
णोदीक्षानसाकल्याणदायिका इत्यादिनिषिद्धत्वा
न्मंत्रनगृह्णीयात् इदंतुसिद्धेतरविषयम् सिद्धमंत्रोन
दुष्यतीतिवचनात् तथासिद्धयामलेच यदिभाग्य
वशेनैवसिद्धविद्यांलभेत्प्रिये तदैवतांतुदीक्षेतत्यक्त्वा
गुरुविचारणाम् तथाचरुद्रयामले नपत्नींदीक्ष
येद्भर्तानपितादीक्षयेत्सुतान् नपौत्रंचतथाभ्राता
भ्रातरंनतुदीक्षयेत् सिद्धमंत्रोयदिपतिस्तदापत्नींस
दीक्षयेत् प्रमादाच्चतथाज्ञानात्पितुर्दीक्षांसमाचरेत्
प्रायश्चित्तंततःकृत्वापुनर्दीक्षांसमाचरेत् पितुरुप
लक्षणं मातामहादीनामपि प्रायश्चित्तंत्वयुतगा
यत्रीजपः सर्वत्रतथादर्शनात् तथाचमत्स्यसूक्ते।
निर्वीर्यंतुपितुर्मंत्रंशैवेशाक्तेनदुष्यतीतिवचनंकौ।
लिकमंत्रदीक्षापरम् योगिनीतंत्रेश्यामादिविद्यामपि
कृत्यदीक्षानिषेधात् तद्धानादिविद्यायां मत्स्यसू
क्तेतथाप्रतिपादनात् तथाचतारविलासे कथमपि
त्वनुमेयं श्याम्यशिष्यायकस्मै निजकुलतिलकायद्दे
यपुत्रायदद्यात् सहानीक्षपरागेसतिनदोषः त
थाचविष्णुमंत्रमंत्रमपिकृत्वा सापुत्रध्रुवयाचनमन
दपामिसकलेतव ब्रह्मणाकथितंपूर्वंवसिष्ठायम।
हात्मने वसिष्ठोपिस्वपुत्रायमह्यपित्रेददौवान्वयं।
प्रसन्नहृदयास्वस्थः पितामेकरुणानिधिः कृतवेत्रे।
महातीर्थेसर्वपर्वणिदत्तवान् इत्यादिवैशंपायनम

दीक्षायां शौनकं प्रति व्यासवाक्ये योगिनीतन्त्रे नि
वीर्यस्यापि तु मन्त्रोक्तस्य मानानामहं स्वयं स्वप्नलब्धः ।
स्त्रियादत्तः संस्कारेणैव सिद्ध्यति यत्तु साध्वीचैव सदा
चारा गुरुभक्ता जितेन्द्रिया सर्वमन्त्रार्थतत्त्वज्ञा सुशी
ला पूजने रता गुरुयोग्या भवेत्सा हि विधवा परिव
र्जितः स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृ
ता इदं तु सद्गुरोरुपासितमन्त्रपरम् तथा च भैरवी
तन्त्रे स्त्रीयं मन्त्रोपदेशो न तु न कुर्याद्गुरुचिन्तनामिति
मातुरिति उपासिते हृष्टगुणामनुपासिते शुभफल
मित्यर्थः सिद्धमन्त्रविषयं वेति केचित् वस्तुतस्तु
योगिनीतन्त्रे स्त्रीपदं विधवापरमेकवाक्यत्वात् स्व
प्नलब्धे च कलशे गुरोः प्राणान्निवेश्य तेन वटपत्रे
कुङ्कुमेन लिखित्वा यद्ग्रहणं शुभं ततः शुद्धिमवाप्नो
ति अन्यथा विफलं भवेत् इदं तु सद्गुरोरभावे तत्स
म्भवे तस्मादेव गृह्णीयात् स्वप्ने तु नियमो नहीति ना
रदवचनात् तत्र सिद्ध्यादिनियमो नास्ति दीक्षावि
ना जपपूजाद्युक्त्वा सर्वमेसा निष्पद्यते दिव्यं ज्ञानं य
तो दद्यात्क्षीयते पापसंचयः तस्माद्दीक्षेति सा प्रोक्ता
मुनिभिस्तन्त्रवेदिभिः सर्वाश्रमेषु दीक्षायाश्चावश्य
कत्वम् तथा च दीक्षामूलं जपं सर्वं दीक्षामूलं परं त
पः दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन् अदी
क्षिताय कुर्वन्ति जपपूजादिकाः क्रियाः न भवन्ति शि
ये तेषां शिलायामुप्तबीजवत् देवि दीक्षाविहीना
नां न सिद्धिर्न च सद्गतिः तस्मात्सर्वप्रयत्नेन गुरुणा

दीक्षितो भवेत् अदीक्षितो हि मरणे घोरं रौरवं नरकं व्रजे
त् तस्माद्दीक्षां प्रयत्नेन सदा कुर्याच्छ्रुतान्तिकात् ।
कल्पेहृष्टाव यो मंत्रं प्रशस्तस्ति न वा पमः मन्वन्तर
सहस्रेषु निष्कृतिर्नैव विद्यते नादीक्षितस्य कार्ये
स्याज्जपोभिर्नियमव्रतैः न तीर्थगमनेनापि न च शा
रीरयंत्रिणैः अतसकृत्वा हि नदीक्षः सर्वकर्मा ।
णि साधयेत् तत्राप्यनकुलं मंत्रं गृह्णीयात् तथा
च कुलाकुलराशिकोष्ठानामत्र कुलाकुलजेमनून्
वागृहीतेत्रे ताराचक्रं राशिचक्रं नामचक्रं तथैव ।
च तत्र चेत्सकृणो मंत्रो नात्यं चक्रं विचारयेत् इदं
तत्प्रधानयावोपयं तथा वदति मंत्रे नष्टस्त्रीया
दकुले च तथैव ह्यीति वचनात् विकविचारस्याव
श्यकत्वात् प्रथमतस्तन्निरूप्यते तत्र च नृसिंह ।
कं वराहाणां प्रसादप्रणवस्य च सपिगरुणदर मंत्रा
णां सिद्धादीन्नैव शोधयेत् स्वप्नलब्धे स्त्रियादत्ते मा
लामंत्रे च त्र्यक्षरे वैदिकेषु सर्वेषु सिद्धादीन्नैव शोध
येत् मुण्डमालायां कालीताराम्महाविद्याषोड
शी भुवनेश्वरी भैरवीच्छिन्नमस्ता च विद्या धूमाव ।
ती तथा वगलामुखी सिद्धविद्या मातंगी कमला
त्मिका एता दश महादेवि महाविद्याः प्रकीर्तिताः
नात्र सिद्धाद्यपेक्षास्ति न च तत्र विचारणा कला ।
दिशोधनं नास्ति न च मित्रादिदूषणम् सिद्धवि
द्यामहाविद्यायागसेवापरिश्रमः नास्ति किंचि ।
न्महादेवि इः रवमाधां कथ्यवनेत्यादि वचनात् ।

मालामंत्रस्तथा गाहीये विंशत्यर्णाधिका मंत्रा मालामंत्राः
प्रकीर्तिताः नपुंसकस्य मंत्रस्य सिद्धादींश्चैव शोधये
त् हंसस्य प्रासादस्य पिंडस्याष्टाक्षरस्य च एकाद्वि
त्र्यादिबीजस्य सिद्धादींश्चैव शोधयेत् एकाक्षरस्य मंत्र
स्य मालामंत्रस्य पार्वति वैदिकस्य च मंत्रस्य सिद्धादी
न्नैव शोधयेत् प्राणप्रतिष्ठामंत्रस्य सिद्धादींश्चैव शो।
धयेत् इत्यादिवचनात्तेषु विचारो नास्तीति वस्तुत
स्त्विदं प्रश्नोत्तरं सर्वत्र विचारस्यावश्यकत्वात् इ
दं सुवशात्करादिचिह्नैर्मंत्रस्य स्वभावदोषज्ञानात्त
द्दोषस्य दृष्टत्वादिति साम्प्रदायिकाः तत्र कुलाकु
लस्य भेदो द्विविधाभिमंत्रिणामिह तथा च निबं
धे वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात्
पंचह्रस्वाः पंचदीर्घा बिन्द्वन्ताः संधिसंभवः कादयः
पंचशः सबलसहान्ताः समीरिताः अआएकचटतप
यामारुताः इईऐखछठथफरक्षा आग्नेयाः उऊओगज
डदबलाः पार्थिवाः ऋॠऔघझढधभवसा वारु
णाः लृॡअंङञणनमशहा नाभसाः साधका
स्याद्यक्षरं पूर्वं मंत्रस्यापि तदक्षरम् यद्येकभूतदैव
त्यं तानीयात्तत्कुले हितम् भौमस्य वारुणं मित्रम्।
ग्नेयस्यापि मारुतं मारुतं पार्थिवानां च विद्ध्याग्नेय
संभवः वकारादाग्नेयपार्थिवानां च नाभसं सर्वमि
त्रं स्यादितरद्वैनैव शीलयेत् इति कुलाकुलविचारः।
अथ राशिचक्रं अआइईमेषः उऊऋवृषः ऋॠलॡ।
मिथुनम् एऐकर्कटः ओऔसिंहः अंअःशषसहक

न्या कवर्गस्तुला चवर्गो वृश्चिकः टवर्गो धनुः तवर्गो
मकरः पवर्गः कुंभः यवर्गो मीनः शेषाद्वयं पूर्ववदेव
ज्ञेयात्तन्मध्योत्तरायाः स्वरूपैर्भेदात् एकैकमीशान।
निशाद्यारेतत्कृताशावायो विलिखितनामार्णान् वेदाग्नि
वह्नियुगलश्रवणाद्विसंख्यान्यंचेषु धारणाधारपंच
चतुर्थानात् मेषादितः प्रविलिखेत्सकलांस्तुवर्णा
न्कन्यागतान्प्रविलिखेच्छ्रवसहांस्ववर्णान् स्वरा।
श्रीनामन्वकूलं मंत्रं भोजयेत् तथाच स्वनानराशि
कोष्ठानामनुकूलानभजेन्मन्त्रान् इति वचनात् रा।
श्रीनां शुद्धत्वाज्जैयान्यन्येऽपि छन्नमितिव्ययम् स्वराशे
र्मंत्रराशेपन गणनीयं विचक्षणैः यदा तु स्वराशोर
नानंतरं साधकनामायत्तुरसंबीपनीराशिष्टहीन
गणयेत् साध्यायत्तरश्शपेनेगणयेत्साधकाद्धराम
इति रामार्चनचंद्रिकायाम् एकपंचनवबोधकाःस्यु
तानेत्रषष्ठदशाकाश्च सेवकाः वह्निरुद्रमनयस्त्व
पोषकाद्वादशाश्चत्वरस्त्वघातकाः इति विसंवि
षयं रामार्चनचंद्रिकायां विहितत्वात् शंकादोष
हेतुवर्जनीयं षष्ठाष्टद्वादशानि वर्जनीयानीति वच।
नात् ग्रंथलोपनेशात्रवं फत्रशाच कलहकाः।
सारणेपर्मकर्मोयन्यायाद्वादशाशाप्रायः नामात्र
रूपमेतेषां शुभाशुभफलं भवेत् वैसवेतशानस्था
नेवंफक्तितिपाठः वंफस्थानेच शात्रवितिपाठः तथा
च तंत्रराजे तेन मंत्राद्यवर्णेन नाम्न आद्यक्षरेणच।
गणयेद्यादि षष्ठं स्याद्द्वादशं मंत्रशान्त्वनाशि पुमंत्राद्यवर्णाः

स्यात्तेनास्याहितं भवेत् इति राशिचक्रम् अथ गणच
चक्रम् अश्वाश्विनी देवः इभभरणी मनुष्यः ईडकृ
त्तिका राक्षसः अजक्र लेलरोहिणी मानुषः पशूग।
शिरा देवः पेश्वार्द्रा मनुष्याः गेगौपुनर्वसुर्देवः कःपु
ष्यो देवः खगाश्लेषा राक्षसा खेउ मघा राक्षसः चपू
र्वफल्गुणी मनुष्यः कजउत्तराफाल्गुनी मनुष्यः क
महस्तो देवः ठठचित्रा राक्षसः उस्वातिर्देवः फण
विशाखा राक्षसः नथदनुराधा देवः पयपज्येष्ठा
राक्षसः लथानभिषकराक्ष वधापूर्वभद्रपदा मनु।
ष्यः थसउत्तरभाद्रपदा मानुष्यः अंअः लंहः रेवती।
देवः तथा च पिंगलातंत्रे उत्तरादक्षिणाग्रास्तु रेखाः
ऊर्ध्वाधस्तु दश रेखाः पश्चिमाग्राः कर्तव्या वर्णा
नि अश्विन्यादिभमेतेषु विलिखेन्नारकाः पुनः वर्ग
मात्राविधानेन तन्मध्ये वर्णकांल्लिखेत् पट्टेकचवि
रूपाचतिभुजगाशशिद्विद्वि भूयुग्मपट्टायुग्मैकद्वित्रि
रूपवत्ताणाशिभजेज्ञाद्येकपट्टाब्धिवेदाः वर्णाःक्रमा।
त्स्वरांत्यौ तु रेवत्यंतगतानावुभौ तथा च निर्णये सूर्यो
रात्र्यंधैवभरण्यंशानरोहिनी रमातिमात्रपाण्पाङ्।
नैर्ऋताणिमनीषिणः ज्येष्ठाशानभिषङ्मूलयनिष्ठा।
श्लेषकृत्तिकाः चित्रामघाविशाखास्तु नाराक्षसदेव
नाः अश्विनीरेवतीपुष्याः स्वातिर्हस्ताः पुनर्वसुः अनू
राधामृगशिरः श्रवणो देवनारकाः तथा च स्वजातौ
रमाप्रीतिर्मध्यमा भिन्नजातिषु रक्षोमनुष्ययोर्नाशो
वैरं दानवदेवयोः जन्मसंपद्विपत्क्षेमप्रत्यरिसाधकाव

पः सिद्धंपरमविद्वेषजन्मादौ तिष्ठतःपुनः जन्मतनीयमं
वमसप्तमानि वर्जनीयानि नक्षत्राणि तथाच यसाहन
वभस्राणिषुष्मयुष्मगतान्यपि इतराणि नभस्राणीति स
नक्षत्रा इव न तत्रं गणनीयम् स्वनक्षत्राने स्वनाम
यक्षरसंबंधिनो नक्षत्रादेव गणनीयमिति प्रादक्षिण्ये
नगणयेत्साधकायक्षत्रात्सुधीः इति नक्षत्रचक्रम् अ
थः कथहचक्रम् चतुरश्रे लिखेद्वर्णांस्तत्कोष्ठेषु सं
ल्लिपिती मद्विती चतुष्कोष्ठे षोडशकोष्ठ इति यावत्
अकारादिवर्णान्तत्र चतुष्कोष्ठे प्रादक्षिण्येन लिखेत्
तत्क्रमः इंद्वग्निरुद्रनववनेत्रयुगार्कदिक्चंद्रनक्षत्रको
ष्ठाचतुर्ष्षाभौतिकेषु पातालेवह्निहिमांशुकोष्ठेष
र्णांल्लिखेल्लिपि भवान्क्रमशस्सुधीमान् नामादि
वर्णमारभ्य यावन्मंत्राद्यमक्षरं चतुर्भिः कोष्ठैरेकैकमि
तिकोष्ठचतुष्टयं पुनः कोष्ठककोष्ठेषु सव्यतो नाम
आदितः सव्यतो दक्षिणतः तथाच विश्वसारे द
क्षिणावर्तयोगेन कोष्ठवर्णा लिखेत्क्रमात् येनैव
लिखेनंक्रयौनिनैवगणनं स्मृतम् सिद्धः साध्यः सु
सिद्धोरिः क्रमात्तेयाविचक्षणैः सिद्धाः सिध्यन्ति का
लेन साध्यास्तु जपहोमतः सुसिद्धो ग्रहणादेवारि
मूलं निकृन्तति सिद्धा[illegible]र्णाश्चायवाः प्रोक्ताः साध्या
स्तु मेचकाः स्मृताः सुसिद्धाः पोषकास्तेयः शत्रवोहा
तकाः स्मृताः जपेनबंधः सिद्धः साध्यस्तु कोष्ठिक
मेवया पुष्पाति पोषकोभीष्टं घातको नाशयेद्ध्रुव
म् पिंगलायां सिद्धसिद्धो यथोक्तेनाद्विगुणात्सिद्ध

पंचदश

गौं॰ तं॰ सां॰ ५

साधकः सिद्धस्सिद्धोर्धजपात्सिद्धारिर्हन्तिबांधवान्
साध्यसिद्धोहिद्विगुणतः साध्यात्सुसद्धोनिरर्थकः तत्र
सिद्धोहित्रिगुणतः साध्यारिर्हन्तिगोत्रजान् सुसिद्धसिद्धो।
र्धजपात्साध्योयोद्विगुणाधिकात् तत्रसिद्धोमहादेव
सुसिद्धारिः स्वगोत्रहा अरिसिद्धः सुताहन्यादरिसाध्य
स्तुपत्नीहानदरिर्हन्तिसाधकान् एषुदेवेषुसर्वत्रमा
याकाममथापिवाहिश्रावादौश्रियंदद्यात् हुवणावि
श्रकथे इत्यकथाहुवत्रम् गोशिवक्रोलिखित्वा पात्रे
येशिलङ्गौचवाणीनांचभैरवीम् कर्णस्तुत्र्यम्ब
तईशानादिषुयोजयेत् त्रिपुरांभवनेशींचपीठशक्तिंवै
वश्यचक्रं वासुदेवंश्रियंचैवच्छिन्नमस्तांचचंडिकाम्
ईशान्यादिष्ववस्तंनेत्रमासुहविंतनथा इंद्राक्षींचैव
हेरम्बंपितामहस्मनंतरं महामायांचकालींचपरं।
न्यसेत्सौम्यदैवतम् ईशानायमिति ईशानकोणमा
धकत्वेनप्यर्थः पंचाशाहिलिखेद्वर्णानीशाकोणादि
कक्रमात् ग्रग्रनामपदेनरिग्गतकोष्ठानामधिपाह
णाम् मातापितृस्वकंतेनामदेवमंत्रपरिक्षनम् सर्व
कर्मणिचयोमंष्रास्तेनेमंत्रवीलक्षणम् इतिहुरव
कपरम् नामारीतमसमारभ्यायावद्वेवाणगोचरम्
संस्कृत्यैकग्रहणंकुर्यात्प्रयाडेनकरावन धनंपुत्रांश्च
लाभंचैवनिपतंचैवविक्रयाम् मक्तिंसौख्यंचधर्मंचद
सिमित्रंचकामदम् श्रीघणांविजयेन्कोह्यवक्रको
मितीरितम् स्तमापिदक्षिणाक्रमः इतिहुरवक्रम्
मथाकरमवक्रं देवादयंसर्वंपरेणकुर्यात्मन्त्र्यान

ग्राम्यक्रूरभेदात् महेश्वरत्वोपियानिक्रमेणातिर्यक्त
याबायुरूनाशनेन अकारादिहकारान्तान्क्लीवहीनान्
लिखेत्ततः एकैककमतो लेख्यान्मषादिषु पंचान्तको
गणयेत्क्रमशो भद्रो नामादिवर्णकात्मकान् मेषा
दितो हि मीनान्तं क्रमोश`` णयेत्सुधीः सिद्धसाध्य
सुसिद्धारीन्पुनः सिद्धादयाश्च नः नवैकपंचमे सिद्धः
साध्यः षट्दशयुग्मके सुसिद्धिस्त्रिसप्तरुद्रे वैरी द्वा
दशे रिपुः एतच्चैकस्थिते देविकडकमादि त्वमन्त्रमे
रदं तु गोपालविषयकमेव गोपालकडमास्मृतं।
इति वचनात् तथा चोक्तं वाराहतन्त्रे नाराशुद्धिवै।
स्सवानां कोष्ठसिद्धिः शैवस्यैव राशिशुद्धिस्तु वैष्णवे
गोपालेकडमास्मृतः कोष्ठशुद्धिर्वाराहे च महाल
क्ष्म्याः कुलाकुलम् नामादिचक्रं सर्वेषां भूतचक्रं
तथैव च इति वचनात् अथ ऋणधनिचक्रं तथा
कोष्ठान्येकादशान्येवं वदने पूरितानि च अकारा
दिहकारान्तं लिखेत्कोष्ठेष्वानतत्त्ववित् प्रथमं पंच
कोष्ठेषु स्वरांश्च क्रमेणानु द्वयं द्वयं लिखेत्तत्र।
विचार्य खलु साधकः शेषेष्वेकैकशो वर्णाः क्रम
तस्तु लिखेत्सुधीः तथा च निबंधे द्वौ द्वौ स्वरौ
पंचमकोष्ठकेषु शेषान्वर्णान्यथैकमेकम्।
कादीन्हशेषान्विलिखेत्ततोणि नैकैकमेव कादि
शकोष्ठकेषु षट्कालका विषद्धिसमरुद्रवेदखा
कणाष्टभ्रवेदहताः खलसाध्यवर्णाः युग्माद्वि
पंचविषरंध्रयुक्ताः शोक विमोधि वेदशाशिनः खल

साध्यकार्णाः नामोद्बलादकडवागाजभक्ते शेषे
तानेभयाविधिकशेषमरणं पनस्यात् अस्यार्थः।
साध्यवर्णान् स्वरव्यंजनरूपेणाष्टधा कृत्वा तान् स्वकला
यंकैर्गुणितान् कृत्वा तथा साधकनामाक्षरान् स्वरव्यं
जनरूपेणाष्टधा कृत्वा तान् स्वाद्यांकैर्गुणयित्वाष्ट
संख्याभिर्हृत्वा उभयोः साध्यसाधकयोरधिकम्।
शेषं धनं स्वल्पमृणं तज्ज्ञात्वा मंत्रं दद्यात् तत्र मंत्रश्चेदृणी
भवति धनी चैव तन्मानरे मंत्रो यदि विकांकः स्या
त्तन्मंत्रं प्रजपेत्साधीः समोपि च जपेन्मंत्रेन जपेद्बुधः।
नाधिकं शून्यमृत्युंविजानीत्साध्यं शून्यं विवर्जयेत्।
तथा रुद्रयामले रविपंचदशाक्षवहुड्डाग्युधाहनवभि
र्गुणितांश्च साध्याक्षरे हिमभूगिरिशक्रतिगजाग्नि
मुनीषुवेदषड्ढिभिश्च गुणितानाथ साधकाणां
न धंकालकालेन्यादि वचनं विस्तरविषयम् मा
वेनवेदृ्रिकाङ्गनलादिति केचित् वस्तुतस्तु पूर्वो
सैव विवरणम् तथाहि रुद्रयामले त्र्यादिनवान्।
तरंता मार्णकोष्ठकमथाभिहन्यादंकादिकं
कगतक्रमेण यद्वक्ष्ये रुद्रयामले साध्यांकान्साध
कांकांश्च संमानयेत् सकृदेव तदेकेकक्षयामध्य।
एकादशाष्टहस्थितं स्वकाष्ठकालेन्यफलम्।
प्रकारांतरं यथा नामाद्यक्षरमारभ्य यावेदतादि
संभवेत् त्रिधा कृत्वा लिख्येद्भिन्नं तदन्वाद्विपरीनेक
अस्यार्थः साधकनामाद्यक्षरान्मंत्रकाद्यक्षरात्रान
यावन्मंत्रादिमान्तरं तन्संख्या त्रिगुणीकृत्यमन

भिर्हत्वाधिकस्तूर्णं शोधं पनं स्यात् तदन्यदपि मंत्रादक्ष
मारभ्य यावत्साधकादक्षरं भवेत् तावन्मंत्राणां समस्तगुणा
कृत्वा त्रिभिर्हरेत् अन्यच्च साध्यनाम द्विगुणितं साधके
नसमन्वितम् अष्टभिश्च हरेच्छेषं तदन्या विपरीतकम्
अस्यार्थः साध्यनामस्वरव्यंजनभेदेन द्विगुणीकृत्य सा
धकनाम्नास्वरव्यंजनभेदेन मिलितं कृत्वाष्टभिर्हरे
त् तदन्यदपि साधकनामादिद्वरं स्वरव्यंजनभेदे
न द्विगुणीकृत्य साध्येन युतं कृत्वाष्टभिर्हरेत् अथदी
क्षाकालः मंत्रारंभस्तु चैत्रे समस्तपुरुषार्थदः वैशा
खे रत्नलाभः स्याज्ज्येष्ठे तु मरणं भवेत् आषाढे बंधुना
शात्पूर्णायुः श्रावणे भवेत् प्रजानाशो भवेद्भाद्रे आ।
श्विने रत्नसंचयः कार्त्तिके मंत्रसिद्धिः स्यान्मार्गशीर्षे
तथा भवेत् पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्द्ध।
नम् फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत्।
चैत्रे तु गोपालविषये गौतमीयोक्तत्वात् मधुमा
से भवेद्दीक्षा दुःखायेति वचनात् अत्र मासः सौर।
एव सौरे माघे शिशुमादीक्षानवांशेनवतारके इति
गौतमीयात् अथ वारनियमः रविवारे भवेद्वित्तं सो
मे शांतिर्भवेत्किल आयुरंगारके हंति तत्र दीक्षां वि
वर्जयेत् बुधे सौंदर्यमाप्नोति ज्ञानं स्यात् बृहस्पतौ
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे अ।
थ तिथिनिर्णयः प्रतिपदि कृता दीक्षा ज्ञाननाशा।
करी मता द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवे
त् चतुर्थ्यां वित्तनाशः स्यात्पंचम्यां बुद्धिवर्धनम् षष्ठ्या

ज्ञानक्षयः सौख्यं लभते सप्तमीदिने अष्टम्यां बुद्धिना-
शः स्यान्नवम्यां वपुषा क्षयः दशम्यां राजसौभाग्यमे-
कादश्यां शुचिर्भवेत् द्वादश्यां सर्वसिद्धिः स्यात्त्रयो-
दश्यां दरिद्रिता तिर्यग्योनिश्चतुर्दश्यां हानिर्मासाव-
साने च पञ्चाङ्गे धर्मबुद्धिः स्याद्दर्शाद्यो याविवर्जयेत्
संध्यागर्जितनिर्घोषभूकंपोल्कानिपातनम् एतानन्या-
श्चदिवसांश्च नक्षत्रान्यरीवर्जयेत् द्वादश्यामपि कार्त-
ज्यं त्रयोदशीविधानम् तद्विस्तरविषय रामार्चनचंद्रिका-
धृतत्वात् त्रयोदशी च दशमी प्रशस्ता सर्वकामदेति स-
नत्कुमारवचनात् अथ नक्षत्रनिर्णयः अश्विन्यां सुख-
माप्नोति भरण्यां मरणं भवेत् कृत्तिकायां भवेद्दुःखी रो-
हिण्यां वाहनं भवेत् मृगशीर्षे सुखावाप्तिरार्द्रायां बंध-
नाशनम् पुनर्वसौ धनाप्तिः स्यात्पुष्ये शत्रुविनाशनं
अश्लेषायां भवेत्सत्यं मघायां दुःखमोचनम् सौंदर्यं पू-
र्वफल्गुण्यां प्राप्नोति न संशयः ज्ञानं चोत्तरफल्गु-
न्यां हस्ते वै वपनं भवेत् चित्रायां ज्ञानसिद्धिः स्यात्स्वा-
तौ शत्रुविनाशनम् विशाखायां सुखं चानुराधायां
धनवर्धनं ज्येष्ठायां सुतहानिः स्यान्मूलायां कीर्तिवर्ध-
नं पूर्वाषाढोत्तराषाढे भवेत्तां कीर्तिदायिके श्रवणा-
यां भवेद्दुःखं धनिष्ठायां दरिद्रताः बुद्धिः शतभिषायां
स्यात्पूर्वभाद्रे सुखी भवेत् सौख्यं चोत्तरभाद्रे च रेवत्यां।
कीर्तिवर्धनम् तथा योगतारादीनिर्णयो विष्णुसारे शु-
भः सिद्धस्तथा पुण्यो ध्रुवो योगास्ततः परम् प्रीतिः सौभा-
ग्ययोगश्च वृद्धियोगस्ततः परं हर्षणश्च ततो योगाः सर्वतं

त्रयाणां वह्निः तैतिलाकौलववबौ वनिजस्तदनंतरं
करणानि शुभान्येव सर्वतंत्रे शुभामिति अथ लग्नानि
र्णयः वृषसिंहे च कन्यायां पत्रुदीनां खिलयके चं
द्रतायानुकूलेवऊयाहीताप्रवर्तनम् शुक्लपक्षेषु
भाद्रीताकृष्णेचापंचमाक्रिकात् निषिद्धमासे
ततनाहिषयोमानिमेदतः रत्नमालायाम् षष्ठीभा
द्रपदे चैशीनथाकृष्णाचतुर्दशी कार्तिके नवमी।
शुक्ला मार्गे शुक्लान्ततीयिका पौषे च नवमी शुक्ला
चैत्रे कामचतुर्दशी वैशाखे चाक्षया चैव ज्येष्ठे दश
हरातिथिः आषाढी पंचमी शुक्ला श्रावणे कृष्णपं
चमी एतानि देवपर्वाणि नीथोकारिफलं लभेत्
अन्यच्च मतनम् चैत्रे त्रयोदशी शुक्ला वैशाखे का
दशी सिता ज्येष्ठे चतुर्दशी कृष्णाऽऽषाढे नागपं
चमी श्रावणे काद्वशी भाद्रे रोहिणी संयुताष्टमी ।
आश्विने च महाशुण्याम् महाष्टम्यपाभी हृदा कार्ति
के नवमी शुक्ला मार्गशीर्षे तथा सिता षष्ठी चतुर्द
शी पौषमाघे च्छे काद्वशी सिता फाल्गुने चासिता
षष्ठी चेति कालस्य निर्णयः तथाच योगिनीतंत्रे
अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः रविसंक्रांति।
दिवसे युगाद्येव सुरेश्वरि मन्वंतरस्य पर्वोस्य महाष्ट
म्यादि नेतथा चतुर्थी पंचमी चैव चतुर्दश्यष्टमी तथा
तिथयः शुभदः प्रोक्ताः इत्यादिवशानाश्चतुर्दश्यष्ट
मी चैवेति शान्तिविधयम् चतुर्थीगणेशाविधया ।
ननत्कल्पोऊन्वान् निर्दिनेषपि कालेषुदीक्षा

ग्रहणे शुभा सूर्यग्रहणकालस्य समानो नास्ति भूत।
ले यत्र यत्र ग्रहणं सर्वमनंतफलं भवेत् सर्वसंक्रा।
मणे चैव सूर्यस्य ग्रहणे तथा तत्र लग्नादिकं किंचिन्न
विचार्यं तपोधनः तथा रात्रिश्चिमामासादिशोधनं सू
र्यपर्वणि एवं चन्द्रग्रहणेपि तथा च मत्स्यसूक्ते।
नकुर्यात्संक्रांतिकोटीनामुपरागे दिवाकरे नकुर्या
द्दिसवीनां यदि चन्द्रमसो ग्रहः शुभावस्यां सोम
वारे भौमी चैव चतुर्दशी सप्तमी रविवारे च सूर्यप।
र्वशतैः समा योगिनीतंत्रे ग्रहणे च महातीर्थे नास्ति
कालस्य निर्णयः शिष्यानाहूय ग्रहणादीयते हृदय
यायदा तदा लग्नादिकं किंचिन्न विचार्यं कथंचन
सर्ववारः ग्रहाः सर्वे नक्षत्राणि चराशयः यस्मिन्नह
नि संक्रमो गुरुः सर्वे शुभावहाः तथा ग्रहणे च मह।
तीर्थे नास्ति कालस्य निर्णयः गंगायां भास्करे देवे
विरजे चन्द्रपर्वते वर्यालेचमानंगे च तथा कन्याश्र
मेषु च तत्र ग्रहणे याज्ञनोटी[illegible] तीर्थेष्वेतेषु पार्वति।
वाराहीतंत्रे शुक्लाले यदि वा हृद्येग वाद्विन्यो भवेद्य
दि मेषवृश्चिकसिंहेषु तदादीक्षा न विद्यते अक्ष
करमालानिर्णयः सनत्कुमारसंहितायां उर्जनी
मध्यमानामा कनिष्ठाङ्गुलिताः क्रमात् निर्दिष्टांगु।
लघ्विपर्वाणि मध्यमा चैकपर्वका पर्वद्वयं मध्यमा।
यां मेरुत्वे नोपकल्पयेत् अनामामध्यमारभ्य कनि
ष्ठादितः पवञ्च तर्जनीमूलपर्यन्तं दशपर्वसु मंत्रयेत्
अनामातलमारभ्य कनिष्ठादितः पवञ्च तर्जनीमू।

पर्यंतमष्टपर्वस्वमंत्रंजपेत् एतद्वचनंत्वष्टोत्तरशतविष।
यम् इतिश्रीक्रमवचनम् हंसपारमेश्वरेपि पर्वद्वय
मनामानामायांपरिवेष्टनकारयेत् पर्वत्रयमध्यमा
यांस्तर्जन्येकंसमाहरेत् प्राक्तिमालासमाख्यानाम
र्वतंत्रप्रदीपिका अनामामूलमारभ्यप्रदक्षिणक्रमे
णतु मध्यमामूलपर्यंतंजपेदष्टपर्वसु इदमपि
तथैव मुंडमालातंत्रे अनामापर्वद्वितयंकनिष्ठा।
दिक्रमेणतु तर्जनीमूलपर्वांतंकरमालाप्रकीर्तितः
अंगुलीनवियुंजीतकिंचिदाकुंचितेतले अंगुलीनांवि
योगात्तुछिद्रेचस्रवतेजपः अन्यत्रापि अंगुलीयव
याजप्तंयज्जप्तंमेरुलंघनात् पर्वसंधिषुयज्जप्तंतत्स।
र्वंनिष्फलंभवेत् गणनाविधिमुल्लंघ्ययोजपेत्तज्जपो
यतः गृह्णंतिराक्षसास्तेनगणयेत्सर्वथाबुधाः सन
त्कुमारे क्रमोत्क्रमगतैर्मालामातृकार्णैःस्वमेरुकैः
सर्वार्थिकैःसाष्टवर्गैरंतर्यजनकर्मणि आदिक्षांतःकचट
तपयशाख्याष्टप्रकीर्तितैः तद्यथा अकारादीनांवर्णा
नांकवर्गादीनांचांतिमवर्णेसानुस्वारंकृत्वापूर्वमष्टा
र्यपश्चान्मंत्रजपःकार्यः अनेनप्रकारेणाष्टोत्तरशतसं
ख्योजपोभवति अंतर्यजनरूपलक्षणंसबिंदुवर्ण
मष्टार्यपश्चान्मंत्रंजपेद्बुधः अकारादिक्षकारांतंबिंदुयु
क्तंविभाव्यच वर्णमालासमाख्यातानुलोमविलो।
मिका इतिनारदवचनात् अथमालानांमाणिनिर्ण
यः पद्मबीजादिभिर्मालाबहिर्यागेशृणुघनाः रुद्रा
त्नपांचपद्माक्षपुत्रजीवकमौक्तिकैः स्फाटिकैर्मणि

ग्रं॰ तं॰ सा॰ १

रत्नैस्सुसौवर्णैः विद्रुमैस्तथा रजतैस्त्रपुशाश्मूलैस्सुगरुडस्या
स्याद्धिमालिका अंगुलीगणनादेकं पर्वज्यपुत्रगणं
भवेत् पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकम् प्र।
वालैर्मणिरत्नैर्दशसाहस्रिकं स्मृतं तदेव स्फाटिकैः
प्रोक्तं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं स्यात्सौ
वर्णैः कोटिरुच्यते कुशग्रंथ्या कोटिशतं रुद्राक्षैः।
स्यादनंतकं सर्वा विरचिता माला नृणां भुक्तिफल।
प्रदा पद्माक्षैरिति विख्यातविषयम् पद्माक्षविहिता।
माला शत्रूणां भुक्तिफलप्रदा पद्माक्षैर्नाशनीम्।
नाकुशग्रंथिमयी माला सर्वपापप्रणाशनी पुत्रजी।
वफलैः कृता कुरुते पुत्रसंपदम् निर्मिता कण्ठमणि
भिर्जपमाले प्सितप्रदा प्रवालैर्विहिता माला प्रयच्छे।
त्सुफलं धनं भैरवीविद्यायां भैरवीतंत्रे सुवर्णमणि।
भिर्मालां स्फाटिकीं वां विनिर्मिताम् प्रवालैरेव वा
कुर्यान्नपुत्रजीवं विवर्जयेत् पद्माक्षैश्चैव रुद्राक्षैर्मिंद्रा।
क्षेवविशेषतः त्रिपुरामंत्रजपार्थे तु रक्तचंदनबीजा
दिभिरतिप्रशस्ता तथा वतंत्रराजे रक्तचंदनमाला
ला तु भोगदा मोक्षदा भवेत् वैष्णवी तुलसीमाला।
गजदंतैर्गणेश्वरे त्रिपुरायां जपमाला रुद्राक्षैर्रक्तचं
दनैः मणिनियमस्तु मंत्रमालायाम् मूर्त्योन्यसम
त्वपाणिनातिस्थूलकृशाणि च कीटादिभिरक्षता।
णि भिन्नानि नवानि वै तथा गौतमधी पंचाशन्म।
णिभिर्माला विहिता सर्वकर्मसु मूकारादिक्षका
रांता वा तु माला प्रकीर्तितः नार्णमेरुमस्वेनत्रकल

येन्मा निसत्तम अनयासर्वविद्यानांजपः स्यात्सुसम
हितः वामकेशतन्त्रे नित्यंजपंकरेकुर्यान्नतु काम्य।
मबोधनात् काम्यमपिकरेकुर्यान्मालाभावेपि।
सुंदरि नथाचगोतमीये समासेनात्तसूत्रस्यावि
धानमिहकथ्यते पंचविंशतिभिर्मोक्षे त्रिंशद्भिर्ध
नसिद्धये सर्वार्थाः सप्तविंशत्यापंचदशाभिचारि
के पंचाशद्भिः काम्यसिद्धिः स्यात्तथाचततनमैः
अष्टोत्तरशतैः सर्वसिद्धिः कन्नामिनीधिमः ३।
तिमालानिर्णयः अथासनभेदः काम्यार्थंकं
वलंचैवश्रेष्ठंचरमाकंबलम् कृष्णाजिनेकाम्य
सिद्धिमोक्षश्रीर्व्याघ्रचर्मणि कुशासनेमंत्रसि।
द्धिर्नात्रकार्याविचारणा चरणपांडुः स्वसंसृद्धिः
र्दौर्भाग्यंदारजामने वंशासनेदरिद्रः स्यात्पा।
षाणोव्याधिपीडनम् तृणासनेयशोहानिंवस्त्रा
सनंकरोतिहः वस्त्रासनंकेवलमेवनिषिद्धम्।
वस्त्रासनंरगोद्भवमितिवचनात् विशिष्टफल
दत्वाभिधानात् चैलाजिनकुशोत्तरमितिभग
वद्वचनाच्च इत्यासनलक्षणम् अथमाला
संस्कारः कर्पाससंभवसूत्रंधर्मकामार्थमोक्ष
दम् तच्चविप्रेंद्रकान्याभिर्विहितंचसृणोभनम्
उच्चाटनेकर्पटमेवसूत्रंलोहस्यसूत्रंखलमारणे
त पट्टस्यसूत्रंचमहद्भुपीठेकमीमसूत्रंखलसर्व।
सिद्धौ शुक्लंरक्तंतथाकृष्णंपट्टसूत्रमथापिवा।
शांतिवश्याभिचारेषुमोक्षेश्वर्यजयेषुच शुक्लंरक्तं

गौ॰ तं॰ सा॰ १

10

तथाक्षसूत्रं पद्मसूत्रमथापि वा प्रोक्तं निवशाभिचारेषु
मोक्षैश्वर्यजपेषु च पीतं कृष्णं वर्णेषु च क्रमात् सर्वे
कामे च वर्णानां रक्तं सर्वेप्सितप्रदं श्राद्धमेषु तथा चैव
रक्तं चैव समाहितम् त्रिगुणं त्रिगुणीकृत्य ग्रन्थये ।
च्छिल्पशास्त्रतः एकैकं मातृकावर्णमनारंभजपे
ऽपि धीः मणीमादाय सूत्रेषु ग्रन्थयेन्मध्यमध्यतः
ब्रह्मग्रंथिं विधायैतस्यैमेडं च यग्रन्थिसंयुतम् ग्रन्थ ।
यित्वा ततो मालां ततः संस्कारमाचरेत् गोतमी ।
ये सुवेसुवेत संयोज्य पुच्छे पुच्छं तु योजयेत्
गोपुच्छं सदृशी माला यद्वा सर्पाकृतिर्भवेत् एवं
निर्माय मालां च शोधयेन्मानिसत्तम अश्वत्थप
त्रनवकैः पद्माकारेण कारयेत् तन्मध्ये स्थापय
न्मालां मातृकामूलमुच्चरेत् क्षालयेत्पंचगव्यै
स्सद्योजातेन मन्त्रलैः तत्रादौ सद्योजातमन्त्रः ।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवेभवे ।
नातिभवे भजस्व मां भवोद्भव चंदनाद्यैस्सुगंधाद्यै
र्वामदेवेन घर्षयेत् अथ वामदेवमन्त्रः ओं वाम
देवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय कल
विकरणाय नमो बलविकरणाय नमो बलप्रमथ
नाय नमउन्मनाय नमः सर्वभूतदमनाय नमः धू
पयेदघोरेण अथाघोरमन्त्रः ओं अघोरेभ्योऽथ ।
घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः सर्वसर्वेभ्यो न
मस्ते अस्तु रुद्ररूपेभ्यः लेपयेत्तत्पुरुषेण अथ तत्पुरुष
मन्त्रः तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रु

दः प्रचोदयात् मंत्रयेत्पंचमेणैव प्रत्येकं तु शतं शतम् ।
मेरुं च मंत्रयेच्चैव मन्त्रेणानेन शतं शतम् पंचममंत्रस्य ओं
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ब्रह्माधिःप
तिर्ब्रह्मणोऽधिपतिः शिवमेऽस्तु सदाशिवोम् प्रत्येकं तु
सहस्रमष्टोत्तरं तु वा तथा च तन्नैव प्रत्येकं मंत्रयेन्मंत्रीपं
चमेन सकृदिति सम्प्रदायमालामधिकृत्य पंचमेन स
कृत्स्नेन शतं स्तेन मंत्रयेदिति दर्शितास्मालायां वा
दशतजपः तथा वा घ्नयजेद्देवं यथा विभवविस्तरैः
मालायाः प्राणप्रतिष्ठानेन तद्देवमायजेत् यथा
सनत्कुमारसंहितायां संस्कृत्यैव वदेमालां तन्मार्गेण
स्तत्र स्थापयेत् मूलमंत्रेणैनां मालां प्रजपेद्द्विजस
त्तमः तदाहीनत्रे मंत्रः ओं मां माले महामाले सर्व
तत्त्वस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे शुभदा
भव स्वाहान्तोऽयं महामंत्रः सर्वमालाविशोधनः इ
ति देवीरहस्ये मायाबीजाधिकं कृत्वा रक्तपुष्पैः सम
र्पयेदिति शास्त्रविषयमेतत् पुनः वाग्भवं चरमावी
जं ताद्यं मालिकाततः — तो हृदयवर्णेन मंत्रेण
वेन पूजयेत् तथा मंत्रयेत् मंत्रेण क्रमेणोत्क्रमयोग
तः जपेच्चैव मातृकावर्णैर्मंत्रयेत्तां तु मंत्रवित् अथ श
ङ्खमालादिमालामंत्रः ओं श्रीं श्रीं ओं शं खिनी ओं श्रीं ओं स्वा
हा अथ मौक्तिकमालामंत्रः ओं ह्रूं ह्रूं ओं मुक्तमालिनि
श्रीं श्रीं स्वाहा अथ प्रवालमालामंत्रः ओं ह्रीं वैं ई वैं द्र।
मालिनि फं स्वाहा अथ स्फाटिकमालामंत्रः ओं स्रं सः
सः स्रक्कं माले फट् स्वाहा अथ रुद्राक्षमालामंत्रः ओं।

गें. तं. सां. ॥

ॐ ह्रीं रुद्राक्षमालिनि शुभ्रा भव स्वाहा ॥ अथ तुलसी
ॐ ॐ ॐ ॐ ॐ शीतलसिवेस्मविवोधद् स्वाहा ॥ अथ मणि
माला ॐ ॐ ब्लें मणिमाले स्वाहा ॥ अथ स्वर्णमाला
ॐ श्रीं क्लीं सौः स्वर्णमालिनि सौः स्वाहा ॥ अथ पद्माक्ष
मालामंत्रः ॐ श्रीं ॐ पद्माक्षमालिनि ह्सौं स्वाहा ॥ अथ र
त्नमाला स्फटिकमाला मंत्रः ॐ ॐ ॐ श्रीं श्रीं श्रीं क्लीं क्लीं क्लीं
ह्सौः रत्नमाले वा स्फटिकमाले श्रीं ह्सौं ह्सौः स्वाहा ॥ पु
त्रकरशंखमालामंत्रः श्रीचक्रस्य महेश्वरि मालि
संशोध्य संपूज्य मूलेनाष्टशतेन ततः गंधाक्षतपुष्प
नैः पूजयेन्मातृके नमः ॥ अथ साधारणमालामंत्रः
ॐ मे सर्वविघ्नं कुरु मे स्वाहा ॥ अथ करमालामंत्रः ॐ क्लीं
ॐ क्लीं करमाले स्वाहा ॥ प्राणमासेनैव मालानां शोध
नं स्थापकस्य च स्यात् ततो पूजनं महाविद्यां सर्वसिद्धीश्व
री भवेत् इति देवीरहस्ये भैरववचनं योगिनीतंत्रे
होमकर्म ततः कुर्यात् हवनाभावसिद्धये अष्टोत्तरशतं
कृत्वा संपातात् जपं विनिक्षिपेत् होमकर्मण्यशक्तश्चे
द्विगुणं जपमाचरेत् नान्यमंत्रं जपेन्मंत्री कंपयेन्न
विधूनयेत् कंपनात् सिद्धिहानिः स्याद्धूननं बहुदुःख
दं ॥ शाब्दे जीर्णे भवेद्रोगः करभ्रंशाद्विनाशकृत्
छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ततेमा
ला नेन सर्वमाना सर्वदेवानां सर्वसिद्धिप्रदा मम
परिपूज्य अर्पयेत् तनोस्तु देहि मातर्नमोस्तु ते कुण्डल
स्फाटिकशैलसौवर्णमालाकर्त्ताममेकाः मंत्रतो ।

विस्त्रमंत्रेणाहिवामामेनग्रास्यते ग्राह्यीनामपिकर्मण्या
एत्वौभक्ता यथाविधि अष्टम्यां वानवम्यां वाचतुर्दश्या
मथैववा त्रयोदश्यां नद्यांकुर्याच्छिवस्यापि महेश्वरि ।
कामनाद्वैदैत्वंगुलिनियमः यथातर्जन्यंगुष्ठयोगेन
शत्रूच्चाटनमन्त्रम मंगुष्ठमध्यमायोगान्नाश्वायेच्छाद
नेमते ॥ ज्येष्ठाकनिष्ठायोगेनशत्रूणांनाशनंमतम् जी
र्णैमंत्रेषुनः सूत्रैश्चक्रयित्वाशतंजपेत् समस्तानपि
नेहस्ताष्टकेनमहोन्नतंजपेत् जपेत्रिविधरुद्रसंख्ययोर्वा
लयित्वायथोविनम् छिद्रेष्वष्टोत्तरशतंजपः कर
ष्टद्धिकात्रयोस्तुल्यत्वात् इतिमालाविधिः अथपुर
श्चरणविधिः योगिनीहृदये श्रूयोदितां समादाय श्र
ध्यांतः करणोनरः ततः पुरश्चर्यां कुर्यात् मंत्रसंसि ।
द्धिकाम्यया जीवहीनो यथा देही सर्वकर्मसुनक्ष
मः पुरश्चरणहीनोपि तथा मंत्रः फलदायकः तस्मादा
दौ स्वयंकुर्यान्नरो वा कारयेत्सुधीः गंगोदकंवाविश्वं
वासर्वप्राणिहितेरतम् स्त्रियं शान्तमिदं मित्रं नाना
गुणसमन्वितम् स्त्रियंच सद्गुणोपेतांसम्पूर्णां विनियो
जयेत् तत्रादौपुरश्चर्यांकर्तृस्थाननियमः कथ्यते
योगिनीहृदये पुण्यक्षेत्रंनदीतीरंगुहापर्वतमस्त
कम् तीर्थप्रदेशाः सिंधूनांसंगमः पावनं वनम् उद्या
नानि विल्वमूलानि वलमूलंतटंगिरेः तुलसीकाननं
गोष्ठंवृषशून्यंशिवालयं अश्वत्थामलकीमूलेगो ।
शालाजलमध्यतः देवतायतनंकूलं समुद्रस्यनि ।
जंगृहम् तथागुरोःसुपातगुणं विद्याजीवं लक्ष्यगुणम्

गो॰
तं॰
सा॰ १२

भवेत् कोटिदेवालयेषु गमनं नो शिवसन्निधौ ह्येस
रुद्रमार्गाद्यादर्शकानेक विवर्जयेत् एकान्ते पावने नि
दाघहिते भक्तिसंयुते सदेशे धार्मिके देशे ह्यभिदेनि।
रुपद्रवे रम्ये भक्तजनस्थाने निवसेत्साधकस्त्रिये गुरू
णां सन्निधाने च विविक्ते काननस्थले तथा एषामन्यत
मं स्थानमाश्रित्य शेषाघमाचरेत् यत्र ग्रामे जपेन्मंत्री
तत्र कूर्मं विचिन्तयेत् पुरश्चरणोक्तमंत्री भक्त्या भस्य
विचिन्तयेत् अन्यथा मत्तणादोषा सिद्धिहानिप्रजा।
यते तथा अग्रासल्पसंहिताया दीपदीर्घं चूर्णैंसमन्व।
यांतडवर्जितम् तैलाभ्यंवसितामृज्ञाः केदाः किंत्रक
वर्जिताः नारिकेलफलं चैव कदलीलवलीतथा आ
म्रमामलकं चैव पनसं च हरीतकी व्रतान्तरेप्रशस्तं
च हविष्यमत्यनेबुधैः भक्षान्नो वाहविष्यान्नं शाकं।
यावकमेव वा पयोमूलफलं चैव यद्वायोपलभ्यते
यत्नयोगिनीनेत्रे चिंचां च नालिकाशाकं कलायं च गल
वं तथा कदंबनारिकेलं च बनेन कूष्माण्डकं त्यजेत्।
इतिव्रतान्तरे वाध्यम् अग्रघ्यवज्यानि विवर्जयेन्मफ
लावलवणं तैलमेव च तांबूलं च कांस्यपात्रं च दिवा
भोजनमेव च तथा लावलवनं मांसं दंजनभोजनं
माघाद्यकी मसूरांश्च कोद्रवांश्चणकानपि कौटिलं।
ताम्रमांसमनिवेदितभोजनं कुर्याद्यथोक्तविधिना
त्रिसंध्यं देवतार्चनम् अपवित्रकरो नग्नः शिरसि प्रावृ
तोपि वा प्रलपन् जपेद्यावत्तावन्निष्फलमुच्यते ॥
लाधितेपि यस्मात्तपानमधौमाः कुरुते धर्मसंचयम्

सर्वपापफलं स्यादर्थकामस्वार्थेन संशयः तस्मात्सर्वप्र
यत्नेन प्रमाणं वर्जयेत्सुधीः पुरश्चरणकाले तु सर्वक
र्मसु शास्त्रवत् जिह्वा दग्धा परान्नेन हस्तौ दग्धौ प्रतिग्र
हात् परस्त्रीभिर्मनो दग्धं कथं सिद्धिर्वरानने परस्वं
भिक्षान्नेतिरविविषयं भिक्षायोमलस्पृहतोः स्यादनात न
स्याद् वैदिकाचाररतमनोशुचीनां श्रीमतां सताम् ।
सत्कुलस्थानजातानां भिक्षाशास्त्रार्थजन्मनाम् सत्क
दुश्चारिते भ्रादृप्रमाणं वत्समुदीरयेत् भोजकोपमशावेश
दूषणायामं समाचरेत् वृद्धमलाख्याख्यावस्पन्द ।
स्यांगानि नोत जपेत् तथा स्पर्शं स्थानानां स्पर्शनेपि
वपवसांशीश्वानिय सामृक्ष्चरणकृच्चरेत् विन्दुत्रोत्स
र्गं पांकादियुक्तः कर्म करोति यः जपार्चनादिकं स
र्वमपवित्रं भवेत्प्रिये मालिन्यं वरकेशादि वस्त्रदौर्ग
न्ध्यसंयुतः योजपेत्तदहं मान्ये देवताग्रसंस्थितः ।
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् नीचांग
स्पर्शनं कोपं जपकाले विवर्जयेत् एवमेतद्विधाने
न विलंबं न त्वरितं विना उक्तमंत्रं जपेत्कुर्यात्पुरश्चरण
सिद्धये देवतागुरुमंत्राणामैक्यं संभावयन्धिया ।
जपेदेकमनाः प्रातःकालं मध्यदिनावधि यत्सं
ख्यया समारब्धं तत्कर्तव्यमहर्निशम् यदि न्यूना ।
धिकं कुर्याद्व्रतभंगो भवेन्नराः मालान्तरे यत्सं
ख्यया समारब्धं तज्जप्यं दिने दिने न्यूनाधिकं न कर्त
व्यं मासमासं समाचरेत् गलाणविपि न्यूनातिरि
क्तकर्माणि न फलन्ति कदाचन यथाविधि कृतान्येव

मं. तं. मा. ३

13

नत्कर्माणि फलं तिच भूमध्या ब्रह्मचारित्वं मौनमा।
चार्यमेवनम् नित्यं त्रिषवणं स्नानं त्वष्टकर्मविवर्ज
येत् नित्यं पूजा नित्यदानं देवतास्तुतिकीर्तनं नैमि
त्तिकार्चनं चैव विश्वासो गुरुदेवयोः जपनिष्ठा द्वाद।
शैते धर्माः स्युर्मंत्रसिद्धिदः स्त्रीशूद्रपतितव्रात्यना
स्तिकोच्छिष्टभाषणम् असत्यभाषणं जिह्मभाषणं।
परिवर्जयेत् सत्येनापि न भाषेत जपहोमार्चनादिषु।
अन्यथा त्वहितं सर्वं भवत्येकं निरर्थकं योगिनीहृद
ये शायीत कुशशय्यायां शुचिवस्त्रधरः सदा प्रत्यह
स्तालयेक्षय्यामेकाकी निर्भयः स्वपेत् असत्यभाष।
णं वाक्कौटिल्यं परिवर्जयेत् सत्येनापि न भाषेत ज
पहोमार्चनादिषु वर्जयेत्स्त्रीनवाद्यादिश्रवणं निघद
र्शनम् अभ्यंगं गंधलेपं च पुष्पधारणमेव च मै।
थुनं स्त्रीकथालापं तत्संगं चैव विवर्जयेत् त्यजेद्दुष्टो।
दकस्नानमनिवेदितभोजनम् नचैव नैकवासाज
पेद्दं तं वक्रवक्रवस्त्राजलोपिवा पतितानां मंत्यजा।
नां दर्शभाषणमश्नुते स्नातेयो वाग्गमनं जपभणं जप
मन्त्रजेत् तस्मात्कस्मात् श्रुतं न्यासो प्राणायामं षडंग।
कम् कल्याणमस्य जपे [illegible] वषड्हामत्र्यो विदर्शनम्।
आदिशान्वाहड्ढिंशलालोणव नेत्रानतात् मनुसंहर
णां शौचं मौनं मंत्रार्थचिंतनम् अव्यग्रत्वमनिर्वेदोज।
पसंपत्तिहेतवः उल्लेखी केचकीनये मुक्तके योगला
चूनः अपवित्रकरः स्फुटः पलपत्रनपेन्कुवित् अ।
अन्यमानः शायानो वाग [illegible] जाननपञ्चवा अशाश्नतो।

करौकृत्वाशिरस्याप्राङ्मुखोपिवा विनाय्याकुलचित्तोवा
क्रुद्धोभ्रांतःक्षुधान्वितः रथ्यायामशिवेस्थानेनजपे
त्तिमिरावृते उपानद्गूढपादोवायानशय्यागतस्त
था प्रसार्यनजपेत्पादावुत्कटासनएवच मार्जारंकु
क्कुटंक्रौंचंश्वानंशूद्रंकपिंखरं दृष्ट्वाचसंस्पृशेत्कर्णं
स्पृष्ट्वास्नानंविधीयते सर्वत्रजपेयंनियमः नतुमा
नसे तथाच मशुचिर्वाशुचिर्वापिगच्छंस्तिष्ठन्स्वप
न्नपि मंत्रैकशरणोविद्वान्मनसैवसदाभ्यसेत् नदो
षोमानसेजाप्येसर्वदेशेपिसर्वदा जपनिष्ठोद्विजश्रे
ष्ठोखिलयज्ञफलंलभेत् प्रणवादिमंत्रजाप्येन्त्वतन्म
न्मंत्रविशेषोवक्तव्यः जपफलमाहशिवधर्मे स
र्वेषामेवजपधर्माणांजाप्यतेसौमहाफलः जपेन
देवतानित्यंस्तूयमानाप्रसीदति प्रसन्नाविपुला
न्कामान्दद्यान्मुक्तिंचशाश्वतीम् यक्षरक्षःपिशाचा
श्चग्रहाःसर्पाश्चभीषणाः जपिनंनोपसर्पन्तिभयभी
ताःसमंततः यावंतःकर्मयज्ञाःस्युःप्रदिष्टानितपां
सिच सर्वेतेजपयज्ञस्यकलांनार्हन्तिषोडशीम् महा
स्यंवाविविक्तस्थेनजपयज्ञस्यकीर्तितं तस्मात्स्तुतय
णोपांशुःसहस्रोमानसःस्मृतः तथांतरे मानसः
सिद्धिकामानांपुष्टिकामेरुपांशुकः वाचिकोमार
णेचैवप्रशस्तोमंत्रवेदिनः गौतमीये शान्त्यादिष्वव
णेस्थानमन्यथात्वेसदस्यवा त्रिसंध्यंप्रजपेन्मंत्रंपू
जनंतत्समंभवेत् संध्यात्रयेपूजाकालाजपमस्या
न्नेवमातंकुर्यादित्यर्थः एकदावाभवेत्पूजाकाल्वाजप

गं. नं. सां. ४

स्नानं विना जपो नैवाभवेत् स्नानं नैवाजपेन्मंत्रं
प्रातःकालं समारभ्य जपन्मध्यंदिनावधि मध्यंदिना
वधीति नियमपरम् किंत्वविच्छिन्नकालव्यवच्छेदपरम्
अन्यथा तत्समयजपनाज्जपनियमे कदाचिद्विच्छिन्नो जा
त्या तेन्यन वा समासि प्रतिनियतदिवसीयजपसं
ख्यायाऽपूर्णत्वेनाधिकत्वेन नियमभंगः स्यात् ।
मनःसंहृत्य विषयान्मंत्रार्थगतमानसः न द्रुतं न
विलंबं च जपेन्मौक्तिकहारवत् जपः स्यादक्षरावृ
त्तिर्मानसोपांशुवाचिकैः धिया यदक्षरश्रेणीं वर्णा
द्वर्णपदात्मिकाम् उच्चरेदर्थमुद्दिश्य मानसः स ज
पः स्मृतः जिह्वौष्ठौ चालयेत्किंचिद्देवतागतमान
सः किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः
विशुद्धेश्वरतत्त्वे निजकर्णागोचरो यो मानसः स ज
पः स्मृतः उपांशुर्निजकर्णस्य गोचरः परिकीर्तितः
निगदस्तु जनैर्वेद्यस्त्रिविधो जप ईरितः मंत्रमुच्चा
रयेद्वा वाचिकः स जपः स्मृतः उच्चैर्जपाद्विशि
ष्टः स्यादुपांशुर्दशभिर्गुणैः जिह्वाजपः शतगुणः
साहस्रो मानसः स्मृतः तंत्रांतरे उच्चैर्जपोऽधमः प्रो
क्त उपांशुर्मध्यमः स्मृतः उत्तमो मानसो देवि त्रिवि
धः कथितो जपः प्रतिक्रमोक्तोऽप्यत्र तु निर्दिष्टौ ।
व सत्त्वयः मुक्तामलत्वसंयुक्तं जपेन्मौक्तिकहारवत्
मनसा यत्स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् उभयं निष्फ
लं याति भिन्नभाण्डोदकं यथा गौतमीये पञ्चमा
वेष्टितः मंत्रः केवलं वर्णरूपिणः सोऽपि सौषुम्नाध्वनस्य

रिताः प्रभुत्वं प्राप्नुवंतीति मंत्राक्षराणि विघ्नोमे
ज्ञातानि परिभावयेत् नामेव परमव्योम्नि परमानं
दरूं हिते दर्शयन्त्यात्मसद्भावं पूजाहोमादिभि।
विनीति कल्पार्णवेपि मनोन्यत्रासवोन्यत्र शाक्ति।
रन्यत्र वायवः न सिद्ध्यन्ति वारारोहे कल्पकोटि।
जपादिति ज्ञानसूक्ष्मपादौ स्यादंते च मृतसूतके
सूतकद्वयद्वयसंयुक्तो मंत्रः सनसिद्ध्यति गु
रुक्ताद्दितं कृत्वा मंत्रयावज्जपेद्धिया सूतकद्वयसं
युक्तः समंत्रः सर्वसिद्धिदः मत्रैव ब्रह्मबीजं मनो।
र्दत्वाद्यं तेपरमेश्वरि सप्तवारं जपेन्मंत्रं सूतक।
द्वयमुक्तये मंत्रार्थं मंत्रचैतन्यं योनिमुद्रां न वेत्ति
यः शतकोटिजपेनापि तस्य सिद्धिर्न जायते ल
प्तबीजास्तु ये मंत्रा न दास्यंति फलं प्रिये मंत्राश्चै
तन्यसहिताः सर्वसिद्धिकराः स्मृताः चैतन्यरहिता
मंत्राः प्रोक्ता मंत्रास्तु केवलम् फलं नैव प्रयच्छंति
लक्षकोटिजपैरपि मंत्रैश्चारैकृते याद्दक् स्वरूपं।
प्रत्यक्षं भवेत् शतेसहस्रे लक्षे वा कोटिजाप्येन त
त्फलं हृदयग्रंथिभेदश्च सर्वावयववर्धनम् आ
नंदाश्रूणि पुलको देहावेशः सुरेश्वरि गद्गदोक्ति
श्च सहसा जायते नात्र संशयः सकृदुच्चारितेप्ये।
वं मंत्रे चैतन्यसंपुटे दृश्यंते प्रत्ययास्तत्र पारंपर्य
तदुच्यते मातृकाद्यं जपेन्मंत्रं भूतलिप्याथ संपुटम्
क्रमोत्क्रमात्सहस्रं च तस्य सिद्धो भवेन्मनुः अथ भूत
लिपिः पंचह्रस्वाः संधिवर्णाः व्योमरायिंसलंदरा।
पंचवर्गा
द्यंति माद्यं द्वितीयं च चतुर्थं मध्यसंक्रमात्

ॐ तं सां १५

15

दशांशं स्कंधतः स्वेनकामिसमह पञ्चभूतलिपिः
प्रोक्ता ह्रस्ववर्णा विंशद्वर्णा गौतमीये प्रवेजपं प्रभु।
कृत्वा तेजोरूपं समर्पयेत् देवस्य दक्षिणे हस्ते जप
पुष्पाद्यम्बुवारिभिः सफलं तद्धि यद्येव प्राणायामं स
माचरेत् शान्तिविषये वामहस्ते तथा च प्रवेजपं प्रभु
हुत्वा गंधाक्षतकुशोदकैः जपं समर्पयेद्देव्या वामह
स्ते विचक्षणः जपान्ते प्रत्यहं मंत्री होमयेत्तद्दशांश
तः तर्पणं चाभिषेकं च तद्दशांशं ततो मतिः प्रत्यहं
भोजयेद्विप्रान् न्यूनाधिकप्रशान्तये अशक्तो वा सर्वपूर्ण
श्च होमादिकमथाचरेत् होमाद्यप्रशक्तो सन्नत्कर्मा
दीये यद्यदंगं भवेद्भग्नं तत्संख्याद्विगुणं जपः होमा
न्तेव जपः कार्यो होमसंख्यावत्तर्गणः
त्रियाणां च समसंख्यागणाः विप्राणां च।
संख्याकमेषां स्त्रीणामयं विधिः स्मृतः वैश्यानां च।
शूद्रः सच्चतस्य विधिं चरेत् पंचवर्णमाश्रितः
न्यस्त्वा सहस्रो जपः सप्ताष्टशतं जपेत् शूद्रस्य विप्रभृत्यस्यत
स्मृटये होमकर्मण्यशक्ता नो विप्राणां हि गुणोज
सर्वविषयम् एतेन स्त्रीशूद्राणां होमादिकारः इति
श्चाव शूद्राणां त्रिश्च कारणप्रकरणे शारदायाम् स्त्री
कन्यां प्रयच्छति अनेन विधिना कन्यावरमाप्नोति
वांछितम् अतः स्त्रीणां होमाधिकारो न च लाजैर्हिमथ रोपयेत् होमः
द्वारा तथा च तंत्रे ॐकारोच्चारणाद्धोमान्नालिग्रा
मशिलार्चनात् ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत्। तस्माच्चाण्डालता

लंताञ्जपेत् इति सामान्यविधानात् तथा स्त्रीणामपि सर्ववै
दिककर्मसु शूद्रवत्त्वप्रतिपादनात् स्त्रीशूद्रकरसंस्प
र्शो वज्रपातसमो मतः इति भगवद्वचनात् तथा नाराय
णकल्पे षडक्षरो महामंत्रः सर्वेषां शूद्रयोषितः प्र
णवादिरयं मंत्रो न स्त्रीशूद्रेषु शस्यते इति सर्वस्त्रीणां
शूद्रवद्व्यवहारः सर्वेषां वा द्विगुणो जपः तथा वर्तमा
ने यदंगं विहीयते तत्संख्या द्विगुणो जपः कर्तव्य
स्त्रागसिद्ध्यर्थं तदशक्तेन भक्तितः तद्वदंगं विहीयते तत्ता
द्विशिष्टमवाप्नुयात् तथा गरुडसंहितायाम् योहि
होमेन शक्तः स्यात्स ज्ञायात्तर्पणेऽपि वा तावत्संख्याज
पेनैव ब्राह्मणः स्यपनेन वा सवेदंगवारणोवश्परस्वरा
णाकर्माणि स्वयं ब्राह्मणानमावाप्यकमेव उक्तं हि वि
प्रोभजनमात्रेणाङ्गं सांगं भवेद् ध्रुवम् इति ततः गु
रवे दक्षिणां दद्याज्ज्ञानाच्छादनादिभिः गुरुसंतोष
मात्रेण मंत्रसिद्धिर्भवेद्ध्रुवं समासिद्धैकमंत्रस्य पंचां
गोपासनेनैव सर्वे मंत्राश्च सिद्ध्यन्ति तत्प्रसादात्कले
स्वरि: गुरुमूलमिदं सर्वमित्याहुस्तत्ववेदिनः प्रका
या मत्सिद्धिनो नित्यं गतं वेदेन वै गुरुम् गुरुरेव परंब्र
ह्म तस्मादादौ तमर्चयेत् तदनेन महती पूजा कार्या तस्मा
पकसत्तमः सुवासिनी कुमारी च भूषणैरपि भूषये
त् मिष्टान्नं वस्त्रसत्कारैर्भक्तवैष्णवैः सह प्रवेशि
ष्टमंत्रं मंत्री साधयेत्सकलेप्सितम् अथवान्यप्रका
रेणापुरश्चरणमभिधीयते ग्रहणोक्तस्य वैदिको वाप्युविधि
वेद्यपोषितः तथा सम्यग्रणाभिमन्त्यो नाभिमात्रोदके।

स्थितः स्पर्शाद्विमुक्तिपर्यन्तं जपेन्मंत्रमनन्यधीः ताव।
भावेत् यद्वाग्रहणोदके स्नात्वाशुचिः पूर्वमुपोषितः ग्र
हणादिविमोक्षान्तं जपेन्मंत्रं समाहितः सूर्यग्रहमारभ्य
दृष्टान्तात्समये कल्पो विमोक्षान्तं जपं चरेत् तावद्यत्ना
दिकं कार्यं ग्रहांश्चैते तत्र श्चविर्भवेत् इति जप्त्वा मंत्रसिद्धि
र्भवेत्यत्र न संशयः यः श्राद्धाद्युपरोधेन यदि त्याज्यं स्या।
जेन्नरः स भवेद्देवताद्रोही पितृन्समनयेत्यपः इति
सनत्कुमारीयवचनाज्जपस्यावश्यकत्वम् वस्तुतस्त्वा
रब्धपुरश्चरणविषयमेतत् तथा हि आरब्धे पुरश्चरणे
यदि ग्रहणम् भवेत् तदा श्राद्धाद्युपरोधेन जपं नैव त्य।
जेन्नरः एवं रात्रावपि पुरश्चरणविशेषो वक्तव्यः इति
सर्वत्र समं जपे योगिनीहृदये कल्पोक्तविधिना मं
त्रीकुर्यात्तद्दोषसंसमाहितः अथवा तद्दशांशेन क्र
माद्धोमं समाचरेत् गोपालमंत्रतर्पणे होमसमसंख्या
त्वम् तथा गोपालमंत्रस्य तर्पणे होमसंख्यया वर्णि
नामिह सर्वेषामित्यागमशिरोविदः तेदं तमसन्तीप्र
जोकुर्याद्ब्राह्मणानां तोषणम् तेषां तरे ततो मंत्रप्रसिद्ध
ष्ट्यं गृहे सुसंपूज्य तोषयेत् एवं च मंत्रसिद्धिः स्याद्देवताश्च
प्रसीदति यद्यपि पुरश्चरणपदं पंचांगपरं तथा च।
जपहोमौ तर्पणं चाभिषेको विप्रभोजनम् पंचांगो।
पासना लोके पुरश्चरणमिष्यते तथापि ग्रहणादौ
वन्हसौदयावधीतिदर्शनात् तत्रहोमादेरभावा
त. तर्हि कथं पुरश्चरणे होमादिरितिवेत् वचनाद्यो।

वजायतेन च पुरश्चरणस्य पञ्चाङ्गत्वात् न च सर्वत्र ता-
दृवस्यादिनियमपूर्वम् ग्रहणे पुनस्तद्दिनादनमनर्थ-
कं स्यात् किं च ग्रहणे होमादिनियमाभावान्यत्र होमा-
दि ग्रहणं पुरश्चरणहोमादिविधानं तु प्रकटीभूतपु-
रश्चरणानल्पनावबोधनाय अतएव पञ्चाङ्गस्वरूप-
पुरश्चरणोक्तौ तेन मुख्यप्रयोगोप्यधिकार इति प्रकटी-
कृतम् न ह्यकरणे पुनः केवलजपमात्रपुरणेनाधिका-
र इति सर्वसंमतम् पुरश्चरणकालस्तु वाराहीये वंद-
नायानुकूलस्य शुक्लपक्षे शुभे दिने आरभेत् पुरश्चर्यामिह।
गैव सप्तैव नावधेत् ग्रहणे च महातीर्थे न कालमव-
धारयेत् अथ पुरश्चरणप्रयोगः तत्र तावत् स्नैः परिग्र-
हं कृत्वा पुरश्चरणात् प्राक्तनीयदिवसे तावद्रात्रिकं।
विधाय विदिक्षु च नदीतटे कोणे पञ्चक्रोशाह्वपदे ग्रं वता।
रञ्ज माहानादिविहारार्थं परिकल्प्यते तत्रैव कूर्मचक्रा-
नुगुणं मण्डपं विधायैकमप्यकं कुर्यात् ततः परदिने स्ना-
नादिकं विधाय शुद्धः सन् अस्मत्पोऽर्चरसलदाणा
मण्डपस्य वितस्तिमात्रायां वेदिकायां ये तत्र विघ्नक-
र्तारो भुवि दिव्यान्तरिक्षकाः विघ्नभूताश्च ये चान्ये मम
मन्त्रस्य सिद्धिषु मयैतत्कीलितं क्षेत्रं परित्यज्य विद्र-
रन्तः अपसर्पन्तु ते सर्वे निर्विघ्ना सिद्धिरस्तु मे इति म-
स्त्राय फट् इत्यनेन मन्त्रेण सुश्वेतसर्षपानभिमन्त्रिता-
यो दशदिक्षु निक्षिपेत्सु ॐ नमः सुदर्शनाय अस्त्रा-
य फट् इति मन्त्रेणासनं संपूज्य पूर्वादिक्रमेणेन्द्रादिलो-
कपालान् सर्वोपचारैः पूजयेत् तथा च प्रत्येकं तन्त्रादि

कौं॰ तं॰ सां॰ १७

17

कं गत्वा कुर्याद्भूमिपरिग्रहम् तथा श्रावयाम्यमुकमं
त्रस्य पुरश्चरणसिद्धये मयेयं गृह्यते सिद्धिर्मंत्रोयं
समर्पिममसिद्ध्यतामिति तथाच नगरादावपि क्रो
शं क्रोशद्वयमथापि वा ग्रामादिविहारार्थं ताव
ताभूमिमाक्रमेत् हीरहलोज्ज्वलकीलान् स्वमंत्रा
भिमंत्रितान् निखनेद्दशदिग्भागेषु हुं च प्रपूज
येत् लोकपालांस्तु तत्स्थगंधाद्यैरर्चयेत्सुधीरिति
ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिं संपूज्य सर्वविना
शार्थं गणपतिं पूजयेद्यथा अद्येत्यादि अमुकगो
त्रोऽमुकदेवशर्मा सत्कर्तव्यामुकमंत्रपुरश्चरणकर्म
णि विघ्ननिरासार्थं गणेशपूजनमहं करिष्ये इति सं
कल्प्य वेदिमध्ये पंचोपचारैः पूजयेत् तद्वत् क्षेत्रपा
लादिकं तत्र पूजयेद्विधिवत्ततः क्षेत्रपं वास्तुनामा
नं विघ्नराजं समर्चयेत् दिक्पतिभ्यो बलिं दद्यात्ततः
क्षेत्रं समाविशेत् ततो मांसभक्तादिना पूजितदेवता
भ्यो बलिं दद्यात् ततः ये चैतद्रौद्रकर्माणो रौद्रस्थान
वासिनः मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये वि
घ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः सर्वे ते प्री
तमनसः प्रतिगृह्णन्त्विमं बलिम् इत्यनेनाष्टदिक्
भूतेभ्यो बलिं दद्यात् ततो गायत्रीं जपेत् ततश्च प्रा
तः स्नात्वा तत्र गायत्र्याः सहस्रं प्रयतो जपेत् तावता
तानस्य पापस्य तत्पार्थं प्रशमनकः इति विधायप
वार्यः यत्र प्रातः स्नात्वा तत्र सावित्र्याः अयुतं प्रयतो ज
पेत् तस्य तत्तत्पापशंकया गंगेत्यादि अमुक

गोत्रः अमुकदेवशर्माहं ज्ञाताज्ञातपापक्षयकामोऽमुक-
सहस्रं सावित्रीजपमहं करिष्ये । ततउपवासं हविष्यं
वा कुर्यात् ततः परदिने तु घस्रिस्नानादिकं विधाय
स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् विधिः अद्येत्या-
दि अमुकगोत्रः श्रीअमुकदेवशर्माहं ज्ञाताज्ञातपाप-
क्षयकामोऽमुकदेवतायां अमुकमंत्रसिद्धिप्रतिबंध-
कपापदुरितक्षयपूर्वकं तं मंत्रसिद्धिकामो प्रारभ्य
यावत्कालेन सेत्स्यति तावत्कालममुकमंत्रस्य प्र-
त्यहं जपेन तद्दशांशतर्पणतद्दशांशाभिषेकतद्दशां-
शब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये इति संक-
ल्प्य भूतशुद्धिं प्राणायामं च कृत्वा स्वां स्वां मन्त्रोक्तां
स्वस्वपद्धत्युक्तक्रमेण देवतां संपूज्य दीपं प्रज्वलिते
देवतोद्देश्ये कृत्वा प्रातःकाले समारभ्य मध्यदि-
नं यावज्जपं कुर्यात् ततो होमः ततस्तर्पणम् कलशे
वै तर्पणं तु ततः कुर्यात्तीर्थोदकैर्दुग्धमिश्रितैः जपेद्देवं
ममाद्यपादाद्येरुद्रकामनैः संपूज्य विधिवद्भक्त्याप-
रिवारसमन्वितम् एकैकमञ्जलिं तद्योपरिवारं प्र-
तर्पयेत् ततो होमाद्दशांशेन तर्पयेदिष्टदेवताम् तर्प-
णांते स्नानप्रकारेण वक्ष्ये अभिषेकवाक्यं तन्नमोम्
लेमस्त्राख्यामकदेवतामहमभिषिंचामीति कलश-
मुद्रया स्वमूर्ध्नि समभिषिंचेत् तथा च तमोंत्रे मंत्रम-
वार्यतदंते देवताभिधाम् द्वितीयान्तामहं पश्चादभि-
षिंचाम्यनेन तत्र अभिषिंचेत्स्वमूर्धानं तोयैः कुंभात्
मुद्रया प्रान्निविषये मंत्रान्तेनामकस्यार्थं सिंचामीति

नमः पदं इति नीलतन्त्रे मूलान्ते नामचोच्चार्य सि-
द्धमीति नमः पदम् ततो दक्षिणा अथ कृतैतदमुकदे-
वतायाममुकमन्त्रस्य पुरश्चरणकर्मणः सांगतार्थं द-
क्षिणामिदं कांचनं यथानामगोत्राय गुरवे तुभ्यमहं
संप्रददे ततो छिद्रावधारणं कुर्यात् यच्छिद्रं तत्पच्छि-
द्रं यजने मम तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादात्।
इत्यादि अमुकगोत्रोमुकदेवशर्माहमद्यसेदिवाक-
रेवा अमुकदेवतायाममुकमन्त्रसिद्धिकामो ग्रासादि
विमुक्तिपर्यंतममुकमन्त्रस्य जपपुरश्चरणमहं क-
रिष्य इति संकल्य जपेत् तद्दिने पारणे वा स्नानादिकं
विधाय गं अद्येत्यादि अमुकमन्त्रस्यैतत्कृतग्रहण-
कालेन यत्संख्यातद्दशांशतद्दशांशहोमतद्दशांशत-
र्पणेन तद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनं क-
मिण्यहं करिष्य इति संकल्प्य होमादिकं कुर्यादिति द-
क्षिणादिकं तत्पूर्ववत् इति पुरश्चरणविधिः संपूर्णः
अथ कूर्मचक्रम् दीपस्थानं समाश्रित्य कृतं कर्मफ-
लप्रदम् दीपस्थाने पुरुषेयत्र दीपस्थानं तदुच्यते चतु-
रस्रां भवं भित्वा कोष्ठानां नवकं लिखेत् दिक्षु स्वादि
तोयत्र देशाय तत्र संस्थितिः मध्यं तस्य तु जानीयात्
हस्ताद्भयतः स्थितो कोष्ठकदीश्रयादौ देहिनि तत्
पुत्रमीरितम् क्रमेणानेन विभक्तेन मध्यस्थमपि भा-
उदामीनाकृतिसंस्थः पारस्थोद्भवमामुयात् पूर्व
स्थः पीडाते मंत्रीविंघ्नो नोत्पाटनादिभिः कूर्मचक्रमि

देशोक्तं मंत्राणां सिद्धिसाधनम् कूर्मचक्रमविज्ञाय यः कु
र्याज्जपयज्ञकम् तस्य यज्ञफलं नास्ति सर्वानर्थाय क
ल्पते अथ मंत्राणां दश संस्काराः तत्र गौतमीये जननं
जीवनं पश्चात्ताडनं बोधनं तथा अथाभिषेको विमली
करणाप्यायनं पुनः तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रि
याः स्वर्णादिपीठे संलिख्य मातृकायंत्रमुत्तमम् का
श्मीरचंदनेनाथ भस्मना वाथ मन्त्रविते काश्मीरेणाग्नि
संस्कारे चंदने वैष्णवे मतौ शैवे भस्म समाख्यातं मातृ
कायंत्रलेखने शैवादिमंत्रभेदेन शाक्तेऽप्यत्र यथाक्रमे ।
मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतं पंक्तिक्रमे
णविधिना सम्यग्भिन्नत्वेन निश्चितम् प्रणवान्तरितां कृ।
त्वा मंत्रवर्णान् जपेत्सुधीः एतेकैकशतवारं तज्जीवनं तड
ताडनम् मंत्रवर्णान्समालिख्य ताडयेच्चंदनांभसा
प्रत्येकं वायुबीजेन पूर्व वै मातनं स्मृतम् विलिख्य मंत्रव
र्णांस्तु प्रसूनैः करवीरजैः तन्मंत्रवर्णसंख्यातं हत्वा ।
रेफेन बोधनम् तत्तन्मंत्रोक्तविधिना अभिषेकः प्रकी
र्तितः अश्वत्थपल्लवैः सिंचेन्मंत्री मंत्राणसंख्यया सं।
चिंत्य मनसा मंत्रं सुषुम्णामूलमध्यतः ज्योतिर्मंत्रेण वि
धिवद्दहेन्मलत्रयं यती तारं व्योमाग्निमनुयुग्दण्डी ज्यो
तिर्मनुर्मतः मनः ओंकारः दण्डी अनुस्वारः व्योम ह
कारः अग्नी रेफः स्वर्णोनकुशतोयेन प्रोक्षणाप्यायनं।
या तेन मंत्रेण विधिवदाप्यायनविधिः स्मृतः मंत्रेण।
वारिणा तंत्रेण तर्पणं तर्पणं मतम् मधुनाथाग्नि मंत्रेण
वैष्णवेचं कुशजलैः शैवेच्च तेन दुग्धेन तर्पणं समुदीरि
नम् अभिषेकेपि तथा तारमायारमायोगान्मनोर्दीप

ग्रं॰ नं॰ स्तो॰ १९

19

नमुच्यते जपमानस्य मंत्रस्य गोपनत्वप्रकाशनम् से
कादशमे प्रोक्ताः सर्वतंत्रेषु गोपिताः याल्कत्वा मंत्र
दायेण मंत्री वांछितमाप्नुयात् मलत्रयमिति आणवं
मायिकं मायया चोक्तं पौरुषं कार्मणं मलम् मायि
कं मायया चोक्तं पौरुषं आणवेन तत्त्वयेते ये निष्कृतं
मलत्रयं तारमायारमायोगादिति तारमायारमाबी
जपुटितं मंत्रमहेशान शतं जपेत्सिध्यर्थः तथा विमला
दे तारमायारमाबीजपुटितेन जपेद्दनम् श्रुतमहे
मरंचैव दीपयेत्साधकोत्तमः अथाकलावतीदीक्षा
प्रयोगः तत्र शिष्यः पूर्वमुपोषितः स्नाननित्यक्रियाः
स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् यथा अद्येत्या
दि अमुकगोत्रोमुकदेवशर्माहं धर्मार्थकाममोक्षप्रा
प्तिकामो ममुकदेवतायाः सत्कतंत्रामुकमंत्रदीक्षा
महं करिष्ये इति संकल्प गुरुं वृणुयात् तद्यथा सा
दर्भीवानां त्वां साधाम गंधर्वयिष्यामो भवन्तम् ॐ
सर्वयतततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य
दक्षिणानाव धृत्वा पठेत् विप्रः अद्येत्यादि अमुकगो
त्रोमुकदेवशर्मामुकदेवतायाम् सत्कतंत्रामुकमंत्र
दीक्षाकर्मणि अमुकगोत्रं श्रीअमुकदेवशर्माणं पभिः पा
द्यादिभिरभ्यर्च्य गुरुत्वेन भगवंतमहं वृणे ॐ वृतोस्मीति
प्रतिवचनम् यथाविहितं कर्म कुरु यथाज्ञानतः करवा
णीति प्रतिवचनम् ततो गुरुर्यागस्य द्वारदेशमागा
त्य ॐ ...पारशांतये नमः इति संपूज्य ... भूर्विविविलि
ता पात्रस्य शाल्मली ... मायारंतत्र निपातयन् इति मंत्रे
... रत्नानि पातयन्मह इति संपूज्य कौ

इति कृत्वा मन्त्रयामर्घ्यमुत्फुल्लाङ्गं वयमनेवेत्वादिनाती
र्थमावाह्य ॐ इति गंधपुष्पं निक्षिप्य धेनुमुद्रां प्रदर्श्य
ॐ इति पुष्पादर्घ्यपात्रावाजस्रा फट् इति तज्जलेन द्वारम
भ्युक्ष्य द्वारपूजां समाचरेत् तथा च त्रिकोणवृत्तमभ्यु
पितमण्डलं च वयेन्नतः आधारशक्तिं संपूज्य तत्राधा
रं विनिक्षिपेत् अर्घेणार्घं सम्पूर्णं ध्यात्वा मन्त्रेणाप्रपू
रयेत् निक्षिपेत्तीर्थमावाह्य गंधादीन्यर्पणेन तु
दर्शयेद्धेनुमुद्रां च सामान्यार्घ्यमिदं स्मृतम् मंत्रये।
त्प्रणवेनैव सामान्यार्घ्यमितीरितम् इति गौत।
मीयवचनात् अष्टपात्रप्रणवजपः विशेषार्घ्येन तत्प्र
दर्शनात् फट् इति जलेन द्वारमभ्युक्ष्य द्वारपूजां
कुर्यात् यथा ऊर्ध्वोदुम्बरे ॐ विघ्नेशाय नमः अधःको
णहये ॐ महालक्ष्म्यै नमः ॐ सरस्वत्यै नमः दक्षि
णशाखायाम् ॐ विघ्नाय नमः वामशाखायां ॐ क्षे
त्रेशाय नमः तयोः पार्श्वे ॐ गंगायै नमः ॐ यमुना
यै नमः देहल्यां ॐ अस्त्राय नमः इति पूजयेन्मध्या।
वाहिण्या अष्टाङ्गुष्ठेन ॐ द्वारदेवताभ्यो नमः इति सा
तावन्मन्त्रं त्रिपुरापूजादिषु गणेशक्षेत्रपालवटु
केयोगिनीस्तथा गंगां च यमुनां चैव लक्ष्मीं वाणीं च।
योजयेत् ततो दक्षिणपादपुरः सरं वामशाखां स्पृ।
शेत् दक्षिणांगं संकोचयेत् मण्डपान्तः प्रविश्य नै
ऋत्यां ॐ वास्तुपुरुषाय नमः ॐ ब्रह्मणे नमः ततो दे
वतां मंत्रेणादिव्यदृष्ट्यावलोकयन्दिव्यान्विघ्नान्समु
त्सार्यास्त्राय फट् इति जलेनान्तरिक्षगान्विघ्नानुत्सा

यंवामपार्श्वेवातत्रयेण भौमान् फडिति जप्त्वा वि।
रानादाय ॐ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया इत्यनेनास्त्रविकि
रेत् तथाच लाजाश्चंदनसिद्धार्थभस्मदूर्वाक्षताः कुश
विकिरा इति संदिष्टाः सर्वविघ्नौघनाशकाः ह्रीं आधा
रशक्तिकमलासनाय नमः इत्यासनं संपूज्य ॐ अस्य
श्री आसनशोधनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं
छन्दः कूर्मो देवता आसनपरिग्रहे विनियोगः ।
ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च
धारय मां देवि पवित्रं कुरु चासनम् इति पठित्वा स्वस्ति
कादिक्रमेणोपविशेत् तथाच तंत्रांतरे आदौ वि।
घ्नशमनार्थं पश्चादासनमाचरेत् अथवाप्यासने स्थि
त्वा विघ्नानुत्सारयेत्सुधीः ततः पंचगव्येन मण्डपं सं
शोधयेत् तथाच गौतमीये पंचगव्येन तद्धर्म्यं मण्डपं ।
पंचविंशोधयेत् पंचगव्यप्रमाणं तत्रैव पलमात्रं तु
गव्यभागे गोमूत्रं तावदिष्यते शकृते च पलमात्रं स्यादङ्गु
ष्ठं तोलकद्वयं दधिप्रसृतिमात्रं स्यात्पंचगव्यमि
ष्टमेतत् अथवा पंचगव्यानां समानो भाग इष्यते मू
लमंत्रेण संमंत्र्य तेनैव परिशोधयेत् तेन सर्वविघ्न
डिम्भान्सर्वपापनिकृन्तनम् मण्डपदक्षिणभागे मूलाद्द।
ध्याणीवामे रक्षवासिनां तु मार्गे मंदरक्षमूलालनार्थं
पाचांनरं हहभ्यापयेत् सर्वविघ्नहनप्रदीपांश्च संपू।
रितोनिलिर्भूत्वा वामे गुरुभ्यो नमः ॐ पूर्वसपरु।
भ्यो नमः ॐ गणपतये गुरुभ्यो नमः दक्षिणभागे ॐ गण

पतये नमः मध्ये ॐ श्रीमत्कदेवतायै नमः तथाच कृतां
जलिपुटो भूत्वा वामे गुरुत्रयं यजेत् गणेशं च परमादिं वा
पराद्यस्त्रकं तथा दक्षिणे पिंगणेशं च मूर्ध्नि देवं विभा
वयेत् ततः फट् इति मंत्रेण गंधपुष्पाभ्यां करौ संमा।
र्ज्य छायेषे ताल त्रयं दत्वा कोटिकयादि दिग्बंधनं कुर्यात्
ततो रक्षितिज्वालादिर्जलधारयावह्निप्राकारेण वि
नयेत् ततो भूतशुद्धिः ततो मातृकान्यासः ततो मं।
त्रन्यासः ततः प्राणायामः ततः पीठन्यासः ततः ऋ
ष्यादिन्यासः ततो मंत्रन्यासः ततो मुद्राप्रदर्शनम्।
ततो ध्यानम् ततो मानसीपूजा ततोर्घ्यस्थापनम्।
तथा स्ववामे त्रिकोणमण्डलं कृत्वा तत्र त्रिपादिक
मारोप्य फट् इति शोधयित्वा तदुपरि संस्थाप्य नम
इति मंत्रेण गंधपुष्पाक्षतदूर्वादि तत्र निक्षिप्य विमल
जलेन तंलेहं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं
ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं सः अः ॐ औं ऐं एं लॄं।
लृं ॠं ऋं ऊं उं ईं इं आं अं इत्यनेन मूलेन च पूरयेत् ता।
तात्र गौतमीये मं वह्निमण्डलाय दशकलात्मने न
नम इति त्रिपादिकायाम् अं सूर्यमण्डलाय द्वादशक
लात्मने नमः इति शंखे उं सोममण्डलाय षोडशक
लात्मने नम इति जले संपूज्य ॐ गंगे च यमुने चैव गोदा
वरीत्यादिनेन कौ भित्यंकुशमुद्रया तीर्थमावाह्य प्र
भ्रेके इहावह इहतिष्ठेति स्वमुद्रया हेवर्मांतानाच्छाद्य
लभित्य वगुण्ठनावधायिति गालिनीमुद्रां तत्र सरूप
ता धेनुरिति तज्जलं वीक्ष्य पुनरागमंत्रैः सकलीकृत्य।

गंधपुष्पाभ्यां नम इति तत्र देवतां संपूज्य तदुपरि म
त्स्यमुद्रया संछाद्य तदुपरि मूलमंत्रमष्टवारं जपेत्
तथा च गौतमीये गंधपुष्पैः समभ्यर्च्य कलशं त्वाम
योजयेत् अष्टकृत्वो जपेन्मंत्रं शिवो वा योगमालिनीं न्यसे
त् अत्र कलशपदं तत्र देवतापरम् ततो योमिति मंत्रेण
धेनुमुद्रां प्रदर्श्य अस्त्रेण संरक्ष्य तस्मात् किंचिज्जलं प्रोक्ष
णीयपात्रे निधाय तेनोदकेनात्मानं पूजोपकरणा
नि चाभ्युक्ष्य मूलमंत्रेण पीठन्यासक्रमेण शरीरे धर्मा
दीन्पूजयेत् तद्यथा दक्षिणस्कंधे ॐ धर्माय नमः
वामस्कंधे ॐ ज्ञानाय नमः वामोरौ ॐ वैराग्याय
नमः दक्षिणोरौ ॐ ऐश्वर्याय नमः मुखे ॐ अध
र्माय नमः वामपार्श्वे ॐ अज्ञानाय नमो नाभौ ॐ अ
वैराग्याय नमः दक्षिणपार्श्वे ॐ अनैश्वर्याय नमः हृ
दये ॐ अनंताय नमः ॐ पद्माय नमः ॐ अं सूर्यम
ण्डलाय नमः द्वादशकलात्मने नमः ॐ सौं सोम
मण्डलाय षोडशकलात्मने नमः ॐ रं वह्निमण्ड
लाय नमः दशकलात्मने नमः सं सत्त्वाय नमः
रं रजसे नमः तं तमसे नमः आं आत्मने नमः अं अंत
रात्मने नमः पं परमात्मने नमः ह्रीं ज्ञानात्मने न
मः ततोम्बुजस्य पूर्वादिकेषु दलेषु पीठशक्तीः
संपूज्य मध्ये पीठमनेन यजेत् तत्र हृदये मूलदेवता
नैवेद्यं विना गंधाद्यैः संपूजयेत् तथा च निबंधे न्यास
क्रमेण देहस्थधर्मादीन् प्रपूजयेत् पुष्पाद्यैः पीठ
मध्ये तस्मिन्नयेद्देवताम् विना नैवेद्यैः गंधाद्यैरुप

चैः समर्चयेत् ततः उत्तमोगैः हृदयमूलाधारप
द्मे सर्वांगेषु मूलेन पंचपुष्पांजलिं दत्वा यथाशक्ति ।
मंत्रं जप्त्वा गुह्यातिना जपं समर्पयेत् तथा चानिवेद्य
पंचकृतमस्ततो दद्यात्पुष्पांजलिमनन्यधीः उत्तमा
गाहृदयाधारपद्मे सर्वांगके क्रमात् सर्वमेतत्स्वशो
त्वणोपात्रस्थजलेन विध्यात् ततः प्रोक्षिणीतोयं
विसृज्य पूर्ववत्संपूज्य बहिः पूजामारभेत् तत्र व
क्ष्यमाणप्रकारेण सर्वतोभद्राद्यन्यतममंडलेषु
जपेत् ॐ मण्डलाय नमः इति मण्डलं संपूज्य शा
लिभिः कर्णिकामध्यमापूर्य तदुपरि तंडुलानास्ती
र्य तेषु दर्भानास्तीर्य विष्टरं वा तत्तन्मंत्रैस्तेन तदुपरि
न्यसेत् ततो मंडलेपताः संपूजयेत् तद्यथा ।
पीठमध्ये ॐ आधारशक्त्यै नमः ॐ कूर्माय नमः इ
त्यादि पीठमंत्रं नवरत्नन्यटलोक्त रीत्या पीठपूजां
कुर्यात् ततो मंडले प्रादक्षिण्येन धूम्रार्चिषे नम
इति वक्ष्यमाणा वह्निदशकला विन्यस्य पूजयेत् त
तो हेमादिरचितं कुंभपात्रं इति प्रक्षाल्य चंदनागु
रुकर्पूरैर्धूपयित्वा त्रिगुणतन्तुकं तेनतं संवेष्ट्य ॐ
कुंभाय नमः इति गंधपुष्पाभ्यां संपूज्य विष्टरं वालत न
वरत्नानि संक्षिप्य प्रणवमस्त्रान्ते पीठयोः कां
विभाव्य पीठे स्थापयेत् गोतमीयक्ते भविधानेत
हेमं रौप्यं ताम्रं मृत्तिकं वा स्वशक्तितः विना ।
शाठ्येन कुर्वीत कृते निष्फलमाप्नुयात् षट्त्रिंश
दङ्गुलं कुम्भं विस्तारोन्नतिशालिनम् षोडशा ।

द्वादशांगान्यपि ततो न्यस्तेनं कारयेत् कुंभे प्रादक्षिण्येन
कुंभे तान्यपि न्यस्येन्नमः इत्यादिना दशकलाविन्यस्य पू
जयेत् ततः क्षीरदुमकषायेणापला शाद्वाम्भवेन वा
नेनरम् ततो ध्यानम् हेमाम्भोजप्रवालप्रतिम
निजरुचिं चारुखट्वाङ्गपद्मौ चक्रं शक्तिं सपाशं सृ
णिमतिरुचिरमक्षमालां कपालम् हस्ताम्भो
जैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्त्त
ण्डं वल्लभार्धं मणिमयमुकुटं हारदीप्तं भजामः ए
वं ध्यात्वा मानसैः संपूज्य प्राणस्थापनं कुर्यात् त
तः पूर्वोक्तक्रमेण पीठं संपूज्य पूर्वादिदिक्षु क
लिकायां ॐ रक्तायै नमः ॐ प्रदीप्तायै नमः ॐ प्रभा
यै नमः ॐ सेवितायै नमः इति संपूज्य मूलेन मूर्तिं
संकल्प्य पुनर्ध्यानावाहनादि पञ्चपुष्पाञ्जलिदा
नपर्यन्तं विधाय आवरणपूजां कुर्यात् तथाच नि
बन्धे पीठे दीप्तादिभिर्युक्ते कर्णिकायां सुधादि
काः पूर्वादिदिक्षु संपूज्य मूर्तिं मूलेन कल्पये
त् ततः पूर्वादिदिक्षु ॐ सूर्याय नमः ॐ भास्क
राय नमः ॐ भानवे नमः ॐ रवये नमः कोणेषु
ॐ दिवाकराय नमः तथाच सूर्यादीश्च मरीचिं
द्यविदिक्षु समर्चयेत् ततोग्निनिर्ऋतिवायी
शानेषु ॐ हृदयाय नमः इत्यादिना पूजयेत् देवा
ग्रे ॐ नेत्रत्रयाय वौषट् अंगपूजां यथापूर्वं को
णेभीषणान् दिग्गजानम् ततः पत्रेष्विन्द्रादीन्संपूज्य
भूपुरे लोकपालान्पूजयेत् तथाच निबन्धे ग्र
हानष्टौ ततो बाह्ये लोकपालांस्ततः परम् ततो धू
पादिविसर्जनान्तं कर्म समापयेत् ग्रहस्पष्टप्रकरण

जपोलक्षत्रयसंख्यः त्रिमधुरोपेतैः कमलैर्दशां
शोहोमः तथाच लक्षत्रयंजपेन्मंत्रीवबीजवि
षपुटीकृतम् दशांशंकमलैःफुल्लैर्जुहुयान्म
धुरोक्षितैः इमंमंत्रंजपेन्मंत्रीकीर्तिपुत्रान्धनं
श्रुतिं वाक्सिद्धिमतुलांलक्ष्मीसौभाग्यमप्यसा
पयेत् विपदर्थेतुलक्षितेनतदादिसर्गसंयुतः
अजपाख्योमन्त्रःप्रोक्तोष्टादशाक्षरः स्वपादमः अथ
पूजा प्रातःकृत्यादिपीठमन्त्रेनसमाप्य ऋष्या
दिन्यासंकुर्यात् शिरसिब्रह्मणेऋषयेनमः मु
खेगायत्रीछन्दसेनमः हृदिगिरिजापतयेदे
वतायैनमः ततःकरांगन्यासः हसौंअंगुष्ठाभ्यां
नमः इत्यादि हसौंहृदयायनमइत्यादिव त
थाचनिबंधे हसौंषड्दीर्घयुक्तेनकुर्याद्देगा।
क्रियांमनोः ततोध्यानं उद्यद्भानुस्फुरितन।
डिदाकारमर्धाम्बिकेशं पाशाभीतिवरदपर
शूनसंदधानंकराब्जैः दिव्याकल्पैर्नवमणिम
यैःशोभितंविश्वमूलं सौम्याग्नेयंवपुरवतुवः।
चन्द्रचूडंत्रिनेत्रम् एवंध्यात्वामानसैःसंपूज्यशं
खस्थापनंकुर्यात् ततस्तंत्रोक्तपीठपूजांविधा
यावरणपूजामारभेत केसरेषुततोग्निनिर्ऋ।
तिवायवीशानकोणेषुदिक्षुच हसौंहृदयायन
मइत्यादिपूजयेत् ततोदिग्दलेषु अनंतंवस्तंन
देवं विदिग्दलेषु अजजानोजाअद्रिजा अ
ग्नः पूजयेत् तद्बाह्येइन्द्रादीन्वज्रादींश्चपूजयेत्।

नं॰
ला॰
१॰
70

स ततोऽम्बादिविसर्जनांतं कर्म समापयेत् अथ पु
रश्चरणं द्वादशलक्षजः घृतयुक्तपायसेन दशां
शहोमः तथाच मातुलदेवनपेमं त्रपायसेन।
ससर्पिषा दशांशं जुहुयात्सम्यक्कृतः सिद्धो भा
वेन्मनुः इति सर्वमंत्रः क्लींउद्धरेत गोपकुमार।
संवैर्नंदामनेथलिविभूषितांगम् महेन्द्रहेय।
नवनीतचौरं नमादिदेवं शरणं प्रपद्ये अथ वक्ष्ये
महामंत्रान् विष्णोः सर्वार्थसाधकान् यस्य सं
स्मरणमात्रेण भवाब्धेः पारमाश्रिताः अथ विष्णु
मंत्राः तत्र वैष्णवाचमनं गौतमीये केशवाद्यै
स्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ द्वाभ्यामो
ष्ठौ च संमृज्य द्वाभ्यां संमृज्यान्मुखं ततः एकेन ह
स्तं प्रक्षाल्य पादौ प्रोक्षयेत्तथैकतः संप्रोक्ष्यैकेन मू
र्धानं ततः संकर्षणादिभिः अंस्यनासादिक
र्णांश्च नाभौ उरसि के भुजौ स्पृशेद्देवं भवेदाचमा
नीयं वैष्णवान्वये एवमाचमनं कृत्वा साक्षान्ना
रायणो भवेत् केशवाद्याः केशव नारायण
माधव गोविंद विष्णु मधुसूदन त्रिविक्रम वाम
न श्रीधर हृषीकेश पद्मनाभ दामोदर संक।
र्षण वासुदेव प्रद्युम्न अनिरुद्ध पुरुषोत्तम अ
धोक्षज नृसिंह अच्युत जनार्दन उपेन्द्र हरे श्री
कृष्ण वाकेवल ॐ केशवाय नम इत्यादि सर्वत्र
ध्वीनमोंतेष्वनामभिर्वैष्णवसत्तधीः नारो नमो।
नारायणायच तथाच नारं नमः पदं ब्रूयात्तारो

दीर्घसमन्वितौ पवनोनादमेंत्रोयं प्रोक्तो वसुदे
वानितः अस्यपूजाप्रयोगः प्रातःकृत्यादिमा
त्रकांतेविन्यस्यकेशवकीर्त्यादिन्यासंकुर्यात
तस्यध्यानम् उद्यत्प्रद्योतनशतरुचिंतप्तहेमा
वदातं पार्श्वद्वंद्वेजलधिसुतयाविश्वधात्र्याच
जुष्टाम् नानारत्नोल्लसितविविधाकल्पमापी
तवस्त्रं विद्यद्वंदरकमलकौमोदकीचक्र
हस्तम् एवंध्यात्वान्यसेत् अंकेशवायकीर्त्यै
नमः ललाटे आंनारायणायकांत्यैनमः मु
खे इंमाधवायतुष्ट्यैनमः दक्षनेत्रे ईंगोविंदा
यपुष्ट्यैनमोवामनेत्रे उंविष्णवेधृत्यैनमोदक्षक
र्णे ऊंमधुसूदनायशांत्यैनमोवामकर्णे ऋं
त्रिविक्रमायनमोदक्षनासापुटे ॠंवामनाय
दयायैनमोवामनासापुटे लृंश्रीधरायमेधायै
नमोदक्षगंडे ॡंहृषीकेशायहर्षायैनमो
वामगंडे एंपद्मनाभायश्रद्धायैनमः ओष्ठे ऐं
ऐंदामोदरायलज्जायैनमः अधरे ओंवासुदेवा
यलक्ष्म्यैनमः ऊर्ध्वदंतपंक्तौ औंसंकर्षणायस
रस्वत्यैनमः अधोदंतपंक्तौ अंप्रद्युम्नायप्रीत्यैन
मः मस्तके अःअनिरुद्धायरत्यैनमोमुखे कंच
क्रिणेजयायैनमः खंगदिनेदुर्गायैनमः गंशा
र्ङ्गिणेप्रभायैनमः घंखड्गिनेसत्यायैनमः
ङंशंखिनेचंडायैनमः दक्षकरमूलसंध्यग्रे
षु चंहलिनेवाण्यैनमः छंमुसलिनेविलासि

यैनमः जं शूलिने विजयायै नमः झं पाशिने
विरजायै नमः ञं अंकुशिने विश्वायै नमः वा
मकरमूलसंध्यग्रेषु टं महेन्द्राय विनन्दायै नमः
ठं नन्दजाय सुनन्दायै नमः डं नन्दिने सर्वायै न
मः ढं नागाय ऋद्ध्यै नमः णं नाकजिने समृद्ध्यै
नमः दक्षपादमूलसंध्यग्रकेषु तं हरये शुद्ध्यै
नमः थं हरुण्माय बुद्ध्यै नमः दं सन्याय मुक्त्यै
नमः धं मनेनाय मत्यै नमः नं श्रीकाराय दमा
यै नमः वामपादमूलसंध्यग्रकेषु पं स्थूराय
रमायै नमः दक्षपार्श्वे फं जनार्दनाय उमायै
नमः वामपार्श्वे बं भूधराय क्लेदिन्यै नमः पृ
ष्ठे भं विश्वमूर्तये क्लिन्नायै नमो नाभौ मं वैकु
ण्ठाय वसुधायै नमः उदरे यं त्वगात्मने पुरु
षोत्तमाय वसुधायै नमः हृदि रं असृगात्मने
बलिने गदिने परायै नमो दक्षांसे लं मांसा
त्मने बलानुजाय परायणायै नमः ककुदि
वं मेदआत्मने बालाय सूक्ष्मायै नमो वामांसे
शं अस्थ्यात्मने वृषघ्नाय संध्यायै नमः हृदा
दि दक्षकरे षं मज्जात्मने वृषाय प्रज्ञायै नमः
हृदादि वामकरे सं शुक्रात्मने हंसाय प्रभा
यै नमः हृदादि दक्षपादे हं प्राणात्मने वरा
हाय निशायै नमः हृदादि वामपादे लं जी
वात्मने विमलाय अमोघायै नमः हृदया
द्युदरे क्षं क्रोधात्मने नृसिंहाय विद्युतायै न

मः हृदयादिस्थाने गौतमीये केशवादि
र्न्यासो न्यासमात्रेण देहिनाम् अच्युतत्वंद
दात्येव सत्यंसत्येन संशयः इति न्यासे कृते
धीरो विष्णुर्भवति ध्रुवम् सकलवैष्णवमं
त्रजपादिष्विति दर्शनात् केशवकीर्त्यादिन्या
सेनित्यत्वात् मातृकार्णसमस्त्यार्थकेशवा
य इति स्मरेत् कीर्त्यैवमनसायुक्तं चैवं न्यासं
समाचरेत् केशवाय नमः कीर्त्यै कान्त्यै नाराय
णाय च इत्यगस्त्यसंहितावचनात् अयं क्रमः
नत्र केशवकीर्तिभ्यां नमः इति तथाच्युत किंतु
क्रिमिश्रुनायेन्यासः श्रीबीजादिः कर्तव्यः ।
यथा श्रीं श्रीं केशवाय कीर्त्यै नमः इति तथा
म एवं प्रविन्यसेन्न्यासे लक्ष्मीबीजपुरस्सरम्
स्मरतिं यत्रि महालक्ष्मी प्राप्नोनेह रितोव्रजेत्
ततस्तत्त्वन्यासः मातृकोनानयार्णोश्रबीजा
न्येकैकशोवदेत् नमः परायेत्स्त्र्यार्थवीजत
त्वात्मनेनमः इति गौतमीये सर्वतन्त्रप्रयोग ।
यथा मं नमः परायजीवतत्त्वात्मनेनमः सकलव
पुषि भं नमः परायप्राणतत्त्वात्मनेनमः कंठे बं
नमः परायमतितत्त्वात्मनेनमः फं नमः पराया
हंकारात्मनेनमः पं नमः परायमनस्तत्त्वात्म
नेनमः पत्रिनयंहृदि नं नमः परायशब्दत
त्वात्मनेनमः मस्तके धं नमः परायस्पर्शतत्त्वा
त्मनेनमः मुखे दं नमः परायरूपतत्त्वात्मनेनमो

ने॰
ता॰
७२

हृदि यंनमः परायरसतत्त्वात्मनेनमः गुह्ये मं
नमः परायगंधतत्त्वात्मनेनमः पादयोः णंन
मः परायश्रोत्रतत्त्वात्मनेनमः कर्णयोः ढंन
मः परायत्वक्तत्त्वात्मनेनमस्त्वचि डंनमः परा
यनेत्रतत्त्वात्मनेनमः नेत्रयोः ठंनमः पराय
जिह्वातत्त्वात्मनेनमो जिह्वायां टंनमः पराय
घ्राणतत्त्वात्मनेनमः घ्राणयोः ञंनमः परा
यवाक्तत्त्वात्मनेनमो नेत्रयोः झंनमः पराय
पाणितत्त्वात्मनेनमः पाणयोः जंनमः पराय
पादतत्त्वात्मनेनमः पादयोः छंनमः पराय
पायुतत्त्वात्मनेनमो गुह्ये चंनमः परायउप
स्थतत्त्वात्मनेनमो लिंगे ङंनमः परायाकाश
तत्त्वात्मनेनमो मूर्ध्नि घंनमः परायवायुत
त्त्वात्मनेनमो मुखे गंनमः परायतेजस्तत्त्वा
त्मनेनमो हृदि खंनमः परायजलतत्त्वात्म
नेनमो लिंगे कंनमः परायपृथ्वीतत्त्वा
त्मनेनमः पादयोः गौंनमः इति गंबीजं हृ
त्पुण्डरीकनवं हृदि प्रविन्यसेत् हंबीजंसू
र्यमण्डलनवं हृदि प्रविन्यसेत् संबीजं चंद्र
मण्डलनवं हृदि प्रविन्यसेत् रंबीजं वह्निमं
डलनवनंत्र प्रविन्यसेत् प्रमाणम् फंनमः
परायहृत्पुण्डरीकतत्त्वात्मनेनमो हृदि हंन
मः परायद्वादशकलात्मसूर्यमण्डलत
त्त्वात्मनेनमो हृदि संनमः परायषोडशक

लाभ्यामसोममंडलतत्वात्मनेनमोहृदि रंनमः
परायदशकलाभ्यामवह्निमंडलतत्वात्मने।
नमोहृदि तथा द्विषड्गुणद्वादशकलाभ्या
मारतिदर्पणान् षंनमः परायपरमेष्ठितत्वा
त्मनेनमोवासुदेवायनमःमस्तके तथावगो
नमीये षंबीजंपरमेष्ठितत्वंवासुदेवंचमूर्ध।
नि यंबीजमथपुंस्तत्वंसंकर्षणमथोमुखे
लेरंबीजंवह्नितत्वंप्रद्युम्नंचहृदिन्यसेत् वं
बीजेनिवृत्तितत्वंचानिरुद्धमुपस्थके लंबी
जंसर्वतत्वंचपादेनारायणंन्यसेत् ह्रौंबीजं
कोपतत्वंचनृसिंहंसर्वगात्रके एवंतत्वानि
विन्यस्यप्राणायामंसमाचरेत् इत्यादि यं
नमः परायपुरुषतत्वात्मनेसंकर्षणायन।
मोमुखे लंनमः परायविश्वतत्वात्मनेप्रद्यु
म्नायनमोहृदि वंनमः परायनिवृत्तितत्वा
त्मनेअनिरुद्धायनमोलिंगे लंनमः परा
सर्वतत्वात्मनेनारायणायनमः पादयोः।
ह्रौंनमः परायकोपतत्वात्मनेनृसिंहायन
मः सर्वगात्रे फलंतुयथा तत्वन्यासेततः
कुर्यान्साधकः सिद्धिहेतवे कृतेनयेनदेव
स्यरूपतामेवयान्त्यसौ ततोयथाविधिप्रा
णायामंकृत्वापीठन्यासंविधाय केसरेषुप्र
थेचपूर्वादिक्रमेण ॐविमलायैनमः एवं
उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्वौ

ने.
मा.
७२

73

सत्याये ईशानाये अनुग्रहाये तत्पति ॐ नमो
भगवते विश्वे सर्वभूतात्मने वासुदेवाय सर्वा
त्मसंयोगयोगपद्मपीठात्मने नमः तथावति
बंधे नमो भगवते ऊर्ध्वाहि विश्वेशपर्वदेत स
र्वभूतात्मने वासुदेवायेति वदेत्ततः सर्वात्मा
संयोगपद्मयोगपद्मपदेषु नः पीठात्मने हृ
दंतो यं मंत्रमात्रादिरीरितः ततः स्वाद्विधा
सः तथया शिरसि साध्यनारायणा ऋषये न
मः मुखे गायत्री छन्दसे नमः हृदि श्रीविश्व
देवतायै नमः ततः करन्यासो क्रुद्धोल्का
य अंगुष्ठाभ्यां नमः महोल्काय तर्जनीभ्यां स्वा
हा वेगोल्काय मध्यमाभ्यां वषट् द्युल्काय
अनामिकाभ्यां हुम् सहस्रोल्काय कनिष्ठा
भ्यां फट् एवं हृदयादिषु तथावतिबंधे
क्रुद्धोल्काय हृदयायान्ते महोल्काय शिरः स्व
नम् वेगोल्काय शिखा प्रोक्ता द्युल्काय कवचे
स्व नम् सहस्रोल्काया स्त्रमकमंगल्क लिपि
यं मता ततो मंत्रेण षडंगं कुर्यात् ॐ हृदयाय
नमः ॐ शिरसे स्वाहा ॐ शिखायै वषट् ॐ
कवचाय हुम् ॐ नेत्राभ्यां वौषट् ॐ अस्त्राय
फट् ॐ नमो दक्षपार्श्वे ॐ नमो वामपार्श्वे ॐ
नमः सट् पंनास्त्राय फट् इति मंत्रेणादिग्ब
न्धनं कृत्वा मंत्रन्यासं कुर्यात् तथाव मंत्रन्यासं
ततः कुर्यात् सर्वकामफलप्रदम् येविनानम

म्पगाहृवामरं निष्कलं तथा तद्य्या ग्राथो
ॐ नमो हृदये नं नमो वक्त्रे मों नमो दोर्युगले
ने नमो रां नमः पादयोः ये नमो णां नमो ना
भौ यं नमः एवं कण्ठनाभौ हृदि ऊरुद्वयोः पा
र्श्वयोः पृष्ठे मूर्ध्नि आस्ये नेत्रयोः श्रवणयोः ।
घ्राणयोः हस्तयोः सर्वांगुलीषु तथा पादयोः
सर्वांगुलीषु च विन्यसेत् हृदये समर्यात्तथा ।
मूर्ध्नि नेत्रे आस्ये हृदि ऊरौ ऊरौ जंघायां पाद
योः गण्डयोः स्तनयोः चक्रे शंखे गदायां पद्मे ।
च विन्यसेत् ततो मूर्तिपंजरन्यासः ललाटे
ॐ अं केशवाय धात्रे नमः नाभौ ॐ आं नारा।
यणाय अर्यम्णे नमः हृदि ॐ इं माधवाय ।
मित्राय नमः गलकूपतले ॐ ईं गोविन्दाय व।
रुणाय नमः दक्षिणपार्श्वे ॐ उं विष्णवे अंश
वे नमः दक्षिणांसे ॐ ऊं मधुसूदनाय भगाय
नमः गलदक्षिणभागे ॐ ऋं त्रिविक्रमाय
विवस्वते नमः वामपार्श्वे ॐ ॠं वामनाय इंद्रा
य नमः वामांसे ॐ लृं श्रीधराय पौष्णे नमः ग
लवामभागे ॐ ॡं हृषीकेशाय पर्जन्याय नमः
पृष्ठे ॐ एं पद्मनाभाय त्वाष्ट्रे नमः ककुदि ॐ
ऐं दामोदराय विष्णवे नमः शिरसीति द्वाद
शाक्षरं न्यसेत् तथा च ललाटे केशवं धात्रा
ऊर्द्धो नारायणं पूनः अर्यम्णा हृदि मित्रेण ।
माधवं कण्ठदेशतः वरुणेन च गोविन्दं पुनर्द

क्षिणपार्श्वके अंशुना विष्णुमंसस्थे भगोतनम
धुसूदनम् गले विवस्वता युक्तं त्रिविक्रममते
नरम् वामपार्श्वस्थमित्रेण वामनाख्यमथो
सके पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतं
हृदिके शाह्वये ष्टे पद्मनाभं ततः परम् त्वष्ट्रा
दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत् द्वाद
शादित्यासे फलेमारु वैतन्यासजवपुरके
कोटितेजो धूम्रहस्थैर्वपुरादिलेसवासुदेवः
ऊर्ध्वस्थः स्तु विमलयाथ हीवक्षसिकें व्याप्नोति प्रक
टितमेत्र विप्रकीर्णम् न्यासफलेन तन्मूर्ति
पंजरं सौम्याभिहितः परमेष्ठिना सकृन्न्यासा
द्भवेन्मैत्री विष्णुरेव न संशयः मूर्तिपंजरन्या
सस्तु वासुदेवमनो रेके वर्णों क्लीबविवर्जि
तम् सरेकबिंदुयुक्तं चवर्त्यां केशवादि
कम् तथा धात्रादिकं चोक्तानामन्यासउच्य
हतः नारदीयतंत्रोडकक्रमो ग्राह्यः तत्र
केशवधातृरूपो ध्यानसहितकेशवायनमस्र
न्यादि ततः किरीटकेयूरहारमकरकुण्ड
लशंखचक्रगदाम्बुजहस्तपीताम्बरधरश्री
वत्सांकितवक्षःस्थलश्रीभूमिसहितस्वात्म
ज्योतिर्द्वयदीप्तिकायमहस्रादित्यतेजसो
नमः इति मंत्रेण व्यापकं न्यसन्मुद्राप्रदर्शय ध्या
नेक्कुर्यात् तथा च उद्यत्कोटिदिवाकराभ
निशं शंखं गदां पंकजं चक्रं बिभ्रतमिन्दिराव

समन्तीसंपोभिपार्श्वद्वयम् कोटीरांगदहारकु
ण्डलयं पीताम्बरं कौस्तुभोद्दीप्तवक्षसं चतुर्भुजं शं
वद्सिलसच्छ्रीवत्सं विष्णुं भजे एवं ध्यात्वा मा
नसैः संपूज्य शंखस्थापनं कुर्यात् ततो वैसव
पात्रं तत्र गोतमीये नामपात्रेत्त्रिविशेषविस्तार
निष्प्रयोजनम् तथैव सर्वपात्राणां मस्त्वेकमेव
प्रकीर्तितम् मत्पात्रं तत्र तथा श्रोतके सौवर्णे राज
तेन तथा पंचपात्रे हरेस्त्विदं नान्यत्र तु नियोज
येत् नैवेद्यदानेन नैव सर्वेषामपात्रे वा
ऽप्येवापके जलेदले इत्यादि ततः सामान्यपी
ठपूजां ततो विमलादिशक्तिसहितपीठपूजां
कृत्वा पुनर्ध्यात्वा आवाहनादिपंचपुष्पांजलिदा
नपर्यन्तं विधाय आवरणपूजामारभेत तथा
याकेसरेष्वग्निकोणे क्रुद्धोल्काय हृदयाय न
मः नैरृते महोल्काय शिरसे स्वाहा वायव्ये वी
रोल्काय शिखायै वषट् ईशाने द्युल्काय क
वचाय हुम् दिक्षु सहस्रोल्काय अस्त्राय फट्
ततः केसरेषु पूर्वादिक्रमेण ॐ नमः नं नमः
मों नमः नां नमः रां नमः यं नमः णां नमः यं
नमः ततो दलेषु पूर्वादिदिक्षु ॐ वासुदेवाय
नमः एवं संकर्षणाय नमः प्रद्युम्नाय अनिरु
द्धाय आग्नेयादिकोणेषु ॐ शान्त्यै नमः एवं श्रि
यै सरस्वत्यै ततः पत्राग्रेषु पूर्वादिक्रमेण ॐ च
क्राय नमः एवं शंखाय गदायै पद्माय कौस्तु

नै॰
सा॰
७५

75

भाय मुसलाय खड्गाय वनमालायै बहि
रये ॐ गरुडाय दक्षिणे शंखनिधये पद्म
निधये पश्चिमे ध्वजाय अग्निकोणे ॐ वि
घ्नाय नैरृते ॐ आर्य्याय वायुकोणे ॐ गरु
डाय नमः ईशाने ॐ सेनान्यै नमोन्तेन तद्बहि
रिन्द्रादीन्वज्रादींश्च पूजयेत् ततो धूपदीपौ
दत्वा नैवेद्यानि च दद्यात् तद्यथा नैवेद्यमा
नीय देवाय मूलेन पाद्याचमनीये दत्वा फट्
इति मंत्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्रया संरक्ष्
यमिति मंत्रेण दोषसमूहं संशोष्य रमिति मं
त्रेण संदह्य वामकरसौधरसाभिपूर्णं वमि
त्यमृतीकृत्य मूलमंत्रमष्टधा जप्त्वा धेनुमुद्र
यामृतीकृत्य गंधपुष्पे नैवेद्यं संपूज्य कृतांज
लिः संहरिं प्रार्थयेत तस्माद्वेतोसहः प्रस
रेदिति विभाव्य स्वाहा ततो निवेदनादिमं
त्रमुच्चार्य नैवेद्यं जले दद्यात् एतन्नैवेद्यममु
कदेवतायै नमः ततो नैवेद्यं हस्ताभ्यामुद्धृ
त्य ॐ निवेदयामि भवते जुषाणेदं हविर्हरे इ
ति नैवेद्यं समर्प्य अमुकदेवतायै एतज्जलम
मृतोपस्तरणमसीति जलं दत्वा वामहस्तेग्रा
समुद्रां प्रदर्श्य दक्षिणे प्राणादिमुद्रां प्रदर्श
येत् यथा ॐ प्राणाय स्वाहेति कनिष्ठानामि
केअंगुष्ठेन स्पर्शयेत ॐ अपानाय स्वाहेति त
र्जनीमध्यमेअंगुष्ठेन स्पर्शयेत ॐ समानाय

स्वाहेति सर्वांगुलीरंगुष्ठेन स्पर्शयेत् ततोंगु-
ष्ठाभ्यामनामाग्रेस्पृशन्नैवं नमः परात्मनेति
रुद्रायनैवेद्यंकल्पयामि इति नैवेद्यमुद्रां प्रद-
र्शयेन्मूलमुच्चार्यामुकदेवं तर्पयामीति चतुर्धा
समर्प्य अमुकदेवतायै एतज्जलममृतापिधा
नमसीति जलं दत्वाचमनीयादिकानि दद्या
त् नैवेद्यवत्सर्वत्र नैवेद्यदाने एष एव विधिः
ततः सामान्यक्रमेणाविसर्जनान्तं कर्म समाप-
येत् अस्य पुरश्चरणे षोडशलक्षजपः तथाच
विकारलक्षं प्रजपेन्मन्त्रमेतं समाहितः तद्द-
शांशं सर्पिषैर्जुहुयान्मधुराप्लुतैः अथ श्री
रामचन्द्रायनमः अनन्तो न्यासः सेतुबीजं ए
मायहन्मन्त्रः षडक्षरोयमादिष्टो भजतां का
मदायकः अस्य पूजाप्रयोगः प्रातः कृत्वा
दिनैत्यिकं पीठन्यासान्तं विधाय ऋष्यादि
न्यासं कुर्यात् तद्यथा शिरसि ब्रह्मणे ऋष-
ये नमः मुखे गायत्रीछन्दसे नमः हृदि रा
माय देवतायै नमः ततः करांगन्यासौ रां अं
गुष्ठाभ्यांनमः रीं तर्जनीभ्यां स्वाहा रूं मध्यमा-
भ्यांवषट् रैं अनामिकाभ्यांहुम् रौं कनिष्ठि
काभ्यांवौषट् रः करतलपृष्ठाभ्यांफट् एव
वेहृदयादिषु तथाच निबध्ये दीर्घभाजा-
सबीजेन कुर्यादंगानि षट्क्रमात् ततो मंत्र-
न्यासः ब्रह्मरंध्रे रां नमः भ्रुवोर्मध्ये रां नमः।

ने॰
सा॰
७६

76

हृदिमो नमः नाभौयनमः लिंगेनमः पाद
योःमःनमः ततोमूर्तिपंजरादिविधिंविधा
यध्यायेत् कालांभोधरकांतिकांतमनिशं
वीरासनाध्यासितं मुद्रांज्ञानमयींदधानम
परंहस्तांबुजेजानुनि सीतांपार्श्वगतांसरो
रुहकरांविद्युन्निभांराघवंपश्यंतंमुकुटांग
दादिविविधाकल्पोज्ज्वलांगंभजे एवंध्या
त्वामानसैःसंपूज्य शंखस्थापनंकुर्यात् ततः
पीठपूजांविधायवैस्वोक्तपीठशक्तीःपी
ठमन्त्रसंपूज्यपुनर्ध्यानावाहनादिपंच
पुष्पांजलिदानपर्यंतंविधायावरणपूजा
मारभेत देववामपार्श्वे श्रीसीतायैनमः अ
ग्रेशार्ङ्गायनमः दक्षिणवामपार्श्वेशराभ्यां
नमः चापायनमः ततःहृत्केसरेष्वग्न्या
दिकोणमध्येदिक्षुच ॐहृदयायनमइत्या
दिषडंगंपूजयेत् ततोदलेषुपूर्वादिक्रमे
ण ॐहनुमतेनमः ॐसुग्रीवायनमः ॐवि
भीषणायनमः ॐभरतायनमः ॐलक्ष्मणा
यनमः ॐअंगदायनमः ॐशत्रुघ्नायनमः
ॐजाम्बवतेनमः दलाग्रेषु ॐधृष्टयेनमः ॐ
जयंतायनमः ॐविजयायनमः ॐसुराष्ट्रा
यनमः ॐराष्ट्रवर्धनायनमः ॐअशोका
नमः ॐधर्मपालायनमः ॐअकोपाय
ॐभरतायनमः ॐसुमंत्रायनमः
ततइंद्रादीन्संपूजयेत् ततो

धूपादिभिस्तर्जनान्ते कर्मसमापयेत् अस्य
पुरश्चरणं बहुलं लक्षजपः तथाच उत्पल
दलैर्जपेन्मंत्रं दशांशं कमलैः शुभैः जुहुयाद
विधिवद्विप्रान्ब्राह्मणान्पूजयेत्ततः अयं वष
ड्विधः तथाच सकामः शाक्तिवाग्लक्ष्मीता
रकः पंचवर्णकः षडक्षरः षड्विधः साम्रा
ज्यवर्गफलप्रदः ब्रह्मास्त्रमोहनः शक्तिर्द
क्षिणामूर्तिरुच्यते अगस्त्यः श्रीशिवः प्रोक्ता
मनयोनुक्रमादिमे अथवाक्रमबीजादेः
विश्वामित्रो मुनिर्मतः छन्दो गायत्रीसंप्रो
श्रीरामश्चैव देवता ध्यानपूजादिकं पूर्वव
त् जानकीवल्लभायाथ भवेत्पावकवल्लभा
न्तमादिरेष कथितो रामवंशोदशाक्षरः त
थाच जानकीवल्लभं ङेन्तं वह्निजायायुङ्मादि
कम् दशाक्षरोयं मंत्रः स्याद्वसिष्ठः स्याद्दृषि
विराट् छन्दस्तु देवता रामः सीतापाणिपरि
ग्रहः आद्यं बीजं ह्रिं ठः शक्तिः कामेनांगक्रि
यामता शिरोललाटे भ्रूमध्ये तालुकंठेषु हृदय
पि नाभ्यूरुजान्वादेषु दशार्णोत्थमनोर्न्यसेत्
ततो ध्यानम् अयोध्यानगरे चित्ररत्नसौवर्णि
मण्डपे मन्दारपुष्पैराबद्धविताने तोरणांकि
ते सिंहासनसमारूढं पुष्पकोपरिराघवम्
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः सं
स्तूयमानं मुनिभिर्गेयवैः प्रशान्तम् सी

तं.
सा.
११

५७

नालंकृतेनवामांगेलक्ष्मणेनोपशोभितम् धृण
मेघ्नमनवदनेसर्वाभरणभूषितम् ध्यायेद्ब्र।
वंजपेमंत्रंवर्णलक्षमनन्यधीः वह्निनारय
णेनाक्षिजठरःकेवलश्चैव ह्यद्दशोमंत्रग।
नोयंसर्वाभीष्टफलप्रदः श्रीरामायनमश्चै
केकबीजाद्यंनराणेनोमंत्रः वन्हिर्वर्णःसप्तव
स्यात्षडर्णोवान्हिनप्रदः स्वाहांतेनोहुंफट्।
नेवामामेनोवाभवेमंत्रः नथा नारामाय
रमानेनावाक्सबीजैस्तुषड्विधः अष्टार्णम
त्रराजःस्यात्सर्वाभीष्टफलप्रदः द्यद्तरशोंड
मेंदानोमेंत्रोयेवन्तुरालरः रामायहन्मनुःश्री
केमंत्रःपंचासरःपरः पंचाशन्मातृकावर्ण
प्रत्येकपूर्वकेमंत्रः लक्ष्मीवान्ममथादिस्व
नारादिःस्यादनेकधा मेनंत्ररामायनमः
स्यादि षडक्षराञक्ष्मीलिखामादौ लक्ष्मीबी
जादीनामन्यतराद्दानेसमाक्षरः वह्निस्थेप
यनेविस्कारथंवेद्विभूषितम् एकाक्षरो
मंत्रःश्रोक्तोमंत्रराजःसुरद्रुमः ब्रह्मामुनिः
स्याद्गायत्रीछन्दोरामश्चदेवता एकाक्षरेन
पुरश्चरणेद्वादशलक्षजपः भानुलक्षंजपे
न्मंत्रमितिवचनात् अन्येषांषड्लक्षमितिवि
धानः पूजादिकंसर्वंषडक्षरवत् अथश्री
कृष्णमंत्रः गोपीजनपदस्यानेवल्लभायद्वि
रावधिः अयंदशाक्षरोमंत्रेष्टष्टफलप्रदः।

दः अथमंत्रोक्तकामबीजादिः रहितेन तत्र विधा
रेण बीजरहितेन विचारः बीजपूर्वं जपस्या
स्य रहस्यं कथितं मुने रामबीजस्य भावनाद्
प्राणद रहस्यं गते इति गौतमीयात् तथाह
ह्लोतमीये भोगमोक्षैकनिलयो रामबीजो
दशाक्षरः उद्धरेत् पृथक् तेन कामबीजमस्य
मुने तयोगात्फलदो मंत्रो नान्यथा याथा कल्प
कोटिभिः अस्य प्रयोगः प्रातः कृत्यादि पी
ठन्यासोने विधाय प्राणायामं कुर्यात् तथा
च गौतमीये एवं तत्तानि विन्यस्य प्राणायाम
त्रयं चरेत् तथा च कामबीजस्यैकवारजपेन
दक्षनासापुटेन वायुं रेचयेत् पुनः सप्तवार
जपेन वामनासया वायुं पूरयेत् ततश्च नासा
पुटाभ्यां विंशतिवारजपेन वायुं कुंभयेत्
पुनर्वामेन रेचयेत् (मबीजेनैव पृथक् कृत्वा)
दक्षया पूरयेत् उभाभ्यां कुंभयेत् तथा च
एकेन रेचयेत् कामबीजेनैव पृथक् पृथक् पू
रयेत् सप्तजपेन विंशत्यानेन धारयेत् सर्वं के
वलमंत्रेण बीजेनानेन रेचयेत् यद्वा पवनमा
यमनेत्रसूत्राचरेयमिह जन्ममसौ मन्त्रमिच्छे
ति यदि दशाक्षरं जपति तदा दशाक्षरेणा ते
त्राणां विंशत्या रेचयेत् पूरयेद्धामतत्तद्धा
रयेत् प्रमाणतः प्राणायामो भवेदेको रेचपू
रकुंभकैः अष्टादशाक्षरेणैव ष्ठादशपोर्वेस

मापयेत् प्रथममनुभिर्वर्णैरनुस्यूतमिति वचना-
त् अन्यत्र तत्तन्मंत्रवर्णैस्ताराके रेखकादित्रयं
कुर्यात् रेखये माहते दत्वया पूरयेद्वामयामा-
ध्यवार्ड्सुन पोरयेत् इत्यादि एतच्छ्रीकृष्ण
विषयम् नान्यत्र तथापीठन्यासं विधाय केश
रेषु मध्ये च विमलादिपीठशक्तीः पीठमंत्रं प्र
विन्यस्य ऋष्यादिन्यासं कुर्यात् शिरसि नारद
ऋषये नमः मुखे विराट्छन्दसे नमः हृदि
श्रीकृष्णदेवतायै नमः गुह्ये कामबीजाय नमः
पादयोः स्वाहाशक्तये नमः मंत्राधिष्ठात्र्यै दुर्गा
यै नमः इति ऋष्यादिन्यासं कुर्यात् ततः प्रणवपु
टितेन मूलमंत्रं करयोर्मध्ये पृष्ठे पार्श्वे च त्रिधा
विन्यस्य प्रणवपुटितान्मंत्रवर्णान् संविहृतेंगु
लिपर्वसु नमोंतान् विन्यसेत् दक्षिणांगुष्ठे त्रि
षु पर्वसु ॐ गों ॐ नमः दक्षतर्जन्यां ॐ पीं ॐ न
मः दक्षमध्यमायाम् ॐ जं ॐ नमः दक्षनामि-
कायाम् ॐ नं ॐ नमः दक्षकनिष्ठिकायाम् ॐ
वं ॐ नमः वामहस्तकनिष्ठायाम् ॐ ल्लं ॐ नमः
वामनामिकायां ॐ भं ॐ नमः वाममध्यमायां
ॐ यं ॐ नमः वामतर्जन्यां ॐ हां ॐ नमः वामांगु
ष्ठे ॐ हं ॐ नमः दक्षांगुष्ठे अयेन सृष्टिन्यासः
एवेन दक्षिणांगुष्ठपर्वाद्वामकनिष्ठान्तान् पुनः
सृष्टिस्थितीरिति पंचधा कुर्यात् अथ प्रातःक्षेपेन
स्थितिमात्रं कुर्यात् न्यासत्रयं सदा कार्यमथवा

मेकश्च वह्निः इति गौतमीयवचनात् ततः स्थि
तिक्रमेणांगुलिषु दक्षाणांविन्यसेत् तद्यथा
गोंनमो दक्षिणांगुष्ठे पींनमस्तर्जन्याम् जंनमो म
ध्यमायां तंनमो नासिकायां वंनमः कनिष्ठा
यां वामांगुष्ठे ह्लंनमस्तर्जन्याम् भंनमः मध्यमा
याम् यंनमः अनामिकायाम् स्वांनमः कनिष्ठा
याम् हांनमः ततः करयोः पंचांगन्यासः आव
क्रायस्वाहांगुष्ठाभ्यांनमः विवक्रायस्वाहा त
र्जनीभ्यांस्वाहा सचक्रायस्वाहा मध्यमाभ्यां व
षट् त्रैलोक्यरक्षणचक्रायस्वाहा अनामिका
भ्यां हुम् असुरांतकचक्राय कनिष्ठिकाभ्यां
फट् ततो मूलमंत्रस्फुटितां मातृकावर्णान्स्था
विंदुमातृकास्थानेषु न्यसेत् ततः प्रणवस्फु
टितं मूलमंत्रमाकेशादापादमापादाकेशं
त्रिवारं विन्यस्य संहारसृष्टिभेदेन दशतत्वानि
विन्यसेत् संहृत्यावतरणतो मंत्रवर्णः सृष्टिवर्ण
निभवेत्सृतियातः तद्यथा पादयोः गोंनमः प
राय पृथ्वीतत्वात्मनेनमः लिंगे पींनमः परा
य जलतत्वात्मनेनमः हृदि जंनमः पराय तेज
स्तत्वात्मनेनमः मुखे तंनमः पराय वायुतत्वा
त्मनेनमः शिरसि वंनमः पराय आकाशतत्वा
त्मनेनमः हृदि ह्लंनमः पराय अहंकारतत्वात्म
नेनमः भंनमः पराय महत्तत्वात्मनेनमः यं
नमः पराय प्रकृतितत्वात्मनेनमः स्वांनमः पा

नै.
मा
१५

79

रायपुरुषतत्त्वात्मनेनमः ह्रांनमः परायपरतत्त्वा
त्मनेनमः इतिसंहारक्रमः सर्वांगे ह्रांनमः प
रायपरतत्त्वात्मनेनमः ह्रांनमः परायपुरुषत
त्त्वात्मनेनमः यंनमः परायप्रकृतितत्त्वात्मने
नमः हृदि भंनमः परायमहत्तत्त्वात्मनेनमः
हंनमः परायाहंकारतत्त्वात्मनेनमः शिरसि
वंनमः परायाकाशतत्त्वात्मनेनमः मुखे वंन
मः परायावायुतत्त्वात्मनेनमः हृदि जंनमः
परायातेजस्तत्त्वात्मनेनमः लिंगे पींनमः परा
यजलतत्त्वात्मनेनमः पादयोः गंनमः परा-
यपृथ्वीतत्त्वात्मनेनमः इतिसृष्टिक्रमः ततः
षडंगन्यासः तत्राङ्गुलिनियमो निबंधे शि
रसि विहितामध्यमास्या दक्षिणतर्जनिकाविना
श्च वसिरहितांगुष्ठाज्येष्ठाविनोनापकनिष्ठि
का नाभौ वषट्नेसर्वाः सम्पायसी हृदितर्ज
नी प्रथमरहितामध्यैनाभौ श्नानाविवनाथ
मे नापवांगुलयोजावोः सांगुष्ठास्त्रपदहये
तद्यथा शिरसि ॐनमः मध्यमांगुष्ठा नेत्र-
योः पींनमः तर्जनीमध्यमाभ्यां कर्णयोर्जं
नमः अंगुष्ठरहिताभिरंगुलीभिः घ्राणे-
तेनमः अंगुष्ठानामिकाभ्याम् मुखे वंनमः
सर्वांगुलीभिः हृदि लंनमः अंगुष्ठतर्जनी
भ्याम् उदरे भंनमः अंगुष्ठमध्यमाभ्यां लिं
गे यंनमः अंगुष्ठरहिताभिरंगुलीभिः मातृ

नोः ह्रांनमः अंगुष्ठरहिताभिरंगुलीभिः पाद
योः ह्रेंनमः सर्वांगुलीभिः अयंनुसृष्टिक्रमः
अथ स्थितिक्रमः हृदि योंनमः अंगुष्ठतर्जनी
भ्याम् उदरे पींनमः अंगुष्ठमध्यमाभ्यां लिंगे
जंनमः अंगुष्ठरहिताभिरंगुलीभिः जान्वोः
नंनमः अंगुष्ठरहिताभिः पादयोः वंनमः सर्वा
गुलीभिः शिरसि ह्रांनमः मध्यमांगुल्या नेत्र
योः भांनमः तर्जनीमध्यमाभ्याम् कर्णयो
र्यंनमः अंगुष्ठरहिताभिरंगुलीभिः घ्राणेह्रां
नमः अंगुष्ठानामिकाभ्यां मुखे ह्रांनमः सर्वा
गुलीभिः लिंगेजंनमः अंगुष्ठरहिताभिः उ
दरे नंनमः अंगुष्ठमध्यमाभ्यां हृदि वंनमः अं
गुष्ठतर्जनीभ्यां मुखे ह्रेंनमः सर्वांगुलीभिः
घ्राणयोर्भांनमः अंगुष्ठानामिकाभ्यां कर्ण
योर्यंनमः अंगुष्ठरहिताभिः नेत्रयोःसोंन
मः तर्जनीमध्यमाभ्यां शिरसि ह्रांनमः मध्य
मांगुल्या पुनः सृष्टिस्थिती च कुर्यात् वैराग्य
युक्तस्य संहारेण विन्यासेन एतेन विद्यार्थि
ब्रह्मचारिणां वनस्थानां गृहस्थानां च यथाय
ति विरक्तानां च त्रिधा न्यासः तथा निबंधे
न्यासः संहारेणो मस्कुर्वैवा नसेषु विहितो
यम् स्थित्यं नो गृहमेधिषु सृष्ट्यं नो वर्णिना
मिति प्राहुः वैराग्य युक्तस्य गृहस्थस्य संहारं के
चिदाहुराचार्याः सहजानो वनवासिनि स्थि

ने॰
सा॰
८॰

८०

त्तिं च विद्यार्थिनां इष्टिम् केचित्तु न्यासमत्र ये वै
परीत्यमासनं तिनेन सर्वै रेव त्रिधा न्यासः कर्तव्यः
ग्रथ विभूतिपंजरन्यासः तत्र त्रिविधे वाद्यपरं
न्यासपरं भूत्यधिपं भूतिकरं मंत्रं दक्षिणाहस्तिम
ये गुप्ततरं गुप्ततमेः तद्यथा आधारे गों नमः ना
भौ पीं नमः ऊर्द्धो जें नमः हृदि नें नमः गले वं
नमः मुखे ह्लें नमः अंसयोः भं नमः यं नमः
ऊर्वोः स्रों नमः हों नमः ग्रीवायां गों नमो नाभौ
पीं नमः ऊर्द्धो जें नमः हृदि नें नमः स्तनयोः
वं ह्लें नमः पार्श्वयोः भं यं नमः श्रोण्योः स्रां हों
नमः शिरसि गों नमो मुखे पीं नमो नेत्रयोः
जें नें नमः कर्णयोः वं ह्लें नमो नासापुटयोः
भं यं नमः कपालयोः स्रां हों एवं दक्षिणा
करस्य मूलसंध्यग्रेषु पंच स्व दक्षिणाहस्ताग्र
लीषु च एवं वामकरस्य मूलसंध्यग्रकेषु पंच
पंच पंचांगुलीषु मूर्धि गों तन्मध्ये पीं तद्दक्षि
णे तत्पश्चिमे नें तदुत्तरे वं मूर्ध्नि सकले ह्लें भ्रु
जयोः भं यं ऊर्वोः स्रां हों शिरसि गों नेत्रयोः
पीं मुखे जें नें कण्ठे हृदि वं उदरे ह्लें मूलाधा
रे भं लिंगे यं गां गुल्फयोः जंघयोः स्रां पादयोः
हों सर्वांगेण नमो नानिन्यमेतत् ततः पूर्ववत्
मूर्तिपंजरन्यासः तद्यथा हृदि गों नमः शि
रसि पीं शिखायां जें सर्वांगे नें दिक्षु वं दक्षपा
र्श्वे ह्लें वामपार्श्वे भं कटिदेशे यं पृष्ठे स्रां मूर्ध्नि

ह्रां आचक्राय स्वाहा हृदयाय नमः विचक्राय
शिरसे सुचक्राय शिखायै वषट् त्रैलोक्यरक्ष
णचक्राय कवचाय हुम् असुरान्तकचक्राय स्वा
हा अस्त्राय फट् इति मंत्रेणादिग्बन्धनं कुर्यात्
किरीटादिकं तु सर्वत्र ततो ध्यानम् स्मरेद्वृन्दा
वने रम्ये मोहयन्तमनारतम् गोविन्दं पुण्डरीका
क्षं गोपकन्याः सहस्रशः आत्मनो वदनाम्भोजे
प्रेरिताक्षिमधुव्रताः पीडिताः कामबाणेन चि
रमाश्लेषणोत्सुकाः मुक्ताहारलसत्पीनतुंग
स्तनभरानताः स्रस्तधम्मिलवसना मदस्खा
लितभाषणाः दंतपंक्तिप्रभोद्भासिस्पंदमाना
धराञ्चिताः विलोभयंती विविधै र्विभ्रमै र्भाव
गर्भितैः फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हाव
तंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीता
म्बरं सुन्दरम् गोपीनां नयनोत्पलार्चिततनुं गो
गोपसंघावृतं गोविंदं कलवेणुवादनपरं
दिव्यांगभूषं भजे एवं ध्यात्वा मानसैः संपूज्य पु
ष्पाञ्जलिदानं कुर्यात् ततो वैष्णवे पीठमनंत पी
ठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपंचपुष्पा
ञ्जलिदानपर्यंतं विधाय देवशरीरे स्थिति
द पुष्पगन्धपञ्चाङ्गन्यासक्रमेण पूजयेत् ततो मध्ये
वेणवे नमः हृदि वनमालायै नमः ॐ कौस्तुभा
य नमः ॐ श्रीवत्साय नमः ततो परं पञ्चपुष्पा
ञ्जलिं दद्यात् तथा च गौतमीये दक्षिणे वामदे

ने. सा. ८२

वात्स्यं स्वच्छं चैतन्यमव्ययम् वामे च रुक्मिणीं
नित्यां रक्तां रजोगुणान्वितां सर्वाभरणभूष्या-
णां सर्वतो दद्यात् शुक्लचंदनपंकिलाश्चेन
तुलसी रक्तचंदनपंकिलां रक्ततुलसीमूलेन
दक्षिणवामपार्श्वयोर्दद्यात् एवं हृदये करा
वीरद्वयेन मूर्ध्नि परद्वयेन तथा तुलसीद्वयं
करवीरद्वयम् पद्मद्वयम् शिरसि दद्यात्
तथा च गौतमीये ततश्चावरणपूजा पूर्वे
दामाय नमः दक्षे सुदामाय नमः पश्चिमे वसु-
दामाय नमः उत्तरे किंकिणये केसरेषु अग्नि
कोणे आचक्राय स्वाहा हृदयाय नमः नैर्ऋ
त्ये विचक्राय स्वाहा शिरसि सुचक्राय स्वाहा
वायव्ये सोचक्राय शिखायै ईशाने त्रैलोक्यर
क्षणचक्राय स्वाहा कवचाय हुम् चतुर्दि
क्षु असुरान्तकचक्राय स्वाहा अस्त्राय फट्
ततः पत्रेषु पूर्वादिक्रमेण रुक्मिण्ये सत्य-
भामायै नाग्नजित्यै मित्रविन्दायै सुभद्रायै
जाम्बवत्यै सुशीलायै पत्राग्रेषु पूर्वादिक्रमे
ण वासुदेवाय देवकीनन्दाय यशोदायै ब
लभद्राय सुभद्रायै गोपालादींश्च पूजयेत्
तद्बहिर्मध्ये च पूर्वादिक्रमेण ओं मन्दाराय न
मः ओं संतानकाय ओं पारिजाताय ओं कल्प-
वृक्षाय ओं हरिचंदनाय तद्बहिः इंद्रादीन्व
ज्रादींश्च पूजयेत् ततः कुमाराष्टकं च पूजयेत्

ओं कृष्णाय नमः एवं वासुदेवाय देवकीनन्द-
नाय नारायणाय यदुश्रेष्ठाय वार्ष्णेयाय
धर्मसंस्थापकाय असुराक्रान्तभावहारिणे य-
हेन्द्रांविन्द्रादीन्पूजयेत् तथा च गौतमीये अथ
वांगादिकान्तिभिस्तद्धैरपि वाचयेत् एवंचा-
भ्यर्चयेत्कृष्णं काममहोऽम्बुभाननम् एतय-
जनेष्टाकक्षेन् कृष्णाष्टकेन पूजयेत् ततोऽथ-
पादि विसर्जनांतं कर्म समापयेत् असमाश्र-
याणोदृष्टलदाः तथा च दृष्टलदमदयफ-
लप्रदं मन्त्रप्रतिज्ञाप्य निर्मलपतिर्दृष्टाद्रसम
नरुयास्सिनाममध्यस्थैर्नैवैरक्षणाम्बुजै-
दनवेहदृष्णायुतम् अथ सुखिरस्तु गालवर्णवि
मन्त्रेपवलदम् अमलमनिरलाभमायसे-
स्तुनानांसस्मिनच्छन्नसिसिकैरारभेत्कर्म होमं
दृष्टाद्दरादौ श्रीमायाकामः मायाश्रीकामः
कामोमायाश्रीरितित्रिधात्रयोदशाक्षरोभ-
वति तथा च श्रीशक्तिमारपूर्वश्च शक्तिश्री
मारपूर्वकाः कामशक्तिरमापूर्वो दशार्णोम-
नवस्त्रयः इति सनत्कुमारकल्पोक्तेः एतेषां
प्रमाप्रयोगः प्रातः कृत्यादि वैसवोक्तपीठ
न्यासं विधाय ऋष्यादिन्यासं कुर्यात् यथा।
शिरसि नारदऋषये नमः मुखे गायत्री छ-
न्दसे नमः हृदि श्रीकृष्णदेवतायै नमः ततः
करांगन्यासौ आचक्रायस्वाहा श्रीं गणाध्यानं।

ते
सा:
८२

मरुत्यादिदृग्गान्तावत् ततः फलार्थी चेत् द
ष्टुतत्रमूर्तिपंजरं न्यसेत् ततः किरीटमंत्रेण
व्यापकं कृत्वा यथाशक्ति मुद्रां बद्ध्वा ॐ नमः
सुदर्शनायास्त्राय फट् इति मंत्रेण दिग्बंध
नं विधाय ध्यानं कुर्यात् आद्ये सतोरणाद
रवद्ध्याने द्वितीये रत्नाभिषेकवत् तृतीये
तुध्याने शंखचक्रधनुर्बाणपाशांकुशधरे
हस्ताः येनं दमोदरं दोर्भ्यां ध्येयः कृत्स्नादिवा
करे गौतमीये दृग्गान्तरवद्ध्यानम् तथा च र
मादिकाम्रादि मंत्रद्वयमप्यधिकृत्य अनयोर्मं
त्रयोर्मंत्री आवकाद्यैः षडंगकम् कुर्याद्दृग्गा
र्णवत्सर्वं ध्यानपूजादिकं सुधीः एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनं कुर्यात् वैष्णवो
क्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पं
चपुष्पांजलिदानपर्यंतं विधाय पूर्वोक्तवेद
एवादिपूजां कृत्वावरणपूजामारभेत अस्या
वरणादि अंगं इन्द्रवज्रादीन् ततः कृत्स्नाष्ट
केन संपूज्य धूपादि विसर्जनांतं कर्म समाप्या
येत् एतेषां पुरश्चरणं पंचलक्षजपः तथा
च पंचलक्षं जपेन्नावदयुतं पायसेन तु हुत्वा
यपरं मामाभ्यसो विदाय ततः परम् गोपीज
नपदस्यान्ते वल्लभाय द्विठावधिः कामबी
जादिराख्यातो मनुरष्टादशाक्षरः अस्यपूजा
प्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठमंत्रं

विन्यस्य ऋष्यादिन्यासं कुर्यात् यथा शिरसि
नारद ऋषये नमः मुखे गायत्री छन्दसे नमः हृ
दि श्रीकृष्णदेवतायै नमः गुह्ये क्लीं बीजाय न
मः पादयोः स्वाहा शक्तये नमः ततः प्रणवपु
टितं मंत्रं त्रिधाः करयोर्व्यापकं करोन्यासं कु
र्यात् क्लीं कृष्णाय अंगुष्ठाभ्यां नमः गोविंदाय तर्जनी
भ्यां स्वाहा गोपीजन मध्यमाभ्यां वषट् वल्लभा
य अनामिकाभ्यां हुम् स्वाहा करतलपृष्ठाभ्यां
फट् ततो मूलेन मूर्धादिपादपर्यंतं त्रिर्व्या
पकं न्यसेत् ततो नयनमुखहृदयगुह्यांघ्रिषु मं
त्रस्य पदपंचकेन मोनेन्यसेत् पदपंचकेन चतु
र्थ्यंतस्वाहाद्यम् ततोंगन्यासम् हृदयाय क्लीं
कृष्णाय नमः गोविंदाय शिरसे गोपीजन शि
खायै वल्लभाय कवचाय स्वाहा अस्त्राय फट् त
तो दशमूर्तिन्यासं पंजरन्यासं विधाय किरीटमं
त्रेण व्यापकं विधाय यथाशक्ति मंत्रो बह्वा ॐ
नमः सुदर्शनाय अस्त्राय फट् इति मंत्रेण दि
ग्बंधनं कृत्वा दशाक्षरोक्तं ध्यानं कृत्वा मानसैः
संपूज्य पूर्णावस्थापनं कुर्यात् ततो वैष्णवीकपी
ठमंत्रं विधाय क्लीं इत्याद्यष्टादशांगोपन्या
सक्रमेण संपूज्य पंचपुष्पांजलीन्दद्यात् ततो
वेणवादिपूजनं कृत्वा दशाक्षरोक्तावरणपूजां
च कृत्वा धूपादिविसर्जनांतं कर्मसमापयेत् अ
स्याष्टादशार्णे दशार्णवत्पटलक्रमम् प्राक्तिश्रीपूर्वं

कोथ्याष्टादशाक्षरो विंशार्णकः श्रस्यमृताम्
योगः प्रातःकृत्यादि वै स्वैवात्कपीठमवंते पी
ठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् शिरसि
ब्रह्मणे ऋषये नमः मुखे गायत्री छन्दसे नमः
हृदि कृष्णाय देवताये नमः गुह्ये क्लीं बीजाय नमः
पादयो स्वाहा शक्तये नमः ततः करांगन्यासो
ह्रीं श्रीं क्लीं अंगुष्ठाभ्यां नमः कृष्णाय तर्जनीभ्यां
स्वाहा गोविंदाय मध्यमाभ्यां वषट् गोपीजन अ
नामिकाभ्यां हुम् वल्लभाय कनिष्ठाभ्यां वौषट्
स्वाहा करतलपृष्ठाभ्यां फट् ततो मंत्रन्यासः मू
र्ध्नि ह्रीं नमः कपाले श्रीं नमः भ्रूमध्ये क्लीं नमः
नेत्रयोः कृं नमः कर्णयोः ष्णं नमः नसोः यं नमः
वदने गों नमः चिबुके विं नमः कंठे दां नमः
दोर्मूले यं नमः हृदि गों नमः उदरे पीं नमः ना
भौ जं नमः लिंगे नं नमः आधारे वं नमः कट्यां
ल्लं नमः जान्वोः भां नमः जंघयोः यं नमः गुल्फ
योः स्वां नमः पादयोः हां नमः इति सृष्टिः हृदि
ह्रीं नमः उदरे श्रीं नमः नाभौ क्लीं लिंगे कृं आधा
रे ष्णं कट्यां यं जान्वोः गों जंघयोः विं गुल्फयो
र्दां पादयोः यं मूर्ध्नि गों कपोलयोः पीं भ्रूमध्ये जं
नेत्रयोः नं कर्णयोः वं नसोः ल्लं वदने भां चिबुके यं कं
ठे स्वां दोर्मूले हां इति स्थितिः पादयोः ह्रीं नमः गु
ल्फयोः श्रीं जंघयोः क्लीं जान्वोः कृं कट्यां ष्णं
आधारे यं लिंगे गों नाभौ विं उदरे दां हृदि यं दो

मूले गं कण्ठे पीं चिबुके जं नेत्रयोर्नं भं कर्ण
योः हं नेत्रयोः भं भ्रूमध्ये यं भाले रां मस्तके
ह्रां मन्त्रन्तिसंहारः पुनः ऋषिछिन्नीव कृत्वा
मूर्त्तिपञ्जरं विन्यस्य षडङ्गानि समाचरेत् श्रीं।
श्रीं ह्रीं हृदयाय नमः इति षडङ्गानि विन्यसेत्
ततः पूर्ववन्मुद्रां बद्ध्वा कीरीटमुद्रां च बद्ध्वा ध्या
येत् ध्यानं यथा उद्यद्व्योमसहस्रार्कभासुरे
भवनोत्तमे: अनल्पैकलस्वर्द्देवस्परीतेमणि
मण्डपे ज्वलद्रत्नमयस्तम्भद्वारतोरणाकु
स्के फुल्लस्रगुल्लसच्चित्रवितानालम्बि।
मौक्तिके पद्मरागस्थलीराजद्रत्नवेद्योश्च
मध्यतः अनारतगलद्रत्नधारास्यसलरो।
थः रत्नप्रदीपावलिभिः प्रदीपितदिगन्तरे
उद्यदादित्यसंकाशमणिसिंहासने शुभे स
मासीनो चतुर्ध्यायेद्द्रुतकांचनसन्निभः स
मानोदितचन्द्रार्कतडित्कोटिसमद्युतिः स
र्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः पीत
वासाः शङ्खचक्रगदापद्मोज्ज्वलत्करः अना
रतोच्छलद्रत्नधारौघकलशं स्पृशान् वाम
पादाम्बुजाग्रेण मसांतपल्लवस्य विं रुक्मि
णीसत्यभामेस्य मूर्ध्नि रत्नौघधारया सिंचंत्यौ
दक्षवामस्थे सैरोम्यकमलोद्ये नाग्नजितीसु
नन्दाया दिपोत्पौ कलशौ तयोः नाम्यां वद
द्वामस्थे मित्रविन्दा सहस्तदला रत्नवद्योःस

तं.
रा.
८४

मदूर्मत्तघूर्णौविदौनयोः जाम्बवतीलक्ष्मी
लावदिशौ तौ दक्षवामके बहिः षोडशसा
हस्रसंख्याताः पत्निः स्त्रियः ध्येयः कनक
रत्नौघधारयाकमलोज्ज्वलाः तद्बहिश्चाष्ट
निधयः पूरयंतोधनैर्धराम् तद्बहिर्वृष्ण
यः सर्वे पुरोवश्रमहादयः एवंध्यात्वामान
सैः संपूज्यपंचविध्यापनं कुर्यात् तत्सपूजा
यंत्रम् अष्टकोणमध्ये षट्दलं पद्मं विलिख्य
षट्कोणमध्ये कामबीजं विलिख्य तं शिष्टैः
समभिवेष्टयेत् ततः षट्कोणस्याग्रहे
निलकोणेषु श्रीबीजं शिष्टेषु भुवनेश्वरीं।
विलिखेत् ततः षट्संधिषु क्लीं कृष्णायन
मइति षड्वर्णान् लिखेत् ततः केसरेषु का
मदेवाय विद्महे पुष्पबाणाय धीमहि तन्नो
नगः प्रचोदयात् त्रीणि त्रीणि पदवर्णानि पू
र्वादिक्रमेण लिखेत् ततः पत्रेषु पूर्वादि
नमः कामदेवाय सर्वजनप्रियाय सर्वसं
मोहनाय ज्वल २ प्रज्वल २ सर्वजनस्यहृद
यं ममवशं कुरु २ स्वाहा इतिमालामंत्रस्य
षट् षड्वर्णान् दलेषु विलिखेत् तद्बहि-
मातृकया संवेष्टयेत् ततो भूबिंबे दिक्षु श्री
बीजं विदिक्षु मायाबीजं विलिखेत् बाह्ये
ष्ववज्राणि तथाच विलिख्य गंधपंकेन लि
खेत्पट्टलाम्रजेन कीर्णाकार्यात्र षट्को।

णो समाग्नेन्त्रमन्मथम् शिष्टैस्तैः समदशाभि
रक्षरैर्वेष्टयेत्स्मरम् प्राग्रक्षोनिलकोणेषु श्रि
येशिष्टेषुमं विदम् षडक्षरं षडस्रसन्धिषु केसरे
षु त्रिशस्त्रिशः विलिखेत्स्मरगायत्रीमाला
मंत्रं दलाष्टके षट्शः सौलिखेत्तद्वहिर्वेष्टये
न्मातृकाक्षरैः भूबिम्बं विलिखेद्वाह्ये श्रीमा
येदिग्विदिक्षु च भूगृहं चतुरस्रं सादष्टवज्र
विभूषितम् एतद्यंत्रमष्टादशार्णदशाक्षरदशा
र्ण विंशार्णद्वाविंशार्णदशचतुर्दशार्णक
रैकादशाक्षराणामभिनियोगानमीये पद्ममष्टपत्रं
श्रीवचतुरश्रं सलक्षणम् चतुर्दशाक्षरमायुक्ते
कामगर्भितकर्णिकाम् समाप्यंत्रमुद्दिष्ट
मष्टादशाक्षरेष्मरण चतुरश्रं चतुर्द्वारं पद्मम
ष्टदलान्वितम् षट्कोणं कामगर्भाख्यं समन्
दशार्णविष्ठितम् षडक्षरमनुवरं षट्कोणो
विलिखेन्नतः इतिपद्दिष्टाषयंत्रमुक्तं नदश
कविषयम् ग्रन्थानुतामिन्यादेवविवेशेयस्या
न् ततः पीठमन्त्रं पीठपूजां विधायपद्दिष्टं
श्यतिं षडंगं च संपूज्य ॐ कीरीटाय नमः एवं
कुण्डलाभ्यां नितम्बे पीतवस्त्राय चक्राय पा
ञ्चजन्याय गदायै पद्माय वनमालायै श्रीवत्साय
कौस्तुभाय प्रणवादिनमोन्तेन पूजयेत् पुनः
पंचपुष्पांजलीन्दत्वा वरणपूजामारभेत षट्
कोणाव्याप्यादिक्रमेण ह्रीं श्रीं क्लीं हृदयाय नमः

नं·
सा·
५५

965

कल्लायशिरसेइत्यादिपूजयेत् ततोविदि
क्षुत्वस्यमूले ॐवासुदेवायनमः एवंसंकर्ष-
णायइत्यादिप्रणवादिनमोन्तेनपूजयेत् प
वेदिक्पत्रमूलेषु ॐश्रांश्रियैनमः श्रियैलक्ष्म
म्यै रत्यै पत्रेषुपूर्वादिक्रमेणपूर्ववद्धक्तिएपा
द्याःपूजयेत् अग्रेषोडशसहस्रमहिषीभ्यो-
नमः तद्बहिःपूर्वादि ॐइंद्रनिधयेनमः ए
वंनीलनिधये मुकुन्दनिधये मकरनिधये
आनंदनिधये कच्छपनिधये शंखनिधये
पद्मनिधये तद्बहिरिन्द्रादीन्वज्रादींश्चपूज-
येत् ततोधूपादिविसर्जनान्तंकर्मसमापयेत्
अस्यपुरश्चरणेचतल्लक्षजपः तथाच ध्यात्वै-
वंपरमात्मानंविष्णुंत्र्यर्णमनुंस्मरेत् चतुर्लक्षं
ऊनेदाल्येश्वतारिंशात्सहस्रकम् वाग्भवंका
मबीजंचकृष्णायपदंततःस्त्रीम् गोविंदायर
मागोपीजनवल्लभेत्यनेनमिरः चतुर्दशाक्ष
रोपोक्तः .... द्वाविंशत्यक्ष
रोमंत्रोवाणीशक्तिप्रदायकः अस्यपूजाप्रयो
गः प्रातःकृत्यादिवेसबोकपीठमन्त्रान्तंपी
ठन्यासंविधाय अष्टादशाक्षरवत्ऋष्यादिन्यास
करन्यासौविधायमुद्राद्विग्बन्धनंकृत्वा
ध्यायेत् तद्यथा वामोर्ध्वहस्तेदधतेविद्यास
र्वस्वपुस्तकम् अक्षमालांचदक्षोर्ध्वेस्फाटिकीं
मातृकामयीं शब्दब्रह्ममयंवेणुमधःपाणि

हृदयंगमम् ध्यायेत्तं पीतवसनं श्यामलं कोमल
च्छविम् बर्हिबर्हकृतोत्तंसं सर्वं तं सर्ववेदिभिः
उपासितं मुनिगणैरुपनिषद्भिर्हरिं सदा एवं ध्या
त्वा विंशत्यर्णवन्स्तु जपेत् विशेषस्तस्य षिस्य
स्याः पूजनेनास्ति अस्य पुरश्चरणं वन्नलेदः व
लेदं जपेन्मंत्रं सहस्रं मंत्री समेयतः पलाशपुष्पैः
सुप्रोक्षैश्चत्वारिंशत्सहस्रकम् जुहुयात्कर्म
णानेन मंत्रः सिद्धो भवेद्ध्रुवम् वाग्भवं कामबी
जं च मायां लक्ष्मीमनेन तोम् दशार्णो मन्त्रवैनै
स्य भवेत्कल्पद्रुमः परः अस्य पूजाप्रयोगः प्रा
तः कृत्यादि वैष्णवोक्तपीठन्यासं कृत्वा ऋष्या
दिन्यासं कुर्यात् तद्यथा शिरसि ब्रह्मणे ऋषये
नमः मुखे गायत्रीछन्दसे नमः हृदि कृष्णा
य देवतायै नमः न्यासपूजाजपहोमादिस
र्वं दशार्णवत् ध्याने तु विशेषः ध्यायेद्बृ
न्दावने रम्ये कांचनभूमिमध्यगे नानापुष्प
लताकीर्णे हृदंबंधैश्च मंडिते कल्पाटवीतले
सम्यक्क्रीमन्माणिक्यमण्डपे नारदाद्यैर्मुनि
श्रेष्ठैः स्तवद्भिः परिवारिते रत्नसिंहासने ध्या
येदुपविष्टाम्बुजोपरि सजलजलदप्रभं
त्पद्मनिभेक्षणम् रक्तपद्मप्रभपादपाणि
म्भोपरिमंडितम् नवरत्नसमारब्धभूषणैः प
रिभूषितम् श्रीयुक्तवक्षसि श्रीवत्सकौस्तु
भोद्भासितांबरम् तारहारावलीरम्यग्रीव

ते॰
सा॰
८६

सोक्तिनवदनम् रोचनातिलकश्रोत्रे शोभया
भ्रमरायितम् कन्दर्पचापसदृशभ्रूविभ्रमाला
विराजितम् अनेकरत्नसंरब्धस्फुरन्मकरकु
ण्डलम् वर्हिवर्हकृतोत्तंसं सर्वतः सर्ववेदि
भिः उपासितम्सुरागणैस्तोरूपमतिच्छेडुरिंसदा
इतिध्यानम् अनयासर्वदृशाद्रावयत् कामा
त्वरंयशसस्थशोभितिबिंदुविभूषितम् त्रैलो
क्यमोहनोविश्वः कथितस्तवयत्नतः अस्य
पूजाप्रयोगः अतः कल्पादिवैस्तवोक्तपीठ
शक्तिपर्यंतं विन्यस्य तदुपरि पद्मराजायर
वाहायेतिपीठमन्त्रं न्यसेत् ततः ऋष्यादि
न्यासः तद्यथा संमोहनऋषयेनमः शिर
सि गायत्रीछन्दसेनमोमुखे त्रैलोक्यमो
हनायविश्वदेवतायैनमः हृदि ततः क
रन्यासौ क्लींअंगुष्ठाभ्यांमित्यादिनाव त
थावतिबंधे दीर्घषट्कसंयुक्तनाद्येनकामबी
जेनकल्पयेत् ततो बाणन्यासः क्लींशोषण
बाणायनमः एवंततोन्यासेषु क्लींसम्मोह
न क्लींसंदीपन क्लौंतापन क्लौंमदन न्यासे
तु सर्वत्र बालप्रयोगः तथाच मस्तकमुख
हृदयलिंगपादेषु नाम्न्यसेत् ततोध्यायेत्न म
णविद्रुमसंकाशं सर्वतेजोमयंवपुः किरीटि
नं कुण्डलिनं केयूरवलयान्वितम् मुक्तास
रत्नसन्नद्धं त्रैलोक्यकोटिसंमुज्वलम् नाना

लंकारसुभगं पीताम्बरयुगावृतम् गरुडो
परिसन्नद्ध रत्नपंजरमध्यगम् अनमहेमसंका
शं लक्ष्मीवामोरुसंस्थितम् सर्वालंकारसु
भगं शुक्लवासोयुगावृतम् सकामो लीलया
देवीमोहयंतं पुनः पुनः शंखचक्रगदापद्म
पाण्यो ऋष्यथनुःशराम् धारयंतं जगन्नाथं र
क्षमार्हणोद्भवम् एवं ध्यानावाहनैः संपू
ज्य शंखस्थापनं विधाय न्यासक्रमेण पीठा
पूजां कृत्वावाहनादि पंचपुष्पांजली दत्वान्या
सक्रमेण शरीरे बाणान्संपूज्य ओं किरीटाय
नमः एवं कुण्डलाभ्यां मूर्ध्नि कर्णयोः शंखा
य चक्राय गदायै पद्माय पाशाय अंकुशा
य धनुषे शराय हस्तेषु पूजयेत् स्तनाधे
श्रीवत्साय कौस्तुभाय गले वनमालायै
नितम्बे पीतवसनाय वामांगे लक्ष्म्यै नमः
ततः केसरेषु अग्न्यादिकोणमध्ये दिक्षु च
क्रों हृदयाय नमः इत्यादिना पूजयेत् ततः पू
र्वादिदिक्षु बाणेन पूजयेत् केसरेषु पंचबाणं
पूजयेत् पत्रेषु पूर्वादिदिक्षु ओं लक्ष्म्यै नमः
एवं सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै कान्त्यै तुष्ट्यै
पुष्ट्यै नमः ततो हि लोकपालान्पूजयेत् ना
वेद्यादिपूजनं कुर्यात् ततो धूपादि विस
र्जनांतं कर्म समापयेत् अस्य श्रवणात्फलादा
पालनतत्परः तथा च रविलक्षणमंत्रेण

कुर्यात् दशांशतः अथ मन्त्रयसिक्तेन पाय-
सेन विधानवित् अथवा रविसाहस्रं कृत्वानेत्रा
वश्च तर्पयेत् कामबीजे हृषीकेशाय हृन्म
त्रो द्वादशाक्षरः अस्य विधानं पूर्ववत् लक्ष्मी-
मायाकामबीजैर्ङेन्ते कमलापदं तथा स्वाहेति
मंत्रराजोयं जनतोसुरपादपः अथ पूजाप्रयोगः
प्रातः कृत्यादि वैष्णवोक्तपीठमन्त्रेण विन्यस
ऋष्यादिन्यासं कुर्यात् तद्यथा शिरसि नार
दऋषये नमः मुखे त्रिष्टुप्छन्दसे नमः हृ
दि श्रीकृष्णदेवतायै नमः ततः करांगन्यासौ।
क्लीं हृदयायेत्यादिना ततो ध्यानम् कलाय
कुसुमश्यामं वृन्दावनगतं हरिं इत्यादिना ध्या
त्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्।
ततो वैष्णवोक्तपीठमन्त्रेण पीठं संपूज्य पुन
र्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं
विधाय आवरणपूजां कुर्यात् तद्यथा केसरे
षु अग्निनैरृतिवायवीशानकोणेषु मध्ये दि
क्षु च क्लीं हृदयायेत्यादिना पूजयेत् तद्बहि
रिन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिवि
सर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं वत्
लक्षजपः तथा च ध्यात्वैवं परमात्मानं वत्
लक्षं मन्त्रं जपेत् दशांशं जुहुयान्मंत्री कुसु-
मैर्बिल्वदलैः श्रीशक्तिस्मरकृष्णाय गो
विंदाय द्विठो मनुः अस्य पूजाप्रयोगः प्रातः

क्त्वादिपीठमवंनेपीठन्यासंविधायरत्नाभि
षेकवदृष्यादिन्यासंविधायकरन्यासंकुर्या
त् तद्यथा श्रींअंगुष्ठाभ्यांनमः क्लींतर्जनी क्लीं
मध्य कृष्णायअना गोविंदायकनि स्वाहा
करतल एवंहृदयादिषु ततोमूर्तिपंजरा।
न्यासंविधाय विष्णुपर्णोक्तध्यात्वा तद्विधा
नेनपूजयेत् विशेषवस्तुस्थितिक्रमेण
योजयेत् तद्गुणोस्मभवान् अस्यशुश्रूषणे
जयोहोमः तारंहृद्भगवतीरुक्मिणीवल्लभा
यद्वयम् अस्यपूजाप्रयोगः प्रातःकृत्या
दिवैष्णवोक्तपीठमवंनेपीठन्यासंविधाय
ऋष्यादिन्यासंकुर्यात् शिरसिनारदऋषये
नमः मुखेअनुष्टुप्छन्दसेनमः हृदिरुक्मि
णीवल्लभायदेवतायैनमः ततःकरन्या
सं ॐअंगुष्ठाभ्यांनमः नमस्तर्जनीभ्यांस्वा
हा भगवतीमध्यमाभ्यांवषट् रुक्मिणीव
ल्लभायअनामिकाभ्यांहुम् स्वाहा कनि।
ष्ठाभ्यांवौषट् एवंहृदयादिषु ततोध्यानं
ध्यानंध्यावेति एवंमानसैःसंपूज्य वैष्णवो
क्तपीठमवंनेपीठपूजांविधायपुनर्ध्या।
त्वावाहनादिपंचपुष्पांजलिदानपर्यंतंवि
धायावरणपूजामारभेत अग्निनिर्ऋति।
वायीशानकोणेषुदिक्षुच ॐहृदयायेनमः
इतिपूर्ववत् ततोष्टदलेषुपूर्वादिक्रमेण

गो.
स्ता.
८८

..........यनमः जिह्वं निषण्णं उद्धतं दाहकं
द्वौर्यं विश्वकेसेनं च पूजयेत् अग्रे विनतासुताय
नमः तद्दक्षिणे द्वांद्वीन्चत्वारो दीक्षसे पूज्य धूपदीपा
दिविसर्जनान्तं कर्म समापयेत् अस्य ष्टरस्वरणां
लद्रसंख्यानपः तथाच ध्यानेवेदं किंणोना
यं जपेछतमसंमतं समिद्भिर्जुहुयाद्द्वाहेव
हरोमधुरत्रुतैः श्रीशक्तिकामपूर्वो गंजत्वपा
किरमंतिकः दशाक्षरःस्यवाक्सा वादेष
किरमावितः अनयोरुष्यादिपंचांगानिद
ष्यादस्वत विंप्रान्पौंणकवन्यजोक्तयोन्
ध्यानंत्र वरदाभयहस्ताभ्यांश्लिष्यंतं स्वांगेन
श्रियम् .... गो
त्रलम् अनयोःपुरश्चरणान्त दशलक्षंजपेद्द
शैलसहस्राणिहोमयेत् प्रणवं मनसायुक्तं
कलगोविन्दकोनया श्रीपूर्वोड़ेनातुसार्यं
हुंफट्स्वाहेतिकीर्तयेत् अस्य नारदऋषिः अ
नुष्टुप्छन्दः परमात्माहरिर्देवता आचक्रा
द्यैरंगकल्पना दशार्णवदस्यजपपूजाहोमा
दयः बीजशक्तीवनन्तस्मे अथवा गोपालमं
त्रः चक्रीवह्निस्थवामाक्षितः मधीकामकलाकाम
कलायनमोन्तः कामकलायस्वाहा गोपाला
यस्वाहा कामबीजकलायकामबालवपुषे
कलायठद्वयम् बालवपुषेकामबीजकला
यस्वाहा कामबीजत्रैलोक्यकामबीजप्राप्यमलोगाय

नमः दधिभक्षणाय ठठ इयम् सुप्रसन्नाभिनेहृ
दयम् कृष्णगोविंदकौ ईं गो नौ कामार्थी श्री
प्राप्तिकामः कृष्णायस्मारः एतेषां यंत्रं अष्टदल
पद्मं भूपुरं हृन्नमध्यस्थम् कामबीजं।
नध्याच गोजनमीये पद्ममध्ये दैपलाश्रं जवचव
श्रेष्ठलक्षणाम् चन्द्रौरसमाप्तकं कामगाभि
तकर्णिकम् अथ पूजाप्रयोगः प्रातः कृत्या
दिवैस्मवोक्तपीतपीठमवंतं पीठन्यासंविधा
य ऋष्यादिन्यासं कुर्यात् शिरसि नारद ऋषये
मुखे गायत्रीछन्दसे हृदि कृष्णाय देवतायै
ततः करांगन्यासौ क्लीं अंगुष्ठादिन्यासः एवं
हृदयादिषु पूर्ववन्मन्त्रं पदपूर्वं ध्यानं कुर्यात्
अव्याहः केषवीलाम्बुजरुचिरकृणामर्मांजनेभौ
मुजश्चौबालांजवाकरीरस्पलिककलितनरणाकिं
किणीकोमलकंठः दोर्भ्यां हैयंगवीनं दधदति
विमलंपायसं विश्ववंद्यो गोगोपीगोपवीतो
रुणावेन विलसत्कण्ठभूषश्चिरं नः एवं ध्या
नामानसैः संपूज्य शंखस्थापनं कुर्यात् ततो वै
सवोक्तपीठमवंतं पीठं संपूज्य पुनर्ध्यात्वा वा
हनादि पंचपुष्पांजलिदानपर्यंतं विधायावर
णपूजामारभेत अग्न्यादिकोणचतुष्टये षुन
ध्योरिदलव क्लीं हृदयाय नमः इत्यादिना संपूज्ये
न्द्रादीवज्रादींश्च पूजयेत् ततो धूपादि विसर्ज
नांतं कर्म समापयेत् एतेषां प्रयोगपलत्वनमः

तं॰
सा॰
८५

तथाच ध्यानैवमेवमेतेषां स्वदेतस्मात्मनंततः
सर्पिस्सितेनाप्लैर्मोतोः पायुसैरयुतैर्हरेत् का
मयोरंतः कुस्तुपदंमंत्रोयंसद्यः फलप्रदः ॥ अ
पूजाप्रयोगः प्रातः कृत्यादि वैश्वदेवाकपीठस
वेतं विधाय पूर्ववदृष्यादिन्यासकरांगन्यासौ
कृत्वा ध्यायेत् यथा श्रीमत्कल्पद्रुमूलोद्गल
कमललसत्कर्णिकासंस्थितो यस्तत्त्वाबो
लक्ष्मिपद्मोदरविसरदसंख्योनरत्नाभिषेकः
हैमभस्मप्रभाभिस्त्रिभुवनमखिलं भासयन्वा
सुदेवः पायाद्वः पायसादेनवरजनवनीता
स्तनाशीवपीसः एवंध्यात्वामानसैः संपूज्य
शंखस्थापनं कुर्यात् ततो वैश्वदेवाकपीठमर्व
नं विधायावरणपूजामारभेत पूर्ववदग्न्या
दिकोणेषु मध्ये दिक्षु च क्रोंहृदयाय नमः इ
त्यादिना पूजयेत् पत्रेषु पूर्वादिक्रमेण वृ
तियोनिं संपूजयेद्वादीन्वज्रादींश्च पूजयेत् ततो
धूपादि विसर्जनांतं कर्म समापयेत् अस्य पुर
श्चरणं चतुर्लक्षजपः तथाच ध्यानैवं प्रजप
स्वदेववत्सकं तु कुर्याज्ञतः त्रिमध्वक्तैर्बिल्वफ
लैश्चत्वारिंशत्सहस्रकम् अस्य मंत्रस्य कामबी
जस्य ककारलकारयोरंते रेफश्चेन्दादामंत्रचू
डामणिः पूर्ववदृष्यादिन्यासं कृत्वा करांगन्या
सौ कुर्यात् तद्यथा करालोग्रंगुष्ठाभ्यां नमः इ
त्यादि अस्य पूजादिकं सर्वं पूर्ववत् ध्यानेन वि

शेषः अथास्य ध्यानं कल्पद्रुमतलविलसद्र-
त्नशैलाधिरूढं गोपीभ्यां श्रेयमाणं विकसित
नवबन्धूकसिंदूरभासम् बालं नीलालकान्तं क
टितटविलसद्दुकूलं ... वन्दे पूर्णेन्दु
लकान्तं कपालसिनगलाकल्पदीप्तं मुकुन्दम्
ध्यात्वैवं पूर्वबीजेनं नमस्कारकोपसैनैवैः मधुर
यनैर्दैवासंनध्यामपर्वयेद्धरिम् प्रणवोहृद्भ
गवते वासुदेवाय कीर्तितः प्रधानं वैसवेनं
मंत्रोयं कल्पपादपः अस्य पूजाप्रयोगः प्रातः
कृत्वादि पीठमवेनं विन्यस्य पीठन्यासे ऋष्या
दिन्यासं च कुर्यात् शिरसि प्रजापतये ऋषये
नमः मुखे गायत्री छन्दसे नमः हृदि वासुदेवा
य देवतायै नमः ततः करांगन्यासो ओं अंगुष्ठा
भ्यां नमः नमस्तर्जनीभ्यां स्वाहा भगवते मध्य-
माभ्यां वषट् वासुदेवाय अनामिकाभ्यां हुम्
नमस्तेकनकनिष्ठाभ्यां फट् एवं हृदयादिषु न
तो मंत्रन्यासः मूर्ध्नि भाले दृशोः नासोगले दो-
हृदयाविते ऊरौ नाभौ ध्वजे जानुद्वयोः पादद्वये
तथा द्वादशाक्षराणि न्यसेत् ततो मूर्तिपंजरं
न्यसेत् किरीटमंत्रेण व्यापकं कृत्वा ध्यायेत् वि
ष्णुं शारदचंद्रकोटिसदृशं शंखं रथांगं गदाम्
म्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनं
आबद्धांगदहारकुण्डलमहामौलिस्फुरत्कंक
णं श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनीन्द्रैः स्तु

तं. सा. वै. ५.

90

तम् एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ततो सामान्यार्घ्यपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यन्तं विधाय आवरणपूजामारभेत यथा अग्निनिरृतिवाय्वीशानकोणेषु दिक्षु च ॐ हृदयादिना पंचांगेन पूजयेत् ततः पूर्वादिदलेषु वासुदेवादीन् अग्न्यादिकोणेषु शान्त्यादीन् तद्बहिः इन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं द्वादशलक्षजपः तथा च वर्णलक्षं जपेन्मंत्री दीक्षितो विजितेन्द्रियः तत्सहस्रं प्रजुहुयात्तिलैराज्यपरिप्लुतैः मायाद्यं रमाद्यं लक्ष्मीवासुदेवाय नमः प्रणवादिरयं मंत्रः अस्य पूजादिकं वासुदेवमंत्रवत् करांगन्यासस्तु ॐ ह्रीं श्रीं अंगुष्ठाभ्यां नमः ॐ श्रीं श्रीं तर्जनीभ्यां ॐ लक्ष्मी। मध्यमाभ्यां ॐ वासुदेवायानामिकाभ्यां ॐ नमः कनिष्ठाभ्यां एवं हृदयादिषु ध्यानं तु विद्युत्सन्निभं वपुः कमलजावैकुण्ठयोरेकतो श्रान्तं ते हवपेन रत्नविलसद्भूषाभयालंकृतम् विद्यावं कंजदर्पणमणिमयं कुंभं सरोजं गदां शंखं। चक्रममिति बिभ्रतमिदं दिप्याच्छ्रियं नः सदा अस्य पुरश्चरणं चतुर्लक्षजपः तथा च वर्णलक्षं जपेन्मंत्रं तत्सहस्रं सरोरुहैः मधुत्रयसंयुतैः होमं कुर्याद्धिकमितैः वर्णलक्षं मंत्रवर्णसंख्यलक्षम् अस्य दधिवामनमंत्रः ॐ नमो विष्णवे सुरपतये म

हाबलाय ठद्वयम् नारो हन्ति सर्वे भूपाङ्कुडे
नः सुरपतिर्भवेत् महाबलाय ठद्वयं मनुराण
दश्याक्षरः अस्य पूजा प्रातःकृत्यादि ॐ सोम
मेडलाय नम इत्यंते विन्यस्य ऋष्यादिन्यासं कु
र्यात् शिरसि इन्द्र ऋषये नमः मुखे विराट् छ
न्दसे नमः हृदि दधिवामनाय देवतायै नमः
नयावनिर्वेये वंशांतकलिते पीठे प्रागुक्तेन
समर्चयेत् ततः करांगन्यासौ ॐ अंगुष्ठाभ्यां न
मः नमस्तर्जनीभ्याम् विस्तवे मध्यमाभ्याम् ।
सुरपतयेनामिकाभ्याम् महाबलाय कनिष्ठा
भ्याम् स्वाहा करतलपृष्ठाभ्याम् एवं हृदया
दिषु ततो मंत्रन्यासः अथ हयग्रीवमंत्रः उद्गि
रत्पादमाभाष्य प्रणवोद्गीथप्राहृतः सर्ववा
गीश्वरेत्यंते प्रवदीदीर्घेरेत्यात्र सर्ववेदमया
चिन्त्यपदांते सर्वमुच्चरेत् बोधयद्वितयांतोऽयं
मंत्रस्ताराद्दिरीरितः अस्य पूजाप्रयोगः प्रातः
कृत्यादि पीठमर्चनं विधाय ऋष्यादिन्यासं कु
र्यात् शिरसि ब्रह्मणे ऋषये नमः मुखे अनु
ष्टुप् छन्दसे हृदि हयग्रीवदेवतायै ततः करांग
न्यासौ ॐ अंगुष्ठाभ्यां उद्गिरत्प्रणवोद्गीथत
र्जनीभ्यां सर्ववागीश्वरमध्यमाभ्यां सर्ववेदमया
चिन्त्य अनामिकाभ्यां हूम् सर्वबोधय बोधय क
निष्ठाभ्यां फट् एवं हृदयादिषु एवं ध्यात्वा मन
सैः संपूज्य प्राक्स्थापने कृत्वा वैसर्बोनकपीठ

ने॰
मा॰
५१

पूजां विधाय ब्रह्मास्मिन्न्यासं ॐ हृन्यानन मूर्त्तिं
संकल्प तनर्थां नावाहनादि पंच पुष्पांजलिदा
नपर्यन्तं विधायावरणपूजामारभेत निर्वये
बीजेन मूर्त्तिं संकल्प बीजमद्द्रियते यथा।
वियद्गुरुस्थमध्वीश बिन्दुमद्बीजमीरितम्
यथा केसरेष्वग्न्यादिकोणेषु दिक्षु ॐ हृद॰
याय नमः इत्यादि पंचांगानि पूजयेत् ततो॰
दिग्दलेषु चतुर्वेदान् ऋग्यजुः सामाथर्वा
व विदिग्दलेषु स्मृतिमायमीमांसासर्वशा
स्त्राणि तथाच केसरेषु चतुर्वेदांश्चतुर्दिक्षु
समर्चयेत् विदिक्षु तु स्मृतिमायसर्वशा॰
स्त्राणि पूजयेत् अर्चयेत्पत्रमध्येषु विधाने॰
ताङ्गदेवताः तद्बहिरिन्द्रादीन्वज्रादींश्च पू
जयेत् ततो धूपादि विसर्जनान्तं कर्म अस्य
पुरश्चरणं त्रयस्त्रिंशल्लक्षजपः वर्णलक्षं ज
पेन्मंत्रं क्रूरदुष्टेर्म धृमुनैः दशांशं पायसैर्व॰
वह्नौ जुहुयान्मंत्रसिद्धये अथैकाक्षरः हका
रसकारषट्स्वरबिन्द्वात्मकः वियद्गुरुस्थ
मध्वीशबिंदुमद्बीजमीरितम् एकाक्षरो म
हामंत्रश्चतुर्वर्गफलप्रदः चतुर्दशाक्षरयुक्तः
कल्पांतरे अस्य बला ऋषिः त्रिष्टुप्छन्दः ह
यग्रीवरूपो विसर्गदेवता हकारो बीजं उकारः
शक्तिः हंसां हंसीं हंसूं हंसैं हंसौं हंसः इति
षडङ्गकल्पना ध्यानम् धवलनलिननिभं

ह्रीं रंगोरां कराग्रे जपवलयसरोजे पुस्तकाभी
ष्टदाने दधतममलवस्त्राकल्पजालाभिरामं
तुरगवदनविष्णुं नौमि विद्याधिराजम् प्रथ
म आरक्षणकांक इति पूर्ववद्ध्यानम् एवं ध्या
त्वा मानसैः सम्पूज्य शंखस्थापनं कृत्वा पीठपू
जां कृत्वा पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलि
दानपर्यन्तं विधाय आवरणपूजामारभेत तत्रा
ग्नेः प्रथमावरणम् अस्त्राहयमेधहयस्तुति ह
यविद्या हयलक्ष्मीः हयवागीश्वरी हयविद्या
विशाल हयनाद विमर्द हयैरष्टभिर्द्वितीयम्
लक्ष्मी सरस्वती रति प्रीति कीर्ति कान्ति तुष्टि
पुष्टिभिस्तृतीयम् ॐ मदादिभिर्गजैश्चतुर्थम्
इन्द्रादिभिः पंचमम् ततो धूपादि विसर्जनान्तं
कर्म समापयेत् अस्य पुरश्चरणं च तत्त्वलक्षजपः
तथा च वेदलक्षे जपे मंत्री दशांशं शुद्धयाज्यतः
अन्येन तद्दशांशं च होमः हयग्रीव एकाक्षरविद्या
ध्यानं तद्धयशिरः श्रुहोतमोतः तथा च कल्पे हय
शिरः पञ्चैव प्रोक्तं हृदयं च समडोल सर्वीता
दिर्महामंत्रश्चतुर्वर्गफलप्रदः ब्रह्मा ऋषिः अ
नुष्टुप्छन्दः हयग्रीवरूपो विष्णुर्देवता अस्मत्स
र्वसिद्धिकामार्थे उँ ह्रीं त्रिगुणात्मकाय इति स्वाहान्तो
मन्त्राख्यातो बीजसंप्रणवसंपुटः मंत्रोत्तरम्
विद्याधीशाय तद्रूपाय विस्मयात्तद्रूपिणे त
मं नमो हयग्रीव विद्याराजाय विष्णवे स्वाहा अ

ने॰ ता॰ ९२

92

यंमंत्रो हंसादिः सोऽहंमंत्रकः तथा च स्वाहांतो
मन्त्रराजो नो हंसेन संपुटीकृतः एतयोर्मंत्रयोः
पूर्वोक्तानुष्टुप् हयग्रीवमंत्रवत् सर्वं ज्ञातव्यम् अ
थ नृसिंहमंत्रः उग्रं वीरं महाविष्णुं ज्वलंतं सर्व
तोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्त
तः नमाम्यहमिति प्रोक्तो मंत्रराजः सुरद्रुमः अ
यं मंत्रो मयि प्रदिनोपि भवति अस्य पूजा प्रा-
तः कृत्यादिपीठमंत्रांतं पीठन्यासं विधाय ऋ
ष्यादिन्यासं कुर्यात् शिरसि ब्रह्मणे ऋषये
नमः मुखेऽनुष्टुप्छंदसे हृदि नृसिंहदेव
तायै ततः करांगन्यासौ चतुर्भिर्द्वंद्वयं वर्णैः
शिखावभिरद्वैः शिरो ललाटनेत्रमु
खबाहंगसंधिषु साग्रेषु ॐ ह्रौं हृदयेगलेपा
संहृदयेषु नः अपरे ...... ककुदिन्यासवर्णा
मथाक्रमम् ध्यानम् माणिक्यादिसमप्रभं
निजरुचासंत्रस्तरक्षोगणं जानुन्यासकरांबु
जं त्रिनयनं रत्नोल्लसद्भूषणाम् बाहुभ्यां धृत
शंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजि
ह्वमुदग्रकेशनिचयं वंदे नृसिंहं विभुम् एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय
वैष्णवात्मकपीठन्यासं कृत्वा पुनर्ध्यानावाहना
दि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजा-
मारभेत तथाहि केसरेषु षडंगादिकोणेषु मः
ध्ये दलेषु नामानि पूजयेत् उग्रवीरं हृदयाय।

महाविस्तं शिरसे ज्वलंतं सर्वतोमुखं शिखा
यै नृसिंहं भीषणं कवचाय भद्रं मृत्युमृत्युं
नेत्राणां नमाम्यहमस्त्राय फट् ततः पूर्वादि
दले गं हं ऽं पं कं रं थं षं ब्रह्माणं च पूजयेत् वि
दिग्दलेषु श्रियं ह्रियं धृतिं पुष्टिं च श्रवणादि
नमोंतेन पूजयेत् तद्बहिरिन्द्रादीन् वज्रादींश्च
पूजयेत् ततो धूपादि विसर्जनांतं कर्म समाप
येत् अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः तथा
च वर्णलक्षजपेन मंत्रेण तत्संख्यकस्तैः पाय
सान्नैश्च जुहुयात् हि पिबन् सूर्जितेन तले पाशाः श
क्तिश्च क्रोंवर्मं फट् तथा च तिर्यक्ये पाशाः श
क्तिर्नाहरे ...... वर्मं फलमंत्रः षड्दशेन रह
रैः सर्वकामफलप्रदः अस्य पूजा प्रातः कृत्वा
द्विवेस्ववात्मपीठमंत्रेण विन्यस्य ऋष्यादिन्या
सं कुर्यात् पूर्ववत् ऋां अंगुष्ठाभ्यां नमः क्रीं त
र्जनीभ्यां क्रूं मध्यमाभ्यां क्रैं अनामिकाभ्यां
क्रौं कनिष्ठाभ्यां क्रः करतलपृष्ठाभ्यां फट् ए
वं हृदयादिषु ततो ध्यानम् कोपादालोल
जिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादा
दानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्रगा
त्रम् शंखं चक्रं सपाशांकुशकुलिशगदादा
रुणान्युद्वहंतं भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयवि
विधाकल्पमीडे नृसिंहं एवं ध्यात्वा मानसैः सं
पूज्य शंखस्थापनं कृत्वा वैष्णवात्मपीठपूजां वि

ने.
सा.
४३

93

पायसुनर्धामावाहनादि पंचपुष्पांजलिदान
पर्यंतं विधायावरणपूजामारभेत ततः केस
रेष्वग्न्यादिकोणेषु च ओं हृदयाय नम
इत्यादिषडंगानि पूजयेत ततः पत्रेषु पूर्वादि
क्रमेण शंखचक्रपाशांकुशगदाखड्गाखे
टकांश्च पूजयेत तथा च निबंधे शंखाद्यनेर्व
हिश्चक्रं शंखं पाशांकुशा पुनः वज्रं कौमो
दकी खड्गा खेटकं चात्र पूजयेत ततः इंद्रादी
वज्रादींश्च पूजयेत ततो धूपादि विसर्जनां
तं कर्म समापयेत अस्य पुरश्चरणे षट्लक्ष
जपः तथा च अनलदें जपेन्मंत्री चैतेनजु
ह्यात्ततः तत्सहस्रं समिद्ध्मो नोषयेद्धमना
गुहम हकारो वह्निमात्रौं फ्रौं मनुस्वर विभू
षितो [illegible]र्दशाक्षरैर्युतः बिंदुमानेकाक्षरो
मंत्रः तथा च हकारो वह्निमात्रफ्रौं मनुस्व
रविभूषितः बिन्दुमात्रलसन्मूर्धा बीजं मा
हरोमंत्रम पकारो रामत्रः प्रोक्तः सर्वकाम
फलप्रदः अस्य पूजादि सर्वं मंत्रराजवत् अ
स्य ऋषिः गायत्री छन्दः हकारो बीजम
ओंकारः शक्तिः षड्दीर्घयुक्तमंत्रेणांगाक
ल्पना जपहृदयं श्रीनृसिंहः तथा च जय
हृदयं स्मृतम् ऋषिश्रीपवीरसिंहस्यापि यश्च
दैवोमत्रः प्रोक्तोभजतां कामदायकः ब्रह्मा
ऋषिः अस्य सर्वं वत् षड्दीर्घयुक्तेन श्री

बीजेनांगकल्पना ध्यानार्चनेमंत्रराजवत् अ
स्यपुरश्चरणमष्टलक्षजपः बहुलक्षंजपेन्मंत्र
तुमिच्छामिप्रतिष्ठाकर्मनिर्णयम् स्नात्वा
संकल्पयेन्मंत्रीशरवेर्चनमाचरेत् पंचग
व्येनतः कृत्वाशिवमंत्रेणमंत्रितम् तत्रच
कुंक्षिपेन्मंत्रीप्रणवेनसमाकुलम् तदुद्
ग्रतनस्थकुंभंस्थापयेत्स्वर्णपीठके पंचाम्
तेनदुग्धेनशीतलेनजलेनच चंदनेनसु
गन्धेनकस्तूरीकुंकुमेनच पयोदधिच्छ
तक्षौद्रशर्कराद्यैरनुक्रमात् तोयपूर्णा॥
नैः कुर्यात्तंचाप्यत्रविधिंबुधः मौनाकैः
कलशैर्देवीमष्टाभिर्वारिपूरितैः कथा
यजलसंपन्नैः कारयेत्स्नानमुत्तमम् स्ना
नेसमाप्यतोदेवीहोमयेत्स्वर्णपीठके यं
त्रराजायविद्महेमहायंत्रायधीमहितन्नो
यंत्रः प्रचोदयात् स्पृष्ट्वायंत्रंकुशाग्रेणगा
यत्र्याचाभिमंत्रयेत् शुद्धेनतंप्रान्तेदेवि
देवताभावसिद्धये प्राणप्रतिष्ठितंततः कु॥
र्यावरंगोदेवतांयजेत् तत्रावाहयेत्तुदेवी
मीवन्यासेनकारयेत् उपचारैः षोडशाभि

ईश्वर उवाच

ने.
ला
२१५
215

महामुद्रादिभिःसदा फलताम्बूलनैवे-
द्यैर्देवंतत्रसमर्चयेत् पटष्ठसूत्रादिकंद
याद्वस्त्रालंकारमेवच मकरंवामरंचैवा
यध्यायोगंमहेश्वरि सर्वमेतत्प्रयत्नेनद
याद्यामहितेरतः ततोजपेत्महद्भक्तस
कलेप्सितसिद्धये बलिदानंततःकृत्वा
प्रणामेश्वकराजकम् अष्टोत्तरशतंकृत्वा
सम्पातात्र्जंविनिक्षिपेत् होमकर्मण्यश
क्तश्चेद्विगुणंजपमाचरेत् येनमेकांसः
मानीयसर्वाण्यंग्गायलंकृताम् गुरवेद
क्षिणांदद्यात्ततोदेव्याविसर्जनम् तेत्रघ
दीपे फलेभिन्नेतद्यापटेष्ठस्थापनेयंत्र
मीश्वरि धनधान्यपुत्रपौत्र .... वि
मंचति अन्यत्र नभिन्नोस्थापयेयंत्रंतप
टेफलकेतथा अथप्रयोगाः तत्रकृत
कृत्यक्रियः सलिलवचनपूर्वकंसंकल्पं
कुर्यात् ॐअद्येत्यादिअमुकगोत्रः श्री
अमुकदेवशर्म्मा अमुकदेवतायाःपूजा
र्थंममुकदेवतायायंत्रसंस्कारमहंकरि-
ष्ये इतिसंकल्प पंचगव्यमानीय होमि

ति मंत्रेणाघोरास्त्रमभिमंत्र्य प्रणवेन
यंत्रं तत्र निदध्यात् ततः उष्णोदपात्रं तत्र स्थाप
येत् ततः पंचामृतमानीय ह्रौमिति मंत्रेण
पूर्ववच्छोधयित्वा स्थापयेत् तत्क्रमः प्र
थमं क्षीरेण स्नापयित्वा घृततैलेन स्नाप
यित्वार्घ्यं दद्यात् एवं दध्याहृतेन मधुना
शर्करया च ततोष्णशीतलजलेन चंद
नेन कस्तूरीकुंकुमेन च ततोष्टाभिः कलशैः
कषायजलसंपन्नैः कुंकुमगोरोचनचन्दन
मिश्रैस्तैस्तोयैः स्नापयेत् सर्वं तत्स्नानं तन्मू
लमंत्रे ततो यंत्रमस्तोपरि कुशाग्रेण तत्स्पृष्ट्वा
यंत्रराजाय विद्महे महायंत्राय धीमहि तन्
नो यंत्रः प्रचोदयात् इत्यघोरास्त्रशान्त
मभिमंत्र्य प्राणप्रतिष्ठां कुर्यात् अस्य श्री प्रा
णप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋ
षयः ऋग्यजुःसामानि छन्दांसि चैतन्य
देवता प्राणप्रतिष्ठायां विनियोगः अमु
ष्या आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः प्रा
णा इह प्राणाः एवं आं ह्रीं क्रों यं रं लं वं शं
षं सं हों हंसः जीव इह स्थितः आं ११ अ
मुक देवतायाः सर्वेन्द्रियाणि आं ११ अ
मुक देवतायाः वाङ्मनश्चक्षुःश्रोत्रघ्रा

णाऽरुह्यागत्य सर्वे विरं तिष्ठत स्वाहा इति
प्राणप्रतिष्ठाप्य तत्र कृतदेवतामावाह्य
षोडशोपचारैः पंचोपचारैर्वा पूजयेत्
ततः पटवस्त्रादिकं दत्वाग्रे होतारमहरं
गत्वा प्राक्ग्रहबलिं दद्यात् ततो होतार
शतहोमं कृत्वा प्रतिद्रुतिसम्पातं यंत्रो
दद्यात् होमाभावे द्विगुणो जपः का
र्यः ततो दक्षिणां दत्वाच्छिद्रावधारणं
कुर्यात् इति यंत्रसंस्कारपद्धतिः यमा
हुरेकं पुरुषं पुराणं यं ब्रह्मवेदांतविदो
वदंति विष्णुं विरिंचिं गिरिशेनथा
न्ये भजेहमाद्यं तमहं भजामि

इति महामहोपाध्याय
कृष्णानन्दवागी
शभटाचा
र्यविर।
चितेतत्र
सारेद्विती
यःपरि
च्छेदः
२ ॥
॥

अथप्रकीर्णकम् तत्रपूजयाः दिङ्नियमः
विस्तरविषयेनारदीये स्नातः शुक्लाम्ब-
रधरः स्वाचान्तः पूर्वदिङ्मुखः शुद्धास
नेसमासाद्यभूतो ध्यानमाचरेत् अन्यत्र
निबन्धे उपविश्यासनमन्त्री प्राङ्मुखोऽ
थाप्युदङ्मुखः बद्धपद्मासनोमन्त्रीसमा
हितजितेन्द्रियः सारसमस्थयोपि प्रागान
नोपनतोपनदिगवन्यनोध्यकेचित् ए
तैःपूजनेनायंक्रमः तथाचस्मृतिः रात्रा
वुदङ्मुखः कुर्याद्देवकार्यंसदैवहि शि-
वार्चनेसदाप्येवं शुचिः कुर्यादुदङ्मुखः
अथपूजायांविहितनिषिद्धानि तत्रमत्
प्रकाशे लिङ्गद्वयंतथानार्च्यंगणेशद्व
यमेवच शक्तित्रयंतथासूर्यद्वमेकत्रना
र्चयेत् द्वेचक्रेद्वारकायास्तुसालग्राम-
शिलाद्वयम् एतेषामर्चनान्नित्यमुद्वेगं
प्राप्नुयाद्गृही लैङ्गे एकीकृत्यचलिङ्गा
निदशपञ्चशतानिच प्रत्येकेनाथवा
देविबिल्वपत्रैः प्रपूजयेत् एवंपाशुपतं
लिङ्गंमृच्छिलादिविनिर्मितम् सालग्रा
मशिलामेकांगृहस्थोपिप्रपूजयेत् या
मस्ते नालतैरर्चयेद्धिस्तनतलस्याविर
नायकम् नदूर्वयार्चयेद्दुर्गांबिल्वपत्रैर्दि
वाकरम् उन्मत्तमर्कपुष्पंचविष्णोर्जपसा

तं. सा. २१७

217

दाद्युथैः गौतमीये तरक्तचन्दनं नागरहणी
याद्रक्तपुष्पकम् विल्वपत्रैस्तथा स्रनैनार्च
येद्देवकीसुतम् तत्रैव कमलैःकरवीरैद्रोण॰
लस्योजातिकेतकी नागकेसरयावन्तीकह्ला
रं चाणकोत्पले नंद्यावर्तो स्वयं नासमल्लि
कानयंमल्लिकाकुंदं चन्द्राः केचैव सौगन्धिमं॰
मणिपुष्पकम् विल्वार्जुनं तथा सुदं ययथा॰
लाभं समर्चयेत् इति यह लिविधानम् तत्र
विहितपुष्पाभावे तत्रान्तरे देवीनां चार्कमं॰
दारं द्वादित्येन गरं तथा गणेशायच सूर्याय
रक्तपुष्पमतिप्रियम् शिवे कुंकुं मदंतीचय॰
थीबन्धूककेतकी एवं रक्ताविसन्ध्येवमा
लतीकुसुमं ...... निर्गन्धोग्रोढगन्धं
वटूयांशीववर्ज्यजेत् तथा उग्रगन्धमगन्धं
चक्रमिकेणाविदूषितम् वासोभिः संवृतं नि
तंमतिमान्नार्चयेच्छिवे शिवेउपलद्दलम् त॰
था कालिकाभिस्तथान्याज्यं विनाचम्पकम
यकम् मुष्कं स्तुनार्चयेद्धि स्तुपत्रैः पुष्पैःकै
रपि स्नानैर्मैः स्नानीतैः पर्युषितैर्याचितैःकुस
वणिकैः स्वयंविकसितैः पुष्पैः स्वयं चपतितै
र्भैर्विवर्जयेद्दूतीपुष्पं सुगन्धं चविशेषतः
स्वयंविकसितेरिति स्वयंपुरुषेणविकसितैरि
त्यर्थः त्रिपत्रन्यूनकस्मैनार्चयेत्नकदाच
न भुगंतं [illegible] कीटादिदूषितम्

पर्युषितानि पुष्पाणि वर्जयेद्देवतार्चने ति
ष्टदिनत्रयं पुष्पं पद्ममामलकं तथा तु॰
लसी सर्वदा पुष्पा तथा बिल्वदलानि च
दिवैकं करवीराणि योग्यानि॥ तपोधने स्ना
नार्णवे पुष्पैः पर्युषितैर्देवि नार्चयेत्सलि
जैरपि निर्माल्यभूतैः कुसुमैरुच्छिष्टैः प
रमेश्वरि त्रिपुरामधिकृत्य वाराहीये प॰
लाशकाण्डकुसुमैर्नार्चयेद्दूरतस्त्यजेत्
धात्रीतमालजैः पत्रैस्तुलसीहितयेस्त॰
था पूजनात्पातकी च स्यात्तस्मात्प्रयत्नाद्विवर्जि
येद्दूरेत् तथा त्रिपुरापूजने वर्ज्या तुलसी
सर्वदा बुधैः तुलसीगन्धमात्रेण क्रुद्धा भ
वति सुन्दरी तुलावले रक्तमच्छंदेन
हेनीलकण्ठकुरण्टकम् नदद्याच्च॰
महादेव्यै यदीच्छेच्छुभमात्मनः तथा न॰
त्तविद्यादौ मन्त्रसङ्के पुष्पश्रेष्ठं रक्तको
कं कन्तुकं पूतपुष्पकम् बर्बराहितयं चैव
कर्णिकारद्वयं तथा बकमन्दारवृत्तानि
करवीराणि कुसुम्भने मल्लिकाहितयं जाती
लोमपुष्पं जयन्तिका बिल्वपत्रं कुरवकं॰
गनिपुष्पं च केसरम् वासंतीहितयं चैव का
शपुष्पं मरुवकम् मदनं च लवङ्गं च पृथ्वी
सफलिकां तथा सुगन्धिपुष्पैर्लोहिताकुसु
मैरर्चयेद्दलैः बिल्वैर्मकरकान्तैश्च तुल॰

तं॰
सा॰
११८

२१८

सीदलवर्जितैः यद्यपि तुलसीवर्जितापू
जा निष्फला भवेदिति नियमस्तत्र विष्ण्वादौ
तथा च भैरवीसुन्दरीकालीबगलाविद्यावि
षयेति तुलसीवर्जितापूजा विफला भवे
त् अविफला सफलेत्यर्थः शैवादिपूजायां
तुलसीं सदैव वर्जयेत् पूर्ववचनादिति पूजा
यां तदसत्वे सत्वे वा न कश्चिद्विशेषः नारद
तैरर्चयेद्धि सत्वमिति तत्पुष्पाभावे निर्देशमात्र
मस्य तत्पल्लवस्य निषेधपरं तथा च पुष्पा
भावे जलेनापि पूजयेत्तत्पल्लवेन वा नित्यपू
जा अकर्तव्या भक्तिभावेन सुन्दरि तत्सर्वादि
विशेषपरं तथा च गन्धपुष्पाक्षतयवकु
शाग्रतिलसर्षपैः सदूर्वैः सर्वदेवानामेत
दर्घ्यमुदाहृतमिति एवं तद्दूर्वायाः पार्वती
मिति देवीमधिकृत्य योगिनीतन्त्रे किञ्च
पुष्पाणामीतेन श्वेतेन नगरेण च श्वेतार्क
णचकुसेन वर्जयेत्पूजने तथा तुलसीह
च मन्दारकल्हारैश्च तमालकैः नार्चयेत् महा
लक्ष्मीं उग्रकाशोद्भवेन च तथा च सर्वमधि
कृत्य बकुलस्य वर्जनस्य अशोकस्य मदन
स्यापि पूजयेद्दूर्वावर्जनं सर्वं तेन विवर्जयेत्
शतवर्जं न वर्जयेदिति वृन्तपुष्पैरेतैः पूजये
दित्यर्थः तद्यथा विष्णुक्रान्ता जपा नागके
सरं बालपत्रकम् बन्धूकं चैव मम मन्दारं सर्वं

तेनसमर्चयेत् नस्फुटितं वर्ज्यंचभूगतंच
नसंस्पृशेत् सेफालीबकुलं भद्रे भूगतेनस
मर्चयेत् मालूरं भूगतं देयं तस्य काष्ठस्य चंद
नम् बिल्वस्य मूलकं वर्ज्यं कदल्याः पत्रकं त
तथा बिल्वपत्रं च माद्यं च तमालामलकी
दलम् कल्हारं तुलसी चैव पद्मं च मालिपुष्पक
म् एतत्पर्युषितं नस्याद्यच्चान्यत्कलिकात्
त्मकम् नीरजस्य च बिल्वस्य तुलसीदल
मेवच नद्यच्छिन्नभिन्नं च जातीपुष्पं च पूर्ण
करि तथाचरण्यवभट्ठः सर्वैः पुष्पैस्सर
दापूजा विहिताविहितैरपि विहिताविहि
तैर्वापि भक्तियुक्तेन चेतसा इदंतु विहिताभा
वे त्वंतु भक्तिविषयं तथा च कालीतन्त्रे श्रमा
मार्गैः पुष्पभूर्जैः पुष्पतुलसीवर्जितैः शुभैः वाम
एतत्तन्त्रे पर्थ्यराम्येन बकुलस्येन तहस्यापरा
जिता इति पुष्पनियमः सेतुं विनाजपस्य
वैयर्थ्यत्वात्तन्निर्दिश्यते तत्रकालिकापुराणे
शास्त्राणां प्रणवस्सेतुर्मन्त्रेण प्रणवः स्मृतः
स्रवत्यनोंकृतः पूर्वं परस्ताच्च विशीर्यते य
हन्निःसेतुसलिलं तत्क्षणान्निम्नं प्रसर्पति म
न्त्रस्तथैव निःसेतुः क्षणान्निवरतिज्वलाम्
वर्णदंशस्वरो योसौ सेतुरोंकारसंज्ञितः स
र्वमन्त्रात्सुपर्वाणां सेतुरित्युच्यते ॥
चात्तु स्वात् नादाभ्यां मुद्राणां सेतुरुच्यते
पञ्चशुद्धिं विनापूजायाः फलजनकताभा

तं॰
सा॰
२१९

219

यान्न शुद्ध्यन्ते तथा च कुलार्णवे आत्मस्था
न मन्त्रद्रव्यदेवशुद्धिस्तु पंचमी यावन्न कुरुते
देवि तावद्देवार्चनं कुतः अभिचाराय देवेशि पं
चशुद्धिं विना तथा षडङ्गाद्यखिलन्यासैरा
त्मशुद्धिरितीरिता संमार्जनानुलेपाद्यैर्दर्प
णादेवयशुभम् वितानधूपदीपादिपुष्पमा
ल्यादिशोभितम् पंचवर्णरजोभिस्तु स्थान
शुद्धिरितीरिता ग्रथिता मातृकावर्णैर्मूल
मन्त्राक्षराणि च क्रमोत्क्रमद्विरावृत्त्या मन्त्र
शुद्धिरितीरिता पूजाद्रव्याणि संप्रोक्ष्य मूला
स्त्रैस्तुविधानतः दर्शयेद्धेनुमुद्रां वा द्रव्यशु
द्धिः प्रकीर्तिता पीठे देवीं प्रतिष्ठाप्य सकली
कृत्य मन्त्रवित् मूलमन्त्रेण द्रव्यादीन्माल्या
दीनुदकेन वा त्रिवारं प्रोक्षयेद्धि हा देवशुद्धि
रितीरिता पंचशुद्धिं विधायैवं पश्चाद्यजन
माचरेत् अथ मन्त्रसिद्ध्युपायः गोतमीये
सम्यगनुष्ठितो मन्त्रो यदि सिद्धो न जायते पुन
स्तेनैव कर्तव्यस्ततः सिद्धो भविष्यति पुनर
नुष्ठितो मन्त्रो यदि सिद्धो न जायते पुनस्तेनै
व कर्तव्यस्ततः सिद्धो न संशयः पुनरनुष्ठिते
मन्त्रे यदि सिद्धिर्न जायते उपायास्तत्र कर्तव्याः
सप्तशंकरभाषिताः भ्रामणं रोधनं वश्यं पीड
नं शोषपोषणम् दहनान्तं क्रमात्कुर्यात्ततः
सिद्धो भवेद्ध्रुवम् भ्रामणं वारुणबीजे ग्रथनं क

मयोगतः तन्मन्त्रयन्त्रमालिख्यमिल्लूकर्पूर
गैरुमैः उषीरचन्दनाभ्यांतमन्त्रसङ्कुचितं
लिखेत् क्षीराज्यमधुतोयानांमध्येतल्लिखि
तंभवेत् पूजनाजपनाद्धोमाद्भ्रामितःसिद्धि
दोभवेत् भ्रामितोयदिनसिद्धेद्धोपनंतस्यका
रयेत् मारस्वतेनबीजेनसम्पुटीकृत्यसंज
पेत् एवंरुद्धोभवेत्सिद्धोनचेदेतद्दृष्टीकृत
श्वल्कचचूर्णेनकृष्टंदरिद्रामादनाथिला प
नैस्तमन्त्रमालिख्यभूर्जपत्रेस्फुटोभने धार्यः
कण्ठेभवेत्सिद्धिःपीडनंवास्यकारयेत् अध
रोत्तरयोगेनपदानिपरिटाप्यवै धायेच्छुद्दे
वतांतद्दृदयरोत्तररूपिणीम् विद्यामादित्य
दुग्धेनालिखित्वाक्रम्यतोघ्रिणा तथाभूतेन
मन्त्रेणहोमःकार्योदिनेदिने पीडितोलञ्जर
याविष्टःसिद्धःस्यादथपोषयेत् बालाया
स्त्रितयंबीजमाद्यंतेतस्ययोजयेत् गोक्षीर
मधुनालिख्यविद्यांपाणौविभावयेत् पोषि
तोयंभवेत्सिद्धोनचेत्कुर्वीतशोषणम् ठा
भ्यांवायुबीजाभ्यांमन्त्रंकृत्वाहृदिर्भितम्
एषाविद्यागलेधार्यालिखित्वावीरभस्मना
शोषितापिनसिद्धाचेद्दहनीयाग्निबीजतः
आग्नेयेनतुबीजेनमन्त्रस्यैकैकमक्षरम् श्रा
द्यंचमध्यमंप्रांचयोजयेद्दाहकर्मणि ब्रह्म
वृक्षस्यतैलेनमन्त्रमालिख्यधारयेत् काष्ठ

ते॰
सा॰
२२०

220

देशेन ततो मन्त्रसिद्धिस्सप्ताङ्कुरोदितः एवं ते
कथितं सम्यक्केवलं न च भक्तितः एतेन तु कृता
र्थः स्याद्बहुभिः किम्भवते अथान्यत्सम्प्र
वक्ष्यामि मन्त्रसिद्धेस्तु कारणम् मातृकापुटि
तं कृत्वा स्वमन्त्रं प्रजपेत्सुधीः क्रमोत्क्रमात्पुर
ताद्यन्यातदं ते केवलं मन्त्रम् अवर्णं प्रत्यदं
यो यावल्लक्षं समाप्यते निश्चितं मन्त्रसिद्धिः
स्यादित्युक्तं मन्त्रवेदिभिः अथ मन्त्रसिद्धेर्ल
क्षणम् मनोरथानामक्लेशेन सिद्धेरुत्तमल
क्षणम् मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा
योगानामक्लेशसिद्धिः सिद्धेस्तल्लक्षणं तथा
परकायप्रवेशश्च पुरप्रवेशनं तथा ऊर्ध्वोत्क्र
मणमेवं च चराचरपुरेगतिः खेचरीमेल
नैवं तत्कथाश्रवणादिकम् भूच्छिद्राणि प्रप
श्येत तद्वत्सुस्थलक्षणम् ख्यातिर्वाहनभूष
णादिलाभः सुचिरजीवनम् नृपाणां तद्ग
णानां च वशीकरणमन्तमम् सर्वत्र सर्वलो
केषु चमत्कारकरं सुधीः रोगापहरणं दृष्ट्या
विषापहरणं तथा पाण्डित्यं लभते मन्त्री च
तुर्विधमतन्द्रितः वैराग्यं च मुमुक्षुत्वं योगिता
सर्ववश्यता अष्टाङ्गयोगाभ्यसनं भोगेच्छाप
रिवर्जनम् सर्वभूतेष्वनुकम्पा सर्वसत्यादिगुणो
दयः इत्यादिगुणसम्पत्तिर्मध्यसिद्धेस्तु लक्ष
णम् ख्यातिर्वाहनभूषादेर्लाभः सुचिरजी

वनम् तृपाणामङ्कुनानांचवात्सल्यंलो
कवत्पुना महैश्वर्यंधनितंचपुत्रादिधनं
सम्पदः प्रथमाःसिद्धयःप्रोक्तामन्त्रिणांप्र
थमभूमिकाः सिद्धमन्त्रस्ययःसाधकःसाक्षाच्छि
वोनात्रसंशयः इदानींदोषानिरूप्यन्ते ॥
तत्रमुण्डमालातन्त्रे शङ्करः भुवनेशीम
हाविद्यादेवराजेनवैपुरा आराधितामहा
विद्याबीजहीनाभवेत्तदा एकाक्षरीबीज
हीनावाग्भवेनोज्झितापरा कामराजाख्य
विद्ययाविद्यामातृबद्धपञ्चना पारेणपीडि
तापूर्वंभुवनेशूणप्रतिष्ठिता कुमारीया
चविद्येयंत्वयाप्रज्ञापतिव्रते केवलंशक्ति
रूपेणशिवरूपेणकेवलम् मायाप्रतिष्ठिता
विद्यानाराचैदस्वरूपिणी भैरव्यादिकमः
पिहाय स्मादग्धाकीलिताचसैवसंहार
रूपिणी मदोन्मत्तास्मूर्छिताचहीनवीर्या
चस्तम्भिता छिन्नारुद्धाचवृद्धाचनिर्बीजा
सर्वहीनका तथाविप्रसारे छिन्नोरुद्धः
शक्तिहीनःपराङ्मुखउदासीनः बधिरोनेत्र
हीनश्चकीलितःस्तम्भितस्तथा दग्धःत्र
स्तश्चभीतश्चमलिनश्चतिरस्कृतः भेदि
तश्चसुषुप्तश्चमदोन्मत्तश्चमूर्छितः ह
तवीर्यश्चहीनश्चप्रध्वस्तोबालकःपुनः कु
मारश्चयुवाप्रौढोवृद्धोनिस्त्रिंशकस्तथा

तं· सा·
२११

निर्वीर्यः सिद्धिहीनश्च मंदः कूटः पुनस्तथा
निरंशकः सत्वहीनः केकरो जीवहीनकः
धूमितालिङ्गितौ ख्यातौ मोहितश्च तथार्तकः
अतिवृद्धोङ्गहीनश्च प्रतिक्रुद्धस्समीरितः ॥
अतिक्रुद्धः सव्रीडश्च शान्तमानस एव च स्था
नभ्रष्टश्च विकलो निस्नेहः परिकीर्तितः अ
तिवृद्धः पीडितश्च वक्ष्याम्येषां हि लक्षणम्
मनोर्यस्यादिमध्यान्तेष्वनिलं बीजमुच्यते
संयुक्तं वा वियुक्तं वा स्वराक्रान्तं त्रिधा पुनः
चतुर्धा पंचधा वापि स मन्त्रश्छिन्नसंज्ञकः
आदिमध्यावसानेषु भूबीजद्वयलांछितम्
रुद्धमन्त्रस्स विज्ञेयो भुक्तिमुक्तिविवर्जितः
मयात्रितत्वश्रीबीजं वा विहीनश्च यो मन्त्रः
शक्तिहीनस्स कथितो यस्य मध्ये न विद्यते
कामबीजं स्तवं मायापि रस्यं जरूपमेव वा अ
सौ वा प्रां मखेः प्रोक्तो हकारो बिंदुसंयुतः ॥
आद्यंतमध्येष्वित्रस्स वा संभवेद्बधिरो मन्त्रः पंच
वर्णो मन्त्रयः स्याद्रेफार्येंडुविवर्जितः नेत्रही
नस्स विज्ञेयो डुखशोकामयप्रदः आदिम
ध्यावसानेषु हंसः प्रासादवाग्भवो विंदुयु
क्तं हकारं वा फकारं वा तथैव च अंऊंणं वा त
था मायानमामि च ततः परम् स एव कीलि
तो मन्त्रः सर्वसिद्धिविवर्जितः इति तन्त्रसार
पाठः हकारो बिंदुमान् बीजं रवेश्चापि वन

ष्कलम् मायानमामिचपदंनास्तियस्मिन्म
कीलकः एवंमध्येहृदयंमूर्ध्नियस्मिन्नस्त्रम
द्वयौ नविद्यतेसमन्त्रस्तम्भितः सिद्धिवर्जि
तः वह्निर्वायुसमायुक्तोयस्यमन्त्रस्यमूर्धनि
सप्तधादृश्यतेतंतदग्धमन्त्रंप्रचक्षते अस्त्रद्वा
भ्यांत्रिभिः षड्भिरष्टभिर्दृश्यतेद्वयैः त्रस्तः
सकथितोमन्त्रः सर्वसिद्धिविवर्जितः आदौऽ
मध्येतथावांतेयस्यवर्णोचनदृश्यम् सएवमऽ
लिनोमन्त्रः सर्वसिद्धिविवर्जितः यस्यमध्ये
दकारोवाककवचंमूर्ध्निदृश्यते त्रिविधंदृश्यते
वास्त्रंतिरस्कृतउदाहृतः भोदयंहृदयेश्री
वैवषड्वौषट्चमध्यतः सएवभेदितोमन्त्रः
सर्वशास्त्रविवर्जितः त्रिवर्णोहंसहीनोयः
सस्तुसुप्तउदाहृतः मन्त्रोवाप्यथवाविद्याः
सप्ताधिकदशाक्षराः फंकारपंचकादियोऽ
मदोन्मत्तउदाहृतः सप्तदशाक्षरोमन्त्रोम
ध्येसंचतथाभवेत् मूर्छितः कथितोमन्
त्रः सर्वसिद्धिविवर्जितः पंचफट्यस्यमन्त्रस्य
विरामेस्थानसंयुतः हृतवीर्यस्सकथितो
नास्तिनस्यप्रयोजनम् सप्तवर्णोभवेद्बालः
कुमारोष्टाक्षरःस्मृतः षोडशार्णोयुवाम
न्त्रः सर्वसिद्धिविवर्जितः चत्वारिंशल्लिपिर्यः
स्यात्प्रौढःसपरिकीर्तितः आदौमध्येतथाऽ
वांतेचनरश्मियुतोमन्त्रः सएवदीनमन्त्रस्या

ने॰
सा॰
२२९

न्नथ्याचाष्टदशाक्षरः एकोनविंशो यो मन्त्र
स्ताराममन्त्रस्समान्वितः एकादशोऽक्षरो बीजा
द्यः षडक्षरश्च प्रवर्तते द्वाविंशत्यक्षरी विद्या
मायाकाममविवर्जिता श्रमन्त्रपाचसा विद्यास
र्वसिद्धिविवर्जिता षड्विंशत्यक्षरी विद्या
फट्स्वांतेविवर्जिता मूर्छिता कथिता विद्या
मन्त्रिणां हानिरूपिणी त्रिंशदर्णोऽपनत्रक्षहि
वर्णो मन्त्रः षोडशाक्षरः चतुष्कूतादरस्तु पिर
दृढस्य परिकीर्तिताः नवाक्षरो युवयुतो मन्त्रो
निस्त्रिंशार्ध्वरितः यस्यावमानेच्छदयो यो गृहीतेऽम
त्रैवमन्यतः त्रिशोवर्णं च संयुक्तं वैष ह
कार एव च शिवश्चत्रयाणां ह्रीं नोवास निर्दी
उदाहृताः एषु स्थानेषु फंकारः बोधायसि
न्यरुपते समन्त्रस्सिद्धिदो नस्यान्मत्र
पंचाक्षरो मन्त्रः कूटएकाक्षरो मन्त्रस्य एवोक्तं
निरर्थकः द्विवर्णस्य वहीनस्य पञ्चवर्णा
त्मकेवः षडक्षरो जीवहीनस्सार्धसप्ताक्षर
तोमन्त्रः सार्धद्वादशवर्णो विघ्नमितः सप्त
निरर्थितः सार्धवीजत्रयं तद्वदेकविंशाक्षर
त्मकः विंशत्यर्णे त्रिंशत्यर्णो यस्मादादि
कृतापनः द्वाविंशत्यक्षरो मन्त्रो स्तोत्रहितः
परिकीर्तितः चतुर्विंशाक्षर वर्णो यः सर्व
सर्वविंशार्धवर्णकः द्वापार्श्वस्य नाति विकृष्टयः
सर्वमन्त्रसमन्वितः चतुर्विंशाक्षरवर्णो यस

सविंशतिवर्णकः एकादशाक्षरो वापि पंचविं
शतिसंख्यकः त्रयोविंशतिवर्णो यो मन्त्रो भूः
तरुद्रादृतः अतिकृच्छ्रगदितो निंदितः स
र्वकर्मसु षड्विंशत्यक्षरो मन्त्रः षड्विंशद
र्णकस्तथा एकोनत्रिंशद्वर्णो वा बकुद्दीन
स्स एव च अष्टाविंशत्यक्षरोयमेकविंशत्याः
पि वा अतिकृच्छ्रगदितो निन्दितः सर्वक
र्मसु चत्वारिंशतमारभ्य त्रिषष्टियावता
भवेत् ते सर्वे मन्त्रवर्गास्तु क्रीडिताः सर्वक
र्मसु त्वरादितः ते सर्वे कथिता मन्त्राः स्या
नअष्टानेशोभनाः त्रयोदशाक्षरा ये स्युर्मे
त्रः पञ्चदशाक्षरः ते सर्वे विफला ज्ञेया श
ते सार्धशतं तथा शतद्वयं द्विनवतिरेकदी
नाष्टकापि वा यावच्छतत्रयं संख्यानि स्तेदा
स्ते प्रकीर्तिताः चतुःशतमथारभ्य याव
द्वर्णसहस्रकम् अतिवृद्धः स मन्त्रस्तु सर्व
शास्त्रविवर्जितः सहस्रार्णाधिका वर्णाद :
ण्डकापीडिताह्वयाः द्विसहस्राक्षरा मन्त्रा
खण्डशः शतधा कृताः ज्ञातव्याः स्तोत्रकु
पाले मन्त्रा एते यथास्थिताः तथापि विद्याः
स्वबोद्धव्या मन्त्रिभिः काम्यकर्मसु दोषानि
मानविज्ञाय यो मन्त्रं जपते बुधः सिद्धिर्ने
जायते तस्य कल्पकोटिशतैरपि ब्रह्मदोष
प्नोति: तदर्के भैरवे छिन्नाहडाग्रस्तयोम

तं॰
सा॰
२२३
223

ग्रासलब्धेन तेनैव निष्कृपिताः तेसर्वे सिद्धिमाया-
न्ति मातृकार्णप्रभावतः मातृकार्णैः पुटीकृ-
त्य मन्त्रविद्याविशेषतः शतमष्टोत्तरं पूर्वं प्र-
जपेत्फलसिद्धये तदा मन्त्रो महाविद्या वा-
ञ्छितफलदा भवेत् मातृकापुटितं कृत्वा म-
न्त्रवर्णं निवाय च मन्त्रावर्णान्ततः कृत्वा शो-
धनं मन्त्रसंमतम् तथा ज्ञानयोनिमुद्रां ता-
सं कोणामारपंकजम् तदन्तज्ञान्मन्त्रवर्णै-
न्कुर्वन्नस्य प्रणतापदान् ब्रह्मरन्ध्रावधिं कृत्वा
वायुना पूर्वं कुंभयेत् सहस्रं प्रजपेन्मन्त्रं म-
न्त्रदोषोपशान्तये संप्राप्तेष्वेषु दोषेषु मया
काममथापि वा छिन्नाद्या दोषश्रियं चैव तद्दू-
षणविमुक्तये तथा तारसंपुटितो वापि
दुष्टमन्त्रोपि सिध्यति यस्य यत्र भवेद्भक्तिः
सोपि मन्त्रोपि सिध्यति तथा प्रणवो मातृ-
कादेवीद्भहोलेख्यास्यात्त्रयम् अमृतत्रयसं-
योगाद्दुष्टमन्त्रोपि सिध्यति ॥ अथ होमार्थं
कुण्डनिर्णयः ॥ तत्र तावत्कुण्डनिर्णयः गौ-
तमीये भूमेः परिग्रहं कुर्याद्यावदायतनं भ-
वेत् शुक्लमृत्स्ना तया भूमिर्ब्राह्मी सा परिकी-
र्तिता क्षत्रियारक्तमद्भूमिः हरिद्वैश्या प्रकी-
र्तिता कृष्णा भूमिर्भवेच्छूद्रा वर्णधर्मः प्रकीर्ति-
ता ब्राह्मी सर्वत्र सिद्धिः स्यात् क्षत्रिया राज्य-
दा भवेत् धनधान्यकरी वैश्या शूद्रा च निन्दिता

भवेत् गणेशादिमर्चिन्त्याम् वास्तोः संप्रश्ने
पूर्वस्यामैशान्यामुत्तरे पि वा दिक्षु संकल्प
येन्मंत्री मण्डपं च विभागतः नवदलप्रमा
णं वा समदलमथापि वा पंचदलप्रमाणं
वा चतुरस्रं समंततः पंचदलं तु एककुण्ड
पक्षे तदङ्कं तत्रैव एककुण्डमतेनान्यत्पंदलं
शुद्धं भवेत् तदेककुण्डं गृहस्योत्तरभागे प्रश
स्तं यथा प्रयोगतत्त्वे तथा कुण्डमेकं वेदाश्रम
इरेत् लब्धे होमे तत्तत्कुर्याद्गृहमध्ये नहूष
णम् यथा वसिष्ठसंहितायां वास्तोरीशा
नभागे तु मण्डपं रचयेत्सुधीः षट्हस्तदश
ष्टभिर्हस्तैः षोडशैर्वा समंततः चतुर्द्वारस
मायुक्तं तोरणाद्यैरलंकृतम् ॥ अथ प्रसंगा
न्नवकुण्डानि तत्र प्रकारद्वयम् प्राक्प्रोक्तम
ण्डपे विहाय वेदिकायावद्दिक्षु विदिक्ष्वथवा द्वे द्वे वि
भज्य मध्ये प्राक्पूर्वादि प्रविकल्पयेत् अष्टस्वा
शास्तु कुण्डानि रम्याकाराण्यनुक्रमात् च
तुरस्रं योनिमर्धचन्द्रं त्र्यस्रं सुवर्तुलम् षड
स्रं पंकजाकारमष्टास्रं तानि नामतः प्रा
च्यां कुण्डमध्ये स्याद्गौरीपतिमहेन्द्रयोः ह
स्तमात्रमितां भूमिं पूर्ववत्परिकल्पयेत् स
मंतात्कुण्डमेतत्तु चतुरस्रं सुशोभनम्
चतुरस्रीकृतं देवं पंचधा विभजेत्सुधीः
न्यमेत्सुरस्तादेकांशं कोणार्धप्रमाणतः

भ्रामयेत्कोणमानेन तथान्यदीपमन्त्रवित्
सूत्रयुग्मं ततो दद्यात्कुण्डयोनिनिभं भवेत्
चतुरस्रीकृतं देवि त्र्यंशं विभजन्सुधीः । ए
कमेकं त्यजेदग्रमथ ऊर्ध्वं च तन्त्रवित् । न्यासं
त्रिपातयेदग्रे तन्मानाद्भ्रामयेत्ततः । अर्धचन्द्र
निभं कुण्डं रमणीयमिदं भवेत् । अग्रे संसृवे
वृत्तिमष्टाकारयन्तु वेदनिराचवबद्धया
ख्यानात् तथा च न्यसेत्त्रंपातयेदग्रे कणाग्रा
न्तयोस्ततः । वर्त्तुलाभे दिने देवि न्यसेदुभय
पार्श्वयोः । एकैकं संपातन्मानाद्भ्रामयेल्लां
येत्ततः । सूत्रयुग्मं व धः ऊर्ध्वाद्यथा तत्र सृ
दाकृतम् । अष्टादशांशं देवि न्यसेदेकं बहि
र्बुधः । भ्रामयेत्तेन मानेन वृत्तं कुण्डं सुदाकृते
अष्टधा विभजेत्तत्र मध्ये सूत्रस्य पार्श्वयोः । भा
गं न्यसेदेकमेकं मानं तन्मानेन मध्यतः । ऊर्ध्वा
त्पार्श्वद्वये मन्यच्च तन्त्रकं मन्त्रवित्तमः । सू
त्रषट्कं ततो दद्यात्षडस्रं कुण्डमुत्तमम् । च
तुरस्रीकृतं देवि विभज्याष्टादशांशतः । एकं
भागं बहिर्न्यस्य भ्रामयेत्तेन वर्तुलम् । वृत्तानि
कर्णिकादीनां बहिः सीलिप्रकल्पयेत् । पद्म
कुण्डमिदं प्रोक्तं विलोचनमनोहरम् । बहि
र्वृत्तिमध्ये बहिःशोहोमध्यवा च कोणयाना
मनेकार्थत्वादिति निर्णयः । कृत्वैकं पूर्ववद्वृत्तं
न्मध्ये वर्तुलत्रयम् । भ्रामयेत्पंकजाकारं कार्यं

कारयेत्कर्णिकादिभिरितिक्रियासारव
चनाच्च अन्वयसामानाधिकरण्यपत्तेः कर्णि
कादीनिष्टमानिवर्द्धिर्बहिः कुर्यादितिभट्टः
तथा चतुरस्रेष्टधाभक्ते कुर्याद्वृत्तचतुष्ट
यम् कर्णिकाकेसराभ्यां हेतुनीयेपत्रका
न्यथ तदग्राणि चतुर्थे स्पृष्टेत्तान्येवं प्रक
ल्पयेदित्यपि भट्टः पूर्वोक्तं विभजेत्क्षेत्रं
चतुर्विंशतिभागतः एकभागं वहिस्त्यक्त्वा
चतुरस्रं प्रकल्पयेत् अंतस्य चतुरस्रस्य
कोणार्धार्धप्रमाणतः वाह्यस्य चतुरस्रस्य
कोणभ्रमं परित्यज्य कुर्यात् दिक्षु प्रतियथा
न्याय मध्योत्सूत्राणि पातयेत् अष्टास्रं कुर
ष्व मेतद्धि तन्त्रविद्भिरुदीरितम् कुण्डानां
यादृक्प्रमाणं मेखलानां चतारश्यम् ए
वंप्रोक्तानि कुण्डानि कथ्यन्ते स्रुक्स्रुवौ त
तः प्रकल्पयेत्स्रुचं यागे वक्ष्यमाणेन व
र्त्मना श्रीपर्णीशिंशपाक्षीरवृक्षाविकङ्क
तसंभवः पृथ्वी विभजेद्धस्तमात्रं षट्त्रिंश
ताङ्गुलः हस्तमात्रं बाहुमात्रं तथा चाग
स्य स्रुचं बाहुप्रमाणेन द्रोमार्द्धं विदधी
त वे विंशत्यंगुलो भवेत्कुण्डे वेदिस्तेरष्टभिर्भ
वेत् एकाङ्गुलेन मितः कण्ठः समभागमितं
स्तु खम् वेदीत्र्यंशेन विस्तारः कण्ठस्य परिकी
र्तितः अग्रे कण्ठसमाने स्यान्मुखे मार्गे प्रक

तं॰
सा॰
२२५

ल्पयेत् कनिष्ठाङ्गुलिमूलेन सर्पिषो नि-
गमायत्र वेदीमध्ये विधानज्ञो भागेनैकेन
कर्णिका विपरीतबहिर्लग्ना एकांशेन नाभि-
तो वटम् तस्याबाह्ये त्रिभिर्भागैस्तत्र मध्यात्
तो बहिः अंशेनैकेन परितो दलानि परिक-
ल्पयेत् मेखलामध्यवेद्योः स्यात् परितो यो-
शमानतः दण्डमूलाग्रयोः अंशैर्गुणवे-
दाङ्गुलैः क्रमात् गलीयुग्मं यमांशैः स्यात्क-
ण्डस्थानादर्द्धवितः षड्भिरंशैः १९ भागे
वेद्याः क्रमाकृतिर्भवेत् हंसस्य वा दलिनो वा
पो त्रिकोणवामुखं लिखेत् सर्वस्य १९ भागे
स्याः समप्रोक्तं ललाटं स्तवः स्तब्धश्च गवि-
शानि त्रिभागे रचयेद्ध्रुवम् द्वाविंशत्पाद-
ण्डमानं संरचेत्तस्य कीर्तितम् चतुर्भिरंशै-
स्तनादः कर्णौ ज्यत्रादि नद्धिरः अंशार्धये
न लिखेन्नेत्रं के मृगपदाकृतिः दण्डमूला-
ग्रयोर्गण्डी भवेत्स्कन्धकण्ठभूषिता तयोरभावे
वासिष्ठे पलाशपत्रे निश्छिद्रे तत्र चिरे स्तककल-
वीतच्या विदध्यात्तत्रपत्रे संद्धि मे दोमक
मेलि प्रथमकाण्डानां विशेषफलानि निब-
न्धे ॥ सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृत-
म् पुत्रप्रदं योनिकुण्डमर्धेन्दुं शुभप्रदम्
शत्रुक्षयकरं कुण्डं त्र्यस्रं वर्तुलं शान्तिकर्म-
णि छेदमारणयोः कुण्डं षडस्रं पद्मसन्निभं

वृष्टिं रोगशमनं कुण्डमष्टास्रमीरितम् ॥
अथ काम्यहोमार्थं कुण्डनिर्णयः ॥ तदुक्तं
सिद्धसारस्वते ॥ शान्तौ पुष्टौ तथा रोगे कुण्डं
चतुरस्रकम् आकर्षणे त्रिकोणं स्यादुच्चा
टे वर्तुलं तथा मारणे च तथा योज्यं वर्तुलं
मन्त्रिभिः सदा ॥ तन्त्रान्तरे ॥ उदीच्यां पौष्टिकं
कुण्डं वारुणे शान्तिकादिषु उच्चाटे चानिलं
कुण्डं याम्ये च मारणे भवेत् तथा विप्राणां
चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते वैश्यानां
मर्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् चतुर
स्रं तु सर्वेषां केचिदिच्छन्ति तान्त्रिकाः चतु
रस्रमदुष्टानि सर्वकर्माणि साधयेत् ॥ त
था ॥ सर्वाधिकारिणां कुण्डं सर्वदं चतुर
स्रकम् गृह्यादिकरणे तु न नियमो यथा ॥
गौतमीये वृत्यादिदोलिकां चैव पोतं सकल
मेव च मानाङ्गुलेन कर्तव्यं नान्येनापि क
दाचन मण्डपं रत्निप्रमाणं नियत्किंचित्क
थितं नान्यथापि यजमानस्य कर्तव्यं नान्यस्यापि
कदाचन तथा मानक्रियायां मन्त्रायाम
त्तैर्मानकर्तरि मानकृद्यजमानः स्यादि
त्थमेष विनिर्णयः चतुर्विंशत्यङ्गुलात्मकहस्तं
तत्तु विदो विदुः कर्तुर्दक्षिणहस्तस्य मध्यमा
ङ्गुलिपर्वणः मध्यस्य दैर्घ्यमानेन मानाङ्गुल
मुदाहृतम् ॥ यजमानासन्निधौ पुनः ॥ ॥

ते॰ स॰ २२८

226

यवानां तूदरैरेकमङ्गुलं चाष्टभिर्भवेत् प्र
दीर्घयोजितैर्हस्तश्चतुर्विंशतिरङ्गुलैः वयसो
ऽत्र मे पुनः अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्त
भिर्यवैः कनिष्ठं षड्भिस्तद्धि ष्ठमङ्गुलं मतिस
त्तम सहस्रे वेदहोतव्ये ऽयुतार्धे तु कुण्डं करात्म
कम् द्विहस्तमयुते तस्मिन् लक्षहोमे चतुष्करं
षट्करं वेदलक्षे चाष्टकरे दशलक्षकम् द
दशहस्तं तु कोटौ वै हस्तसंख्या व्यवस्थिता
दशहस्तात्परं कुण्डं नास्ति होमे महीतले
शारदायाम् कोटावष्टकरं स्मृतमिति ॥
द्रव्यस्य गुरुत्वाल्लघुत्वेन योऽद्रव्यम् तथा ॥
एकहस्तमितं कुण्डं लक्षहोमे विधीयते प्र
ज्याज्यहोमे लघुद्रव्यकरवीरादिहोमे वै
द्रव्यम् तथा मुष्टिमात्रमितं कुण्डं शतार्धे
चतुष्चते शतहोमे रत्निमात्रं हस्तमात्रं सहस्र
के द्विहस्तमयुते लक्षे चतुर्हस्तमुदाहृतम्
दशलक्षे तु षड्ढस्तं कोटावष्टकरं स्मृतमि
ति एकहस्तमितं कुण्डं लक्षमेकं विधीयते
लक्षं दशकं यावत्तावद्धस्तेन वर्धयेत् द्वि
हस्तादि कुण्डानां तु गौतमीये ॥ पूर्वपूर्वस्य कु
ण्डस्य कोणाग्रसूत्रं तु यद्भवेत् उत्तरोत्तरकुण्डा
नां मानं तद्धि दीरितम् तथा कर्णसूत्रप्रमा
णेन द्विहस्तं कारयेत् सर्वकुण्डप्रमाणं
वर्धयेद्विधिना मना कुण्डकर्णैर्विशेषमा

द्गोतमीये ततः कुण्डं खनेन्मन्त्रीयथाण
ह्विधानतः न्यक्कासर्पस्यगात्रंचच्छिरोदे
शंप्रयत्नतः शिरोयातेभवेन्मृत्युः पिण्ड
भुपिण्डपातनम् पुच्छेतडः खेसंभूतिः क्रो
डेसर्वार्थसाधनम् नागशिरादिनियमोय
था ॥ वास्तुप्रमाणेनतगात्रकेनवामेनशे
तेखलुनित्यकालम् त्रिभिस्त्रिमासैः परि
वृत्यभूमौतंवास्तुनागंप्रवदन्तिसिद्धाः भा
द्रादिकेवासवदिक्शिराः स्यान्मार्गादिकेषु
त्रिषुयाम्यमूर्धा प्रत्यक्शिराः स्यात्खलुफा
ल्गुणादौज्येष्ठादिकौबेरशिरास्तुनागः या
वान्कुण्डस्यविस्तारः खननंतावदिष्यते ॥
खाताधिकेभवेद्रोगीखातहीनेधनक्षयः
वक्त्रकुण्डेषुसंतापोमरणंछिन्नमेखले मे
खलावृद्धितेशोकोऽधिकेवित्तसंक्षयः
भार्यानाशकरंकुण्डंप्रोक्तंयोन्याविनाकृ
तम् अपत्यध्वंसनेप्रोक्तंकुण्डंयत्कण्ठवर्जि
तम् सात्विकीमेखलापूर्वाद्वितीयाराज
सीस्मृता तृतीयातामसीप्रोक्तामेखला
नोक्तनिर्णयः कुण्डानांमेखलास्तिस्रोम
ष्टिमात्रेन्नताः क्रमात् तत्सदायामतोहे
याह्योकार्याङ्गुलसन्निभा अरत्निमात्रेकुण्डे
भुवित्र्येकात्मिकाष्टाङ्गुलाः एकहस्तमिते
कुण्डेवेदाग्निनयनाङ्गुलाः कुण्डेद्विहस्ते

ते॰
सा॰
२२७

नाभेर्यावस्थवेदगुणांगुलाः चतुर्दशोन्नता
मेयावस्तनके युगांगुलाः कण्ठे रसकरोन्म
लपंचन्यष्टांगुलाः क्रमात् वसुदशमिते
कण्ठे भागत्रयं न्यष्टकांगुलाः दशादशमिते
कण्ठे मत्रभागत्रदशांगुलाः विस्तारोऽन्नाथ
तोऽस्येया मेखलास्सर्वतो बुधैः द्वोनरश्रेयोनि
रसास्मपर्ययस्वद्ररूपत्रवत् मेखलानां भवेदं
तः परितो नेमिरंगुलात् एकदलस्य कण्ठ
स्य वर्धयेत्तां क्रमात्सुधीः दशादलान्नम
ध्यमं योगलवयुगान्नृश्यक एकदलस्येकं
लांतकस्य नाभियोन्यारेकमानस्य द्दष्टवा
न् गोतमीये प्रथमे मेखलेयोनिं कण्ठोर्ध्वे
द्वोनरेश्रतः कुर्यात्लोष्ठवत्तां कण्ठे विस्ता
रे लक्षणम् मत्स्यरत्नैकस्नानां कण्ठमंधी
निरीरिता घट्चतुर्द्वांगुलायाममविस्तारा
वतिधारिणी एकांगुलेनयोन्यग्रे कुर्याद
घटयोमुखम् एकैकांगुलितोयोनिं कण्ठे
छन्नेपवर्धयेत् यवद्वयप्रमाणेन योन्याग्र
मपिवर्धयेत् गणेशविमर्शिन्याम् मेख
लानां बहिस्स्थानं स्थलमित्यभिधीयते
वनरम्रस्थलात्वं नालमध्ये सरन्धकं
स्थलमन्लेन सन्नामाग्रेन नालं स्यान्म नो
हरम् वाहस्थमेखलाबाहस्थलादारभ्य
कारयेत् तथा स्थलादारभ्यनालस्या

योनिमध्ये सरन्ध्रकम् सरन्ध्रमित्युभयत्र
सम्बध्यते तदुक्तं गौतमीये स्थूलादारभ्य
नालं स्यात्सरन्ध्रं योनिमध्यतः स्थूला
ग्रस्थूल ... सरन्ध्रं नालमिष्यते यो
न्यामध्ये विलं कुर्यात्तदाश्वग्रादिसंज्ञकम्
मध्यतो मध्यपर्यन्तमित्यर्थः तथा च वाशि
ष्ठे हस्तोन्नता गजोष्ठवच्छिद्रा मध्यमोन्न
ता सरन्ध्रमिति मध्यमेखलायामिति शे
षः तथा च नालमेखलयोर्मध्ये परि
धिस्थापनाय च रन्ध्रं कुर्यात्तथा विहा
द्वितीयमेखलोपरि परिधिस्तु बाहुमा
त्राः परिधयः कार्या वस्त्रवेष्टिताः मुष्टरते
कद्रस्वानां नाभिरुत्सेधभावतः नेत्रवेदां
गुलोत्सेधां कुण्डेष्वुत्सेधं वर्धयेत् यवद्वय
प्रमाणेन नाभिं हस्तयुगदायधीः योनिकु
ण्डे योनिमब्जकुण्डे नाभिं विवर्जयेत् ना
भिस्थले त्रिपाकृत्वा मध्ये कर्णिकाम्
बहिर्वेष्टयेन्नाभ्यो पत्राणि परिकल्पये
त् नवकुण्डे पद्मे योनिमादशेत् शोभे
इन्द्राग्नियमदिक्कुण्डे योनिः सौम्यमुखी
स्मृता योनिः पूर्वमुखोन्येषु पूर्वेणान्येन
तास्मृता इत्थमास्थिते लेखां संदेयेद्धोम
कर्मणि श्रेयत्नोत्सेधसंयुक्तं वलयं समं
ततः आदाय दद्यात्पाणौ स्वयोनिमधुरं द

तं· सा·
२२८

228

वि: प्रमुखो वह्निजायान्तेन जुहुयात्सुधाशि
ना नमोन्तेन नमो दद्यात्स्वाहान्तेन हि ठमेव च
पूजयामाहुतौ चापि सर्वत्रायं विधिः स्मृतः
नमोन्त इति पौराणिकमन्त्रपरम् तथा च ब
लपुराणे ऐकारादिसमायुक्तं नमस्कारान्त
कीर्तितम् एतन्नाम सर्वदेवानां मन्त्र इत्यभि
धीयते यथा इदं पाद्यं ॐ आदित्याय न
मः इदमर्घ्यमादित्याय नम इत्यादि तन्त्र
ॐ आदित्यायेदं पाद्यं सूर्याय नम इत्यादि।
तान्त्रिकेन नायं नियमो ह्रौं देवैवमस्य स्यात्
किन्त ह्रीं नमः ॐ गूं नमः इत्यत्र द्व्यादेर
पि वेस्यावश्यकत्वात् मन्त्रेणोंकारयुक्तेन
स्वाहान्तेन विचक्षणः स्वाहावमाने जुहु
याद्ध्यायन्वै मन्त्रदेवताम् ॐकारयुक्तेनेति
इदमपि वैदिकमन्त्रपरमन्यथा मन्त्रान्तरप्रसं
गात् तेन स्वाहान्तमन्त्रेण स्वाहान्तरप्रवक्त
व्यं एवं न पंचांगुलीन्यक्ताशं खमुद्रयाधा
र्यं तथा च पंचांगुलवद्धिस्यक्ताधारयेत्स्रु
खमुद्रया यत्र होमे संख्या नोक्ता तत्र संख्याः
त्वकौ शतं साष्टसहस्रं वाजपादिषु अथ हो
मप्रयोगः आचार्योलंकृतो यागमण्डपद्वार
मागत्य सामान्यार्घ्यपूजां च विधाय गृहं प्र
विश्य तत्तत्कल्पोक्तदेवतामेशान्यादिशि क
लशमाणं वैदिकं विधाय तदुपरि यटं संस्था

ष्पपद्याशक्तिं सम्पूज्य वीक्षणादिभिः कुं-
संस्कुर्यात् तथा च ब्रह्मसंहितायां होमसं-
काले येष्ठान्यां वेदिकां हस्तविस्तारेणोन्नति
शालिनीम् कृत्वास्मिन् स्थापयेत्कुम्भं यथा-
थोक्तक्रमयोगतः तत्र संपूजयेद्देवं यथा
विध्युपचारकैः ततो होमं प्रकुर्वीत देवता
सन्निधानतः वीक्षणं मूलमन्त्रेण शरेण
ताडनं सतम् तेनैव प्रोक्षणं कार्यं वर्मणा
भ्युक्षणं मतम् अस्त्रेण रक्षणं कृत्वा ततः
संस्कारदशारभेत् विशेषस्तनीलनं त्री-
मूलमन्त्रेण कुण्डं तां वीक्षणं कुण्डसंस्कृ
तम् ततो मूलमस्त्राय कुण्डयतनम इति
वदेत् कुण्डमध्ये प्रागग्रा उदगग्रास्तिस्र-
स्त्रो रेखाः कुर्यात् प्रागग्रेषु मकुरेष्व
रशां ब्रादक्षिणेन सम्पूज्य उदगग्रेषु ब्र
त्वेवं स्त्रीं च पूजयेत् सच्छपदे सर्वत्र-
षट्ताद्वीयोगः ॥ ऐं ह्रीं श्रीं क्लीं सौः ब्रह्मणे
नमस्त्यादि ततः कुण्डमध्ये षट्कोणं वृत्तं
त्रिकोणं तद्बहिर्वृत्तं दलपद्मं तद्बहिः स्वस्ति
रं च चतुर्दारसमेतां मध्ये ह्रीं वीजं लिखेत्
तदुपरि मूलेन प्रणवं जलिंदत्वा सच्छरी
पदे बालायास्ततः सर्वाणि प्रणवेन भ्यु-
त्पयोगपीठमर्चयेत् तथा कालिको
पनि आधारशक्त्यादीन् सम्पूज्य प्रागादिको

तं·
सा·
२२५
229

णेषु ॐ धर्मायनमः एवं ज्ञानवैराग्याय ऐश्व
र्याय पूर्वादिदिक्षु ॐ अधर्मायनमः एवं अ
ज्ञानाय अवैराग्याय अनैश्वर्याय मध्ये अन
न्ताय पद्माय अं सूर्यमण्डलाय द्वादशकला
त्मने उं सोममण्डलाय षोडशकलात्मने मं
वह्निमण्डलाय दशकलात्मने ततः केसरे
षु पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलि
ङ्गिनी रुचिरा ज्वालिनी एताः पूर्वादिमध्ये
च पूजयेत् ततो वज्रासनायनमः ततः वा
गीश्वरीमृतुस्नातां नीलेन्दीवरसन्निभाम् ॥
वागीश्वरेण संयुक्तेति ध्यात्वा ह्रीं ऐं वागीश्व
रायनमः ह्रीं वागीश्वर्यै नमः इति मन्त्रेण पंचो
पचारैः सम्पूज्य सूर्यकान्तादिसंभूतं श्रोत्रि
यगेहजं वा वह्निमानयेत् गौतमीये पाषा
णभवमग्निं च यदि वा वारणसंभवम् श्रोत्रि
याणां गेहजं वा तस्य मध्यवाहयेत् यदृच्छा
लाभसंप्राप्तो सर्वयोग्यो यागकर्मणि निर
ग्निर्वा लक्षणालब्धो सर्वलाभकरो भवेत् ह
तुरीयपदे कामेश्वरकामेश्वरीं पूजयेत् ल
थः दत्वा स्वनर्थ्यां पुष्पफलं दद्याद्दुत्वा पूर्णः ३
एणप्रद्धात्र विफलं जायते होमकर्मतः ॥
तस्मात्सर्वप्रयत्नेन वह्नियुक्तं समाहरेत् ए
वं वह्निं प्राप्ते त्रिति दिष्यकस्यादौ कुंडं परित्यजेत्
ततोग्निर्वीक्षणादिभिः संस्कृत्य ॐ दर्यवैश्वा

ग्निभं भौमस्य वह्नेरैक्यं विभाव्य रं वह्निचैतन्
न्यं कल्पयामीति पठन् कचैतन्यं निधाय ओं
कारेणाच्छादनं रक्षणमभिमन्त्र्य धेनुमुद्रयामृ
तीकृत्य फडिति संरक्ष्य इत्यवगुण्ठ्य गन्ध
पुष्पादिभिः रं वह्निमूर्तये नमः इति नमभ्य
र्च्य ज्रण्डस्योपरितः परिभ्राम्य प्रणवेनोत्था
रश्र्वं कं जानुपृष्ठे महीतलः शिववीर्यधि
यात्मानोभिमुखं देव्या योनावेन क्षिपेत्।
ततो वागीश्वरवागीश्वरीभ्यामाचमनादि
कं दत्त्वा तथा गर्भधृतं ध्यायेत् वह्निरूपां
न्देवताम् पश्चाद्गर्भस्य दत्तार्घ्यं प्रदद्याद्ग
र्भकंकणम् चित्पिंगल हन २ दह २ प
च सर्वज्ञाज्ञापय स्वाहा इति मन्त्रेणा वह्निं
प्रज्वालयेत् ततो बद्धाञ्जलिः सन् अग्निं
प्रज्वलितं वन्दे जातवेदं हुताशनम् सुवर्ण
वर्णममलं समिद्धं सर्वतोमुखम् इत्यने
न वह्निमुपतिष्ठेत् ततो जिह्वान्यासं कुर्या
त् तद्यथा लिंगे सरयुं हिरण्यायै नमः
पायौ सर्वयुं गगनायै नमः मूर्ध्नि रवयुं र
क्तायै नमः वक्त्रे वरयुं कृष्णायै नमः घ्राणे
लवयुं सुप्रभायै नमः नेत्रे रयुं बहुरूपायै
नमः सर्वत्र यवयुं अतिरक्तायै नमः पदे स
र्वत्र एतास्मात् विको यागकर्मेह काम्यकर्म
सु पद्मरागा सुवर्णा भद्रा लोहिता श्वेता

ते. सा. २३०

230

रुमिनी करालिका एतारा जसयः क्रूरकर्म
ह विश्वमूर्तिः स्फुलिंगिनी धूम्रवर्णा म
नोज्वाला दीप्ताकराला काली एतास्ता
मस्यः न्यासस्तवीजयोगेन पूर्ववत् एवं म
वेत्रबोद्धव्यम् वह्नेरष्टौ च संयुक्ता मादियां
ताः सबिंदवः वह्नेर्मन्त्राः सप्तदिष्टा जिह्वा
नां सप्तदैशिकैः ततः करांगन्यासौ सदः
से सदस्ता चिषे अंगुष्ठाभ्यां नमः स्वः
स्तिपूर्णाय तर्जनीभ्यां स्वाहा उत्तिष्ठपुरु
षाय मध्यमाभ्यां वषट् धूमव्यापिनेऽना
मिकाभ्यां हुम् सप्तजिह्वाय कनिष्ठाभ्यां
वौषट् धनुर्धराय करतलपृष्ठाभ्यां फट् एवं
हृदयादिषु सर्वत्र प्रणवादि ततो मूर्तिमा
सः दक्षांसे ॐ अग्नये सप्तजिह्वाय नमः दक्ष
पार्श्वे ॐ अग्नये हव्यवाहनाय नमः दक्षकटे
ॐ अग्नये अश्वारूढाय नमः लिंगे ॐ अग्नये वै
श्वानराय नमः वामकक्षे ॐ अग्नये कौमा
रतेजसे नमः वामपार्श्वे ॐ अग्नये विश्वमुखा
य नमः वामांसे ॐ अग्नये देवमुखाय नमः
ततो वह्नेरासनं कल्पयामीति वह्नेरासनं क
ल्पयित्वा मूर्तिं तत्र विचिन्तयेत् इष्टां शक्तिं
स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयन्तं ज
पाभम् हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्व
ह्निं बद्धमौलिं जटाभिः ततो मेखलानाभ्यां

रिविभ्रद्वैलोक्ये: सुन्दरीपदे बालयापरिवि
ष्ठ मध्यमेखलायां गर्भपूर्वैर्दर्भैरग्रेणाम्रू
लेमाच्छादयेत्रिः परिस्तरेत ततः प्राचीनव
र्षैर्दिक्षुपरिधीन्विनिक्षिप्य तत्रप्रादक्षिण्ये
नब्राह्मादिदेवताः संपूज्याः पुनर्वह्निंध्यात्वा
नत्रपीठे आवाहनेनमंत्रेणगंधादिभिःपूज
येत् ॐ वैश्वानरजातवेद इहावहलोहिता
क्ष सर्वकर्माणिसाधयस्वाहा इदंपाद्यंवह्न
येनमः इत्यादिक्रमेणपूजयेत मध्येषट्को
णेषु सवयूं हिरण्यायैनमः षवयूं गगना
यैनमः पुवयूं रक्तायैनमः ववयूं कृष्णायै
नमः लवयूं सुप्रभायैनमः रवयूं बहुरूपायै
नमः यवयूं अतिरक्तायैनमः कर्मभेदेका
म्ये सरयूं पद्मरागायैनमः इत्यादि क्रूरकर्म
णि सरयूं विश्वमन्यैनमइत्यादि यद्वागणे
ष्विमर्धन्याम हिरण्यानमहेमाभास्थला
माणोदिशिस्थिताः वैदूर्यवर्णागगनाप्रा
च्यादिशिसमाश्रिता उद्यदादित्यसंकाशा
रक्ताजिह्वाग्निसंस्थिता कृष्णानीलाभसंका
शानैरृत्यांदिशिसंस्थिता सुप्रभापद्मरागा
भावारुणांदिशिसंस्थिता अतिरक्ताजपा
भासावायव्यांदिशिसंस्थिता बहुरूपायथा
सकोदक्षिणोत्तरतःस्थिता मेखलायां वा
केसरेषुयादि
मांऽप्येवमभिकांगांगी संपूज्य

ने.
सा.
२३१
231

कोणेषु मध्ये दिक्ष्वव ॐ सहस्रार्चिषे हृदयाय
नमः ॐ स्वस्तिपूर्णाय शिरसे स्वाहा ॐ उत्ति
ष्ठपुरुषाय शिखायै वषट् ॐ धूमव्यापिने क
वचाय हुं ॐ सप्तजिह्वाय नेत्राभ्यां वौषट् ॐ
धनुर्धराय अस्त्राय फट् ततः पूर्वादिदलेषु ।
ॐ अग्नये जातवेदसे नमः ॐ अग्नये सप्तजिह्वा
य नमः ॐ अग्नये हव्यवाहनाय नमः ॐ अ-
श्वोदरजाय नमः ॐ अग्नये वैश्वानराय नमः
ॐ अग्नये कौमारतेजसे नमः ॐ अग्नये विश्व
मुखाय नमः ॐ अग्नये देवमुखाय नमः इति
वह्निमूर्तीः प्राकिसलिकयारिणीः सम्पू-
ज्य लोकपालान् सम्पदिग्पूजयेत् ततो ह-
स्ताभ्यां स्रुवस्रुचौ गृहीत्वा तावधोमुखौ कृ-
त्वा त्रिवारं प्रताप्य दर्भानादाय यथाक्रमं त
दग्रमूलमध्यानि स्पृष्टाथ यथिनादक्षिणेन तौ
सेचोदपुनः प्रताप्य दर्भान् ग्रा विनिक्षिप्य
स्रुवं दक्षिणभागे कुम्भान्तरे स्थापयेत् तत
आज्यस्थालीमानीयात्र जमेन वारिणानो
संश्रोध्य तत्र स्यासाज्यं विनिक्षिप्य वीक्षणा
दिभिस्संस्कुर्यात् ततो वायव्यं गारमह
स्थ ते पुनः मन्त्रिमन्त्रेणाज्यस्थालीं विनिवे
शयेत् ततो दर्भयुगलं संस्पृश्याज्ये वह्निमान
लेह्निपेत् नमः इति मन्त्रेणा ततो दीप्तेन दर्भयु
गलेनाज्यं प्रज्वलमिति नीराजनं दर्भयुगमग्नौ ।

विसर्जयेत् ततः फडिति मंत्रेणाहृतेन ज्वलि
तान् भागान् दर्भान् समग्रो दीपयेत् ततो हुतं ग
हीत्वा पुनरग्राण्यग्रे संयोज्य जले स्पृष्ट्वा दक्षि
णहस्तोपरि भावनायोगखेनांगुष्ठोपकनि
ष्ठिकाभ्यां प्रादेशप्रमितौ दर्भौ पत्राग्रेणच्छि
न्ने पवित्रीकृत्य नम इति नखपर्वाभ्यामाज्यस्य
खेच्छन्तं संप्लवनं कुर्यात् ततः प्रादेशप्रमाणं स्त्र
स्थितदर्भद्वयं संगृह्योत्तरे दक्षिणाद्वौ भागौ कृत्वा
शुद्धपवित्रकस्य पदे होस्मरेत् ततो वामे इडाना
डी दक्षिणे पिंगला मध्ये सुषुम्णा ध्यात्वा होमं
कुर्यात् तद्यथा नम इति मंत्रेण स्रुवेण दक्षि
णभागादाज्यमादायाग्नेर्दक्षिणलोचने ओं
अग्नये स्वाहेति जुहुयात् ततो वामनेत्राज्यभा
दायाग्नेर्वामलोचने ओं सोमाय स्वाहा नम इ
ति कृत्वा ततो मध्यादाज्यमादायाग्नेर्भाललो
चने ओं अग्नीषोमाभ्यां स्वाहा नम इति जुहुयात्
ततो नम इति मंत्रेण स्रुवेणाज्यं दक्षिणभागा
दादाय वह्निमुखे ओं अग्नये स्विष्टकृते स्वाहेति
जुहुयात् सर्वत्राहुतिस्थानं ततो व्याहृति
होमः ओं भूः स्वाहा ओं भुवः स्वाहा ओं स्वः स्वाहा
ततो वैश्वानर जातवेद इत्यादि मंत्रेण त्रिवारं
हुत्वाग्नेर्गर्भाधानादिक्रियाः सम्पादयेत् तद्य
था गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातक
र्म नामकरणं निष्क्रमणमन्नप्राशनं चूडाकर

ते
सा०
२३२
93

णमुपनयनं महाव्रतमुपनिषत्स्नानं गोदानं
मुद्वाहकाले क्रूरकर्मणि मरणान्ते तथैव
शुभे चैव विवाहान्ता नामस्त्येना क्रूरकर्मसु तत्र
क्रमः ॐ अग्नये गर्भाधानं संपादयामि स्वाहा।
तिप्रतिकर्मणि क्रमेणाज्याहुतीर्जुहुयात् संद
दीपद्देति ॐ अग्नये गर्भाधानं कर्म कल्पयामि पुन
मः पक्वैकां चाहुतीं दद्यादिति कल्पसूत्रे ना
मकरणान्तं मूलदेवीं समभ्यर्च्य तन्नामकरणा
यव हुनेत्संयमबाणेन स्त्राहुतीनां त्रयं तथा
कामाग्नेस्त्वं हुताशनेति नमे कुर्यादनेन तस्म
ततो वह्नेः पितरौ सम्पूज्यान्मनि योजयित्वा
मूलाग्रमध्यचतुरस्त्रताः समिधः पंच मनसा
ध्यात्वा जुहुयात् ततो विघ्नेश्वरमंत्रेण दशा
हुतीर्जुहुयात् तद्यथा ॐ स्वाहा ॐ श्रीं स्वाहा
ॐ श्रीं ह्रीं स्वाहा ॐ श्रीं ह्रीं क्लीं स्वाहा ॐ श्रीं ह्रीं
क्लीं ग्लौं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॐ श्रीं
ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद स्वाहा ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद सर्वजनं स्वाहा ॐ
श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं
मे वशमानय स्वाहा तथैव प्रपंचसारे नाग
धैर्दशभिर्द्रव्यैः पूर्वसमन्वितैः मनुना ग
णपतेर्मनुना हुनेत्सर्वैर्द्रव्यैराहुतीः ततो देवता
याः पीठं च होमं समर्प्य वह्निं स्वपाणौ विसर्ज्य

पंचोपचारादिभिः संपूजयेत् सुदीपदेस्तथ
गासनमंत्रेणांगमंत्रेण संपूज्य ऐं ह्रीं श्रीं प्रकट
समस्तगुप्तगुप्ततरसम्प्रदायसम्प्रदायकुलकौ
लनिगर्भरहस्यातिरहस्ययोगिनीचक्रश्रीपा
दुकां पूजयामि नागादीन् ब्राह्म्यादिलक्ष्मा
दीशादिवज्रादींश्च पूजयेदिति विशेषः वह्नि
मूर्तिं मूलमंत्रेणाहूतेन पंचविंशतिमाहुती
र्जुहुयात् ततो वह्निदेवतयात्मना सहैक्यं
विभाव्य मूलेनानेनैकादशाहुतीर्जुहुयात्
ततस्तन्महदेवतायास्तेनावरणदेवताया एकै
काहुतीर्जुहुयात् पुनर्बीजाहुतिहोमं कुर्यात्
ततः संकल्पितं तन्त्रकल्पोक्तविहितद्रव्यैर्हो-
मं कुर्यात् तद्यथा वज्रयूपादजिह्वायां जुहु
यात् सर्वकर्माणि यतः समस्तसिद्धीनां साधि
का त्रयी वह्निरूपिकेति यामले काण्डमध्ये हि-
रण्याख्यावह्निरूपा कर्मणि कर्मणि गगनाख्या-
लक्ष्मना होरकाख्या हेमलोमता कृष्णाख्या
माराणे चैव सुप्रभा शान्तिकर्मणि उच्चाटनेति
रक्ताख्या वह्निरूपा सिद्धिदा ओं भूरग्नये पृथि-
व्यै महते स्वाहा ओं भुवो वायवेन्तरिक्षाय दिवा
महते स्वाहा ओं स्वरादित्याय दिवे महते स्वाहा
ओं भूर्भुवः स्वश्चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो म
हते स्वाहा काम्यहोमे गुलिनियमस्तु तत्रैव सं-
गृह्य संयोगाख्यां न्यपीठे जुहुयात् । शाहुन्नामि

ने॰ मा॰ १२३

233

वारणमनासांगुष्ठमूर्दया विद्वेषोच्चाटने-
चैवमारणेचप्रशस्यते प्रदेशिनीमध्यमाभ्यां
बाधोपयमनंभवेत् बहुमेयानयाभ्यांगति
नीतिपुष्पादिकेनथा आकर्षणानिसर्वा-
णिहृदादर्शगतानिच नर्जन्यनामिकायो-
गात्स्यादेवंभवेतिहि मोहनंचप्रकामंच
प्रीतिसंवर्धनंतथा प्रदेशिनीकनिष्ठाभ्यांस
र्वेमेनप्रसिद्ध्यति मोहनाकर्षणेचैववश्याभ
नोच्चाटनंतथा विधिप्रकेनमोहेननथाउ
च्चानुयोगतः सर्वेमंत्राःप्रसिध्यंतिमुद्रामंत्र
प्रयोगतः ततोहोमद्रव्याणिस्रुवेनस्रुविनि
धायतेनाच्छाद्यतेनाभोसंस्थाप्य ततःस्रुवं
मिस्यादिमंत्रेणमूलमंत्रेणचपूर्णाहुतिंदत्वा
होरस्तुइत्यादेवतामस्तुतासप्तनर्वाह-
तीऊनाग्रेर्जिह्वानामनीनामकेकाहुतिंदा-
यात् ततःपूर्ववमेखलायांद्भिःपरिषि-
च्यानतिसेहारमत्रइत्यावकंयोजयेत्पाप-
रिधीनसपरिस्तरानग्नोनिदिग्धेत विशेषस्तु
नैमित्तिकेकर्मणिपनात्ददहेनित्यकर्मणिवा-
ददहेत प्रायश्चित्ते नैमित्तिके दहमंत्रीनिने
तनकदाचन ततोदक्षिणातानीमालायाम
स्वर्णमयुतेरत्याहतेदशासवर्णकम दक्षि
णानप्रदानव्याय्याहोमेनत्याजयेत यदिदीक्षा
गहोमःस्यात्तदादेवतायागावरणदेवताया

होमांतरम् आज्याविनैस्तिलैः कल्पविहि
तद्द्रव्यैर्वा होतव्यं सहस्रं पूर्णं वाज्ञं कुर्यात् त
तः सुधीतं तं नाभ्यां स्नातं शिष्यं कुण्डान्तिका
मानीय दिव्यदृष्ट्या तं विलोकयन् श्रोत्रेण तं गुरु
रात्मनि संयोज्य षडध्वविशोधनं कुर्यात् तद्यथा
कुशाङ्गुष्ठेन शिष्यस्य पादे संस्पृश्य ॐ शोधय
यामि कलाध्वानं स्वाहेत्याज्याविनैस्तिलैर
ष्टाहुतीर्जुहुयात् गुह्यं स्पृष्ट्वा ॐ शोधयया
मि तत्त्वाध्वानं स्वाहा नाभिं स्पृष्ट्वा ॐ शोधाय
मि भुवनाध्वानं स्वाहा हृदयं स्पृष्ट्वा ॐ शोधा
यामि वर्णाध्वानं स्वाहा भालं स्पृष्ट्वा ॐ शो
धयामि पदाध्वानं स्वाहा मूर्धानं स्पृष्ट्वा ॐ शो
धयामि मन्त्राध्वानं स्वाहा सर्वगात्राहुतीर्जु
हुयात् एवं क्रमेणापरशिवे संहृत्य पुनः
सृष्टिवर्त्मनानन्तदाहुतिभिः क्रमेणाजनये
त्तद्यथा मन्त्राध्वा मन्त्राध्वानः पदाध्वा पदाध्वा
नो वर्णाध्वा वर्णाध्वानो भुवनाध्वा भुवनाध्वा
नः तत्त्वाध्वा तत्त्वाध्वानः कलाध्वा कलाध्वानः
एवं क्रमेणाजनयेत् ततो दिव्यदृष्ट्या तं शि
ष्यं विलोकयन् स्वनाडीस्थितं तं श्रोत्रेण तं शिष्यं नि
योजयेत् ततः शिवापूर्णाहुतिभिर्दीनादि
कर्म समाप्य पूर्वोक्तक्रमेणादीक्षां कारयेत्
इति होमविधिः अथ नित्यहोमपडले
भुजगावल्याम् नाजमाः शिवरात्रे मन्त्रेनाहुत

भिं

ने॰
सा
२३५

२३५

सुफलप्रदः नाविज्ञाय यजेत्कामांस्तस्मा-
त्रितयमाचरेत् पूजायाल्लभते पूजां जपात्सि-
द्धिर्न संशयः विभूतिं वाग्निकार्येण सर्वसि-
द्धिं विन्दति नीलतंत्रे नित्यहोमं प्रवक्ष्यामि स-
र्वार्थयेन विन्दति सपर्यां सम्यगापाद्य बलि-
पूर्वं समाचरेत् ततो जपं तर्पणं च चरेत्साधक-
सत्तमः बलिवैश्वादिकं चैव ब्राह्मणः समा-
चरेत् विधिवदग्निमानीय कृत्वा देव्या-
नमोस्तथा मूलमंत्रं समुच्चार्य कृत्वैवास्य-
ण्डिले पि वा भूमौ वा संस्कारेद्धि क्रियाहुतिं ति-
लेयेनतु स्वाहान्तेन त्रिधा कृत्वा षडंगहवनं
ततः नतो देवीं समावाह्य मूलेन षोडशोप-
चारैः कृत्वा तु बानमस्कृत्य विसृजेद्धृन्मं-
ले पंचामाद्येन विशेषः भैरवोक्तेन दूहो-
वाज्यान्विते स्तिलैः शुभैः पूर्वादिषु क्रमेणै-
व ततो होमं समाचरेत् अथात्र होमद्रव्या-
णां प्रमाणमभिधीयते कर्षमात्रं घृतं होमे
मे शुक्तिः मात्रं पयः स्मृतं उक्तानि पंचगव्या-
न्यानि तत्समानि मनीषिभिः तत्समं मधु-
दुग्धान्नमक्षमात्रमदाहृतं दधिप्रसृतिमात्रं
स्याल्लाजाः स्युर्मुष्टिसंमिताः एधुकास्तस्तु मा-
णास्तु मकमेतानि तथोदिताः गुडं पलार्थंमा-
नेस्यात्खंडं कंदानि तथा स्मृताः ग्रासार्थं वस्त्रमा-
नेस्यादिक्षुः पर्वांति विधिः स्मृतः एकैकं पत्रपु-

प्राणि तथा भूयानि कल्पयेत् कदलीफलमा
नं फलान्येकैकशो विदुः मातुलिंगं च बदूवे
एरंडपत्रं षट्खण्डं प्राथाकृतं ग्रहणं यथा नारिकेलानि खं
डितानि विदुर्बुधाः त्रिधाकृतं फलं बिल्वं कपि
त्थं खंडितं द्विधा उर्वारुकफलं होमे चोदितं खं
डितं द्विधा फलान्यन्यानि खंडानि समिधः सुदं
शांगुलाः दूर्वास्त्रियं समुद्दिष्टं गुडूचीचतुरंगु
ला व्रीहयोर्मुष्टिमात्राः स्युर्मुद्गामाषायवाश्चापि
तंडुलास्तु न दध्यांभाः कोद्रवा मुष्टिसम्मिताः
गोधूमा रक्तकलमा विहिता मुष्टिमानतः ति
लाश्चुलकमात्रास्तु सर्षिपास्तत्प्रमाणकाः ।
शुक्तिप्रमाणो लवणो मरिचान्यपि विंशतिः ।
ग्रं बदरमाने स्याद्रामठेन ससंस्मृतम् वद
नाशु कर्पूरकस्तूरी कुंकुमानि च तित्रिवी ।
बीजमानानि समुद्दिष्टानि दैविकैः प्रायान
माज्यहोमेषु निर्वाणं प्रोक्तं वस्तुषु असंस्थानगे
कुण्डे होमयेत्क्रियं पश्चिमे सर्वकर्मसु कर्णं होमं भवे
द्यापि नेत्रे त्र्यन्यवन्मदीरितम् नासिकायां मनः
पीडामस्तके धनसंक्षयः यतः काष्ठं ततः श्री
त्रैयं तेन्यमात्रनासिका यत्राल्पज्वलनं नेत्रं
नांगारज्वलनः स्थिरः यत्र प्रज्वलिता ज्वाला ति
हासाजानविदसः स्वर्णसिन्दूरबालार्ककुंकु
माक्षौद्रसन्निभः सुवर्णरेतसो वर्णः शोभनः
परिकीर्तितः मेरी वारिदहंसालीढ निनदोग्निः

ते.
सा.
२३५

शुभावहः नागचम्पकपुन्नागपाटलायूथि-
काजातिभिः पद्मैर्नीलेन्दीवरकल्हारसर्पिर्गुग्गुल-
सन्निभैः पावकसम्भूभोगं तथा रसकांसंश्चे-
दिभिः प्रदक्षिणास्यपकस्याकुत्राभाः शि-
खिनः शिखाः शुभदा यजमानस्य राज्यस्या-
पि विशेषतः ऊर्ध्वेन्द्रयवलोयमोवह्निः शोकः
शुभावहः कृशः कृष्णगतेर्वर्णो यजमानं
विनाशयेत् शोणेनाराष्ट्रं निहन्यात् स्वरोवा-
पसमस्निभाः खरा ह्रस्वमोवह्निर्धनिसर्वे-
विनाशकृत् पूतिगंधोऽरुणवह्नौहोतद्विः ख
प्रदोभवेत् छिन्नाहुता शिखाकुर्यादस्मे सं
नपरिदायम शुकपत्रनिभोधूमोः मोरा वत
समप्रभः हानिं तु राजानीनोगावो वक्रु हने
विरात् एवं विधेषु दोषेषु प्रायश्चित्तायदैशि-
कः मूलेनाज्येनअष्टकृत्यान्येव विप्राविमाकुतीः
इतिहोमप्रकरणम् पूर्णाहुत्याम् अथा-
भिभाषेते त्रैलिससम्पल्लं कर्मनक्षणम् सर्व-
तंत्रानुसारेणप्रयोगफलसिद्धिदम् शांति-
वश्यपुष्टिम्भनानिविद्वेषोच्चाटनेन तथा मार-
णानि शेषं तिषट्कर्माणिमनीषिणः रोग-
हत्याग्रहादीनां वामः शांतिरिनीरिता वश्यं
मनानां सर्वेषां विधेयत्वमुदीरितम् प्रवृत्ति-
रोधः सर्वेषां स्तम्भनंतदुदाहृतम् स्निग्धानां
द्वेषजननं मिथोविद्वेषणं मतम् उच्चाटनं स्व

देशादेर्भ्रशने परिकीर्तितम् प्राणिनां प्राण
हरणं मारणं तदुदाहृतम् षट्देवतादिकाला
दीन्ज्ञात्वा कर्माणि साधयेत् रतिर्वाणीरमाज्ये
ष्ठादुर्गाकालीयथाक्रमम् षट्कर्मदेवता:
प्रोक्ता: कर्मादौता: प्रपूजयेत् ईशाग्नेन्द्रनि
रतिवायवीनां दिशामता: सूर्योदयं समार
भ्यदिकादशाकंक्रमात् ऋतव: सुर्वसंताद्या
अहोरात्रे दिने दिने वसंतग्रीष्मवर्षाख्यशरद्हे
मंतशैशिरा: यथाक्रममजगारणाम् अथ
रात्रेपरकालेहेमंतश्च प्रभातकम् पूर्वाह्णो
ववसंत: स्यान्मध्याह्नेग्रीष्मएवच प्रावृट्का
लोपराह्ण: स्यात्प्रदोष: शिशिर: स्मृत: अथवा
उषायोगेचहेमंत: प्रभातेशिशिरागम: प्रहरा
र्धवसंतश्चग्रीष्मोमध्यन्दिनागमे तुर्ययामेवच
र्षाख्याशरदस्तंगतेरवौ हेमंत: प्रान्तिकेप्रोक्तो
वसंतेवश्यकर्माणि शिशिर: स्तम्भनेतथावि
द्वेषोग्रीष्मऋतु: प्रावृडुच्चाटनेतथाशरण्मा
रणाकर्माणि तिथिनियमस्तु पंचमीचद्वितीति:
पावतृतीयासप्तमीतथा बुधेन्दुवारसंयुक्ता
तेयाविद्वेषकर्माणि क्रमाच्चन्द्रपीनदद्य
मीमरुवारका उच्चाटनेतिथि:शुक्लाप्रदोषे
चविशेषत: चतुर्दश्यष्टमीकृष्णामावस्या
नथैवच शनिभौमदिनेयेताशस्तामारणाक
र्मणि बुधचन्द्रदिनेयेतापंचमीदशमीतथा।

ते॰
सा॰
२३६
236

पौर्णमासमेव विज्ञेया तिथिः स्तम्भनकर्मणि ॥ शु
भग्रहोदये ऊर्ध्वमुखानि च शुभोदये रौद्रक
र्माणि रिक्तार्केऽस्तु योगे च मारणम् ॥ जयेत्तु
वैशुखे वा श्वेतदक्षिणो चाभिचारके ॥ पश्चिमेन
भवेद्विद्यादानार्थं शान्तिके भवेत् ॥ तथाभिचा
रके कार्यो दक्षिणोऽस्य नामही ॥ वसनं लोहितं
प्रोक्तं मसी धूम्रं लोहितं स्मृतम् ॥ भूषणं लोहदं
वैणवामेन पूजनादिकम् ॥ नरलायविशेषे
ण मारणेऽस्तु त्रमीरितम् ॥ स्तनस्य शुद्धस्य मस्यदे
नैनमर्दमस्य च ॥ हृत्वा दमालां नमयं शान्तणो
व धर्मिष्ठान्ता मन्त्रं मन्त्रे गमणिभिर्जपेदा कर्म
कर्मणि ॥ साध्यके प्राप्त त्रपोनैस्त्वरं गरस्तोऽर्द्धैः
श्रुतमात्रो समामासाद्य विद्वेषोच्चाटने जपेत् ॥ पद्मा
स्वस्तिके भूयो विकटं कूर्मं स्वस्तिकं तु नः ॥ वज्रं भद्रं
कमित्याऽऽसनानि मनीषिणः ॥ पद्मासनं तु सं
योगस्थानं वीरं तु रेकयो ॥ विमस्य भूमौ संस्थाप्य
योमस्यं ऊर्ध्वासनम् ॥ श्मानि वक्ष्यामि पंड
द्राः क्रमतोत्तेयाः पद्मपाशादाहृयाः मस्ता
पूनि विज्ञेयाः शान्तिकादिषु कर्मसु ॥ जलपूर्णं
नि विधौ प्रोक्तं वश्ये पवह्निरुदीरितः ॥ स्तम्भने पृ
थ्वी घस्मा विद्वेषे व्योम कीर्तितम् ॥ उच्चाटने
स्तनो वायुर्मृत्योराग्निर्मारणो मतः ॥ नमः शून्यो मोद
येसमसकन्नमं मण्डलसंयुतम् ॥ ततकर्मविधान
वंशं त्रिणानि स्त्रिता ... पीतं शुभ्रसलिलं दी

णीक्ष्मामवाय्वहर्विर्भुजो वर्णास्सुर्मंत्रबीजानि ष
ट्कर्मसु यथाक्रमम् ग्रथनं च विदर्भश्च सम्पुटो
रोधनं तथा योगः पल्लवश्चेति विन्यासाः षट्सु
कर्मसु मंत्रार्णान्तरितो कृत्वा साध्यवर्णान्यथा-
विधि ग्रथनं तद्विजानीयाच्छान्तिके पौष्टिककर्म-
णि मंत्रार्णद्वयमध्यस्थं साध्यनामाक्षरं लिखेत्

प. विदर्भं स विज्ञेयो मंत्रिभिर्वश्यकर्मणि आद्य
न्ते च मंत्राः स्यात्साध्यो सम्पुटः स्मृतः एव स्ता-
म्भने प्रोक्तः सम्पुटो मंत्रवेदिभिः नाम्नश्चाद्यन्त
मध्येषु मंत्रः स्याद्रोधनं मतम् विद्वेषणविधाने-
न तत्र शस्तमिदमुत्तमम् मंत्रस्यान्ते भवेन्नाम योगः
उच्चाटने मतः अन्ते नाम्नो भवेन्मंत्रः पल्लवो मार
णे मतः सितरक्तपीतमिश्रकृष्णधूम्राः प्रकीर्ति
ताः वर्णानां मंत्रसंप्रोक्ता देवताः षट्सु कर्मसु मं
त्राणां लिखने द्रव्यं वेष्टने रोचने निषण्णा गहूयम-
विनोगा रामा रणो हविषाणि च धूपनानि लोन
पिंडानि धूम्रं रसपरसस्तथा मरुद्धूमस्त्रिकटुके
विषाष्टकमुदीरितम् देवताकालमुद्रादीन्सम
स्तान् विविदिषुः षट्कर्माणि प्रयुंजीत यथो
क्तफलसिद्धये कुलार्णवे उच्चाटने वषट्स्यात्कं-
हुंफडन्तं च मारणे स्तम्भने च नमः प्रोक्तं स्वाहा-
शांतिकपौष्टिके हेमंतर्पणयोः स्वाहा स्यात्पू-
जनयोर्नमः मंत्रान्ते योजयेन्मंत्री जपकाले यथा-
स्थितिः अस्यार्थः एतानि तत्कर्माणि जप

ने.
सा.
२३०
237

कालेमंत्रांतेयोजयित्वमंत्रीमंत्रंजपेत् होमादि
ष्वनायेनियमस्त्वाह होमेति कश्चित् तत्र श्र
भिकार्येजपेन्तेहानमः सर्वत्रवार्वेन शांतिपौ
ष्टिवशेद्वेषाकृष्टयुच्चाटनमारणे स्वाहास्वधाव
षट्हुंववौषट्फट्योजयेत्क्रमात् वश्याकर्षणे
ष्वनापनरेस्वाहाप्रकीर्तयेत् क्रोधोपशमनेष्व
मौप्रीतौयोजयेन्नमोवुधैः वौषट्समोहनद्वीप
पुष्टिमृत्युंजयेषुच फट्कारंछेदनेहुंफड्द्वि
ग्रहनिपातने पुष्टौचाप्यायनेवौषड्ग्रंथनेमति
नोकृतौ हुंकारंप्रीतिनाशेचछेदनेमारणेतत
था उच्चाटनेवविद्वेषेवषड्वाकृतौवषट् ग्रं
एतेशीपनकार्येषुनानालामेववषट्स्मृतः स्मृति
विशेषवचनाद्धामेष्वेवविधिःस्मृतः शांति
कादौतुत्रादिनियमः तत्रैव शांतिकेराजनीता
शेभूर्जपत्रेचवश्यके सर्वकार्येषुसौवर्णेकुर्यात्स्रु
ग्येतत्कर्पटम् त्रिकोणेशांतिकेप्रोक्तंपत्रंगोपत्र
वश्यके सर्वकार्येषुपद्मपत्रंकुर्यात्वाहुर्विभा
गेच शांतिकेलेख्यनीहेमीवावश्यादौप्रतिवि
पुष्टिका हेम्नासर्वाणिकार्याणिकुर्यात्स्रुगेका
कपुष्टिका गरुडेच शांतिकर्मस्यादश्वपवर्वाणि
कामदे देवालयेवसर्वाणिश्मशानेक्रूरकर्म
व श्रवणभूतानामुदयः दंष्ट्राकाराणिभूमिः पु
ट्योरुभयोरपि नोपयत्पावकस्यार्धगतिलि
येद्रनभवतः गतिर्योगेनाभवेत्सप्योपभूतानाना

दयः स्मृतः धरणीहृदये कुर्यात्तन्मन्त्रं वर्ण
मात्मवित् प्रान्तिके पौष्टिके कर्मन्तोयस्यसम
येवसः सारणादीनि मन्त्रे विपद्दोषात्
नादिकम् दोडादिना ध्याने शालमद्दये च विग्र
यस्तः भूतानां मेडलानि हृतेऽदिवस्तमखडिस्व
लोक्षितं मातरिश्वनः त्रिकोणे सालिकोपेतं व
कृत्वर्धेन्दु संयुतम् धम्मोजमम्भसो भूमेश्चतुर
श्रेसवज्रकम् ततद्भूतसमाभानि मेडलानि
विदुर्बुधाः वर्णैश्चैर्विनान्याङ्गः हृतनासा
हृतानि च सङ्कविपमहक्लसात्कोपि वि
घटं पयः पीताभूमि रित्यादि प्रयोगाने तत्
कलाणीवे एवलदं जपे मन्त्रं ध्यानन्यास समवि
तम् प्रयोगादोषप्रान्त्यर्थं मालमरहार्थ का
णाम् नवेत्फलेनवाप्नोति देवतापापमाभ्र
यात् यन्नुपिहृमारणं कुर्याश्चेद्युतं जपेत्
तत्रायप्रित्नपरम् ग्रथल वकवचनानि
निरूप्यन्ते वाणहीनं त्रे तमादोषगणावंपश्चा
न्त्रोत्रवासंहितांपठेत् श्रोते च पुणवं दद्यादि
न्युवाचादि पूरुषः एवं सर्वत्र विलेयो ह्यन्यथा
विफलं भवेत् तत्र प्रथमं भुवनेश्वरीकवचम्
श्रीदेव्युवाच भुवनेश पापघ्ने देव्यायाया विद्याः
प्रकाशिताः श्रुताश्चाधिगताः सर्वाः श्रोतुमि
च्छामि साम्प्रतम् त्रैलोक्यमंगलं नामकवचं य
त्पुरोदितम् ईश्वर उवाच पार्वति शृणु वक्ष्या

त्रै.
मा.
१३५
२३८

मिसावधानेनावधारय त्रैलोक्यमंगलंनाम
कवचंमंत्रविग्रहम् सिद्धविद्यामयंसर्वैश्व
र्यसिद्धिप्रदायकम् पठनाद्धारणान्मर्त्यस्त्रै
लोक्यैश्वर्यभाग्भवेत् त्रैलोक्यमंगलस्यास्य
कवचस्यऋषिः शिवः छंदोविराड्जगद्धा
त्रीदेवताभुवनेश्वरी धर्मार्थकाममोक्षेषुवि
नियोगःप्रकीर्तितः ह्रींबीजंमेशिरःपातुभु
वनेशीललाटकम् ऐंपातुदक्षनेत्रंमेह्रींपा
तुवामलोचनम् श्रींपातुदक्षकर्णंमेत्रिवर्ण
त्मामहेश्वरी वामकर्णंसदापातुऐंघ्राणंपा
तुमेसदा ह्रींपातुवदनंदेवीऐंपातुरसनंम
म वाक्पुटाचत्रिवर्णात्माकंठंपातुपरा
त्मिका श्रींस्कन्धौपातुनियतंह्रींभुजौपातु
सर्वदा क्लींकरौत्रिपुटेशानीत्रिपुटैश्वर्यदा
यिनी ओंपातुहृदयंह्रींमेमध्यदेशंसदाव
तु क्रौंपातुनाभिदेशंसात्र्यक्षरीभुवनेश्वरी
सर्वबीजंसदाप्रष्ठंपातुसर्ववशंकरी ह्रींपा
तुगुह्यदेशंमेनमोभगवतिकटिम् माहेश्व
रिसदापातुशंखिनीजानुयुग्मकम् अन्नपू
र्णसदापातुस्वाहापातुपदद्वयम् सप्तदशा
क्षरीपायादन्नपूर्णाखिलंवपुः तारंमायार
माकामःषोडशार्णास्ततःपरम् शिवस्याल
वंतःपातुविंशत्यर्णात्मिकासदा तारंदुर्गे
युगंरक्षिणिस्वाहेतिदशाक्षरी जयदुर्गाघन

स्पामापातु मोसर्वतोमुदा मायाबीजादिकावै
षाटक्षार्णोवतु यापरा प्रतत्म कांचनाभासा
नपडूर्णानलेवतु नारंक्रींडुंदुर्गायैनमोहाव
र्णात्मिकापरा शूंखेचक्रपञ्चवीणेथरामा-
ट्हिरोवतु महिषमर्दिनिस्वाहावसवर्णा
त्मिकापरा नैरन्यांसर्वदापातुमहिषासुर
नाशिनी मायापद्मावतीस्वाहासप्तार्णापा-
रिकीर्तिता पद्मावतीपद्मसंस्थापश्चिमेमां
सदावतु पाशांकुशपुटामायैह्रींपरमेश्व-
रिस्वाहा त्रयोदशार्णार्णेतारायासाश्वकदा
नलेवतु सरस्वतीपंचशिरोनित्यक्लिन्नेमद
णकल्पिततांडवस्य कोण्डपवङ्गः परभै
रवस्य पाणौ जितैः त्वरङ्गणास्तनपुच्छबा
णमात्रमालिनी विजयते तव मूर्तिरेका
२३ लग्नं सदा भवतु मातरिदं त्वदीयं तेजः
परं बहुलकुङ्कुमपङ्कशोणम् भास्वत्कि
रीटममृतांशुकलावतंसं मध्ये त्रिकोणमु
दितं परमामृताक्तम् २४ ह्रींकारत्रयसं
पुटेन महता मन्त्रेण सन्दीपितं स्तोत्रं यः प्र
तिवासरं तव पुरो मातर्जपेन्मन्त्रवित् तस्य
क्षोणिभुजो भवन्ति वशगा लक्ष्मीश्चिरस्था
यिनी वाणी निर्मलसूक्तिभावभरिता जा
गर्ति दीर्घं वयः ॥२५॥ इति श्रीवत्सचरि ॥
तं कल्याणस्तोत्रम् ॥ अथ किंकिणीस्तोत्रं
अथ स्तवं प्रवक्ष्यामि त्रिपुरार्णवसम्मितम् ॥
किंकिं दुःखं दृढं जगदखिलं दीयते न स्मृता
या काकाकीर्तिः कल्कमखिलं निःप्राप्यते ना
र्चितायाम् किंकिं सौख्यं स्वरवरं तु तेन प्राप्य
ते न स्तुतायां कं कं योगं न यान्ति न चिन्तितं चित्त
मात्वं चिन्तितायाम् १ सर्गे संसर्गसंरम्भ
स्फारितानेकविभ्रमे विश्वं नृमण्डलान्त
स्थे नमस्ते हरवल्लभे २ जगदाह्लादनो
द्योतभोगविन्यासयोगिनि स्थितिभा
वस्थिते देवि नमः स्थाणुप्रिये शिवे ३
भावाभावविपर्यासभावस्वभावोदयकर्मणि

चैतन्यपंचके देवि नमस्तुभ्यं हृदंगने ४
सन्ताभवभयध्वंसि श्रुतिनासिष्णुभंकरी
ल्लनात्वं वांछितं देवि ददामि करुणाकरे ।
परमानन्दबोधाचिद्रूपेतेनः स्वस्वरूपिर
णि देवबृन्दशिरोरत्ननिर्घृष्टचरणाम्बु
जि हि शांतिमदासत्तामात्रे मात्रेन मोस्तु
ते सृष्टिस्थित्युपसंहारबद्धेन श्रूले सनात
नि गुणत्रयात्मिकासित्वं जगतः कारणे
श्वया अनुग्रहाय भक्तानां गृहीतदिव्य
विग्रहे भक्तस्य मे नित्यवृजायुक्तस्य पर
मेश्वरि ऐहिकामुष्मिकीं सिद्धिं देहि वि
दशेश्वरिते नापत्रयपरिम्लानभाजनं
त्राहि मां शिवे नान्यं वदामि न शृणोमि न
चिंतयामि नान्यं स्मरामि न भजामि न ध्या
यामि भक्त्या त्वदीयचरणाम्बुजमादरे
णमां त्राहि देवि कृपया मयि देहि सिद्धिम्
अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधकस्य
यन्न्यूनमतिरिक्तं वा तत्सर्वं दातुमर्हसि इ
च्छाहीनं क्रियाहीनं श्रद्धामन्त्रविवर्जितं
तत्सर्वं [illegible] मर्हसि कृपयादेवि दमसत्वं
दयानिधे यन्मया क्रियते कर्म तत्सदा त्व
त्पमेव वा तत्सर्वं च जगद्धात्रि त्वन्मम
यमेजलिः ॥ इति किंकिणीस्तोत्रम् ॥
अथ त्रिपुरसुन्दरीकवचम् ॥ श्रीदेव्युवाच

श्री
ते. सा.
२६५
265

देवदेव महादेव भक्तानां प्रीतिवर्धनम्
सूचितं यन्महादेव्याः कवचं कथयस्व मे
श्रीमहादेव उवाच ॥ शृणु देवि प्रवक्ष्या
मि कवचं देवदुर्लभम् अप्रकाश्यं परं गु
ह्यं साधकाभीष्टदायकम् कवचस्य ऋ
षिर्देवि दक्षिणामूर्तिरव्ययः छन्दः पंक्ति
स्समुद्दिष्टं देवी त्रिपुरसुन्दरी धर्मार्थका
ममोक्षाणां विनियोगस्तु साधने वाग्भवः
कामराजश्च शक्तिर्बीजं महेश्वरि ऐं वाग्भ
वः पातु शीर्षे मां क्लीं कामराजस्तथा हृ
दि सौः शक्तिबीजं सदा पातु नाभौ गुह्ये
च पादयोः ऐं क्लीं सौः वदने पातु बाला मां
सर्वसिद्धये हसैं हसकलरीं हसैः पातु
भैरवी कण्ठदेशतः सुन्दरी नाभिदेशे
व्याच्छीर्षे कामकला सदा भ्रूनासयोर
न्तराले महात्रिपुरसुन्दरी ललाटे सु
भगा पातु भगा मां भगदेशतः भगोदया
तु हृदये उदरे भगसर्पिणी भगमाला ना
भिदेशे लिङ्गे पातु मनोभवा गुह्ये पातु म
हादेवी राजराजेश्वरी शिवा चैतन्यरूपि
णी पातु पादयोर्जगदम्बिका नारायणी
सर्वगात्रे सर्वकार्यशुभङ्करी ब्रह्माणी पातु
मां पूर्वे दक्षिणे वैष्णवी तथा पश्चिमे पा
तु वाराही उत्तरे तु महेश्वरी आग्नेय्यां पातु

कौमारी महालक्ष्मीश्चैन्द्री नैरृते वायव्यां पातु
चामुण्डा इन्द्राणी पातु चैशान्ये जले पान्तु मां
महामाया पृथिव्यां सर्वमंगला आकाशे पा
तु वरदा सर्वत्र भुवनेश्वरी इदं तु कवचं देव्या
देवानामपि दुर्लभम् यः पठेत्प्रातरुत्थाय
य शुचिः प्रयतमानसः नाधयो व्याधयस्त
स्य न भयं च क्वचिद्भवेत् न च मारीभयं तस्य
पातकानां भयं तथा न दारिद्र्यवशं गच्छे
त्तिष्ठेन्मृत्युवशे न च गच्छेच्छिवपुरं देवि स
त्यं सत्यं वदाम्यहम् इदं कवचमज्ञात्वा श्री
विद्यां यो जपेत्प्रिये स नाप्नोति फलं तस्याः
प्राप्नुयाच्छस्त्रघातनम् ॥ इति सिद्धयाम
ले त्रिपुरसुन्दरीकवचम् ॥ अथ महात्रिपु
रसुन्दरीकवचम् ॥ श्रीदेव्युवाच ॥ भगव
न्देवदेवेश लोकानुग्रहकारक त्वत्प्रसादा
न्महादेव श्रुता मन्त्रास्त्वनेकधा साधनं वि
विधं देव कीलकोद्धरणं तथा शापादिदू
षणोद्धाराः श्रुतास्त्वत्तो मया प्रभो राजरा
जेश्वरी देव्याः कवचं सूचितं मयि श्रोतुमि
च्छामि तत्त्वेन त्वं कथय स्वमयि प्रभो ॥ भैर
वः ॥ त्वत्तवारं सहस्राणि वारितासि पुनः
पुनः स्त्रीस्वभावाज्ज्ञप्यादेवि पृच्छसि त्वं मयि
प्रिये अतस्त्वन्तु गुह्यं कवचं सर्वकामफलप्रद ॥
म् प्रीतये तव देवेशि कथयामि शृणुष्व तत्

ते॰
सा॰
२६६
266

अस्य श्रीराजराजेश्वरी श्रीमन्महादेवी त्रिपु
रसुन्दरी षोडशी विद्याकवचस्य श्रीमहादे
व ऋषिः ब्रह्मा पंक्तिश्छन्दः राजराजेश्वरी
श्रीमहात्रिपुरसुन्दरी देवता सर्वार्थसा
धने विनियोगः ॥ पूर्वे मां भैरवी पातु बाला
मां पातु दक्षिणे मालिनी पश्चिमे पातु वा
सिनी उत्तरेवतु ऊर्ध्वं पातु महादेवी महात्रि
पुरसुन्दरी अधस्तात्पातु देवेशी पाताल
तलवासिनी आधारे वाग्भवः पातु काम
राजस्तथा हृदि डामरः पातु मां नित्यम
लके सर्वकामदः ब्रह्मरन्ध्रे सर्वगात्रे छि
द्रस्थाने च सर्वदा महाविद्या भगवती पा
तु मां परमेश्वरी ऐं क्लीं ललाटे मां पाया
ह्रीं श्रीं ब्लूं स्तु नेत्रयोः नासायां कर्णयोः
श्च ह्रीं ईं ह्रां ह्रीं चिबुके तथा सौः पातु गले
हृदये सः ह्रीं से नाभिदेशके कलह्रीं स्त्रीं
क्लीं गुह्यदेशे मह्रीं मे पातु पादयोः सह्रीं मां
सर्वतः पातु सक्लीं पातु वसन्धिषु जले स्थ
ले तथाकाशे दिवारात्रगृहे तथा हूं ह्रैं मां
वरितं पातु सह्रीं सक्लीं मनोभवा हूं सः पाया
न्महादेवी परं निष्कलदेवता विजया मंगला
दमी कल्याणी भगमालिनी ज्वाला च मा
लिनी नित्या सर्वदा पातु मां शिवा इत्येवं कव
चं देवि देवानामपि दुर्लभम् तव प्रीत्या मया

ख्यातं गोपनीयं प्रयत्नतः । इदं रहस्यं पर
मङ्गलाद्भुतं शिवे । धन्यं यशस्यमायुष्यं
भोगमोक्षप्रदं शुभम् । दुःस्वप्ननाशनं पुं-
सां नरनारीवशंकरम् । आकर्षणकरं देवि
स्तम्भोच्चाटकरं शिवे । इदं कवचमज्ञात्वा
राजराजेश्वरीं शिवाम् । योऽर्चयेद्योगिनीवृ-
न्दैः सभक्त्या नात्र संशयः । न तस्य मन्त्रसि-
द्धिः स्यात्कदाचिदपि शंकरि । इह लोके व
दारिद्र्यं रोगदुःखभयानि च । परत्र नरकं गा-
त्वा पशुपक्षियोनिमवाप्नुयात् । तस्मादेत-
त्सदाभ्यसेदधिकारी भवेत्ततः । सहस्रनि-
र्गतमिदं कवचं स्मरणं पूजाविधेश्चरतो
विधिना पठेद्यः । सौभाग्यभोगललिता-
नि शुभानि भुक्त्वा देव्याः पदं व्रजति तत्पु-
नरन्तकाले ॥ इति श्रीकुलानन्दसंहितायां
श्रीमहात्रिपुरसुन्दरीषोडशीकवचम् ॥
अथ प्रचण्डचण्डिकास्तोत्रम् ॥ नाभौ शु-
द्धसरोजमध्यविलसद्बन्धूकपुष्पारुणं भा-
स्वद्भास्करमण्डलं तदुदये योनिचक्रम-
द्गत् तन्मध्ये विपरीतमैथुनरतप्रद्युम्नत-
त्कामिनीपृष्ठस्थां तरुणार्ककोटिविल-
सत्तेजःस्वरूपां शिवाम् १ वामे छिन्नशि-
रोधरां तदितरे पाणौ महत्कर्त्रिकां प्रत्यालो-
ढपदां दिगन्तवसनामुन्मुक्तकेशव्रजाम् ॥

तं॰
सा॰
५६७
२६७

छिन्नात्मीयशिरः स्मरस्फुलदसृग्धारां पि
बन्तीं परां बालादित्यसमप्रकाशविलसन्नेत्र
योल्लासिनीम् २ वामादन्यत्र नालं बहुब
हुलगलद्रक्तधाराभिरुच्चैः पायन्तीमस्थि
भूषां करकमललसत्कर्तृकामुग्ररूपाम्
रक्तामारक्तकेशीमपगतवसनां वर्णिनीमा
त्मशक्तिं प्रत्यालीढैकपादामरुणितनय
नां ~~[illegible]~~ योगिनीं योगनिद्रा
म् ३ दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटा
घोररूपां प्रचण्डां दंष्ट्रादुष्प्रेक्ष्यवक्त्रोदरवि
वरलसल्लोलजिह्वाग्रभासम् विद्युल्लोला
क्षियुग्मां हृदयतटलसद्भोगिभीमां सुमू
र्तिं सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्डाकि
नीर्वर्धयन्तीम् ४ ब्रह्मेशानाच्युताद्यैः शिर
सि विनिहितामन्दपादारविन्दैरात्मज्ञैर्योगि
मुख्यैः प्रतिपदमनिशं चिन्तितां चिन्त्यरूपा
म् संसारे सारभूतां त्रिभुवनजननीं छिन्न
मस्तां प्रशस्तामिष्टां तामिष्टदात्रीं कलिकलु
षहरां चेतसा चिन्तयामि ५ उत्पत्तिस्थितिसं
हृतीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जगतो
यदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ताम
द्यां प्रकृतिं स्मरामि मनसा सर्वार्थसंसिद्धये
यस्याः स्मेरपदारविन्दयुगले लाभं भजन्ते स
राः ६ भास्वत्पीपितानस्रवन्ती भोगस्तनाया

हूंबद्धविधज्जलमार्गारंभमेसभाविनोदम्
प्रभुजनविमुखोहंभैरवीमाश्रितोहंगुरुच
रणरतोहंभैरवोहंशिवोहम् ७ ॥ इदंस्तोत्रं
महापुण्यंब्रह्मणाभाषितंपुरा सर्वसिद्धिप्रद
दंसाक्षान्महापातकनाशनम् यःपठेत्प्रा
तरुत्थायदेव्याःसन्निहितोपिवा तस्यसिद्धि
र्भवेद्देविवांछितार्थप्रदायिनी धनंधान्य
सुतंजायांहयंहस्तिनमेवच वसुंधरांमह
हाविद्यामष्टौसिद्धीर्लभेद्ध्रुवम् वैयाघ्रा
जिनरंजितास्वजघनेरम्येप्रलम्बोदरे खर्वे
निर्वचनीयपर्वसुभगेमुण्डावलीमण्डिते
कर्त्रीकुन्दरुचिंविचित्ररचितांज्ञानेदधानेप
देमातर्भक्तजनानुकम्पिनिमहामायेस्तु
तेभ्यंनमः ॥ अथकवचम् ॥ श्रीदेव्युवा
च ॥ कथितास्छिन्नमस्तायायायाविद्याः
सुगोपिताः त्वयानाथेनजीवेशश्रुतास्चा
धिगतामया इदानींश्रोतुमिच्छामिकवचं
पूर्वसूचितम् त्रैलोक्यविजयंनामकृपया
कथयप्रभो ॥ श्रीभैरवउवाच ॥ शृणुवर
दाभिदेवेशिसर्वदेवनमस्कृते त्रैलोक्यवि
जयंनामकवचंसर्वमोहनम् सर्वविद्यामयंसा
क्षात्सुरात्सुरजयप्रदम् धारणात्पठनादीशस्त्रै
लोक्यविजयीविभुः ब्रह्मानारायणोरुद्रोधा
रणात्पठनाद्यतः कर्तापातावसंहर्ताभुवना

तं॰
मा॰
२६८
268

नोमहेश्वरि नदेयं परशिष्येभ्यो भक्तेभ्योपिवि
शेषतः देयं शिष्याय भक्ताय प्राणेभ्योप्यधि
कायच देव्याश्छिन्नमस्तायाः कवचस्य च
भैरवः ऋषिर्विराट् छन्दश्च देवता छिन्नमस्ति
का त्रैलोक्यविजये मन्त्रो विनियोगः प्रकी
र्तितः हूंकारो मे शिरः पातु छिन्नमस्तानल
प्रभा ह्रीं हूं ऐं त्र्यक्षरी भालं पातु रक्तादिगम्ब
री श्रीं ह्रीं हूं ऐं दृशौ पातु मुण्डकर्तृधरापि सा
सा विद्या प्रणवाद्यन्ता श्रुतियुग्मं सदावतु व
ज्रवैरोचनीये हूं फट् स्वाहा च ध्रुवादिका घ्रा
णं पातु छिन्नमस्ता सा मुण्डकर्त्रि विधारिणी श्री
मायाकूर्चवाग्बीजैर्वज्रवैरोचनीये हूं हूं फट्
स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी स्वपा
र्श्वौ वालिकाभ्यां पातु शुहगयावं पाययन्ती सदा
वदनं सर्वतः पातु छिन्नमस्ता च शक्तिका मु
ण्डकर्तृधरा रक्ता साधकाभीष्टदायिनी व
र्णिनी डाकिनी युक्ता सापि मामभितोवतु
मायाः पातु जिह्वां च लज्जा या पातु कण्ठकं कू
र्चबीजाद्धृदयं पातु वाग्याद्यास्तनयुग्मकम्
रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी मा
यया पुटिता पातु नाभिदेशं दिगम्बरी कूर्चे
ण पुटिता देवी पृष्ठदेशं सदावतु वाग्बीजपु
टिता चैव मध्यं पातु सशक्तिका ह्रीं हूं वर्णि
नी जानुं श्रीं ह्रीं हूं च डाकिनी पदम् सर्वविद्या

स्थिता नित्या सर्वांगमे सदावतु प्राच्यां पायो
देवलिंगा योगिनी पावकेवतु डाकिनी दक्षि
णे पातु श्रीमहाभैरवी च माम् नैरृत्यां सततं
पातु भैरवी पश्चिमेवतु इन्द्राक्षी पातु वायव्ये
सिताङ्गी पातु चोत्तरे संहारिणी सदा पातु शि
वकोणे सकलेश्वरा इत्यष्टशक्तयः पान्तु दिग्वि
दिक्षु सकलेश्वराः क्रींक्रींक्रीं मां पातु पूर्वे ह्रूं
ह्रूं मां पातु पावके ह्रींह्रीं मां दक्षिणे पातु दे
क्षिणे कालिकेवतु क्रींक्रींक्रीं चैव नैरृत्यां
ह्रूंह्रूं मां पश्चिमेवतु ह्रींह्रीं पातु मरुत्कोणे ह्रें
ह्रा पातु मदोत्तरे महाकाली खड्गहस्ता रक्षः
कोणे सदावतु तारो माया वधूः कूर्चं फट्का
रोयं महामन्त्रः खड्गकर्तृधरा तारा चोर्ध्वदेशे
सदावतु ह्रीं स्त्रीं ह्रूं फट् पाताले पातु नीलस
रस्वती इति ते कथितं देव्याः कवचं मन्त्रविग्र
हम् यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः
प्रभुः सुरासुरमुनीन्द्राणां कर्ता हर्ता भवेत्स्व
यम् यस्याज्ञया मधुमती याति सा साधकालयम्
भूतिन्याद्याश्च ह्यदिण्यो डाकिन्यो
यो भैरवः शाक्तांगदूर्णान्तितां तस्य कवच
स्य प्रसादतः एतद्देवि परं ब्रह्मकवचं मन्मुखो
दितम् देवीमभ्यर्च्य गन्धाद्यैर्मूलेनैव पठेत्स
कृत् संवत्सरकृतायास्तु पूजायाः फल
मामुयात् भूर्जे विलिखितं चैतद्गुटिकां का

वनस्थितानाम् धारयेद्दक्षिणे वा दोःकण्ठे वा
यदि वाग्यतः सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं व
शमानयेत् तस्य गेहे वसेल्लक्ष्मीर्वाणी च व
दनाम्बुजे ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे या
न्ति सौम्यताम् इदं कवचमज्ञात्वा यो भजेच्छि
न्नमस्तिकाम् सोऽपि शस्त्रप्रहारेण मृत्युमा
प्नोति सत्वरम् ॥ इति श्रीभैरवतन्त्रे त्रैलोक्य
विजयं नाम छिन्नमस्ताकवचम् ॥ अथ
श्यामास्तोत्रम् ॥ कर्पूरं मध्यमान्तः स्वरप
रहितं सेन्दुवामाक्षियुक्तं बीजं ते मात
रेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति तेषां गद्या
नि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं
गतानाम् १ ईशानः सेन्दुवामश्रवणपरि
गतो बीजमन्यन्महेशि द्वन्द्वं ते मन्दचेता य
दि जपति जनो वारमेकं कदाचित् जित्वा वा
चामधीशं धनदमपि चिरं मोहयन्नम्बुजा
क्षीवृन्दं चन्द्रार्धचूडे प्रभवति स महाघोर
बाणावतंसे २ ईशो वैश्वानरस्थः शशध
रविलसद्वामनेत्रेण युक्तो बीजं ते द्वन्द्वमन्य
द्विगलितचिकुरे कालिके ये जपन्ति द्वेष्टा
रं घ्नन्ति ते च त्रिभुवनमभितो वश्यभावं नय
न्ति सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षि
णे कालिकेति ३ ऊर्ध्वं वामे कृपाणं कर

कमलनिलये छिन्नमुण्डं दधानां सव्ये भीतिं व-
रं च त्रिजगदघहरे दक्षिणे कालिके च जप्त्वै-
तन्नाम ये वा तव विमलतनुं भावयन्त्येतदं-
म्ब तेषामष्टौ करस्थाः प्रकटितवदने सिद्ध-
यस्त्र्यम्बकस्य ४ वर्गाद्यं वह्निसंस्थं विधुर-
तिवलितं तत्त्रयं कूर्चयुग्मं लज्जायुग्मं च प-
श्चात्स्मितमुखि तदधो ठद्वयं योजयित्वा
मातर्ये ये स्मरन्ति स्मरहरमहिले भावयन्तः
स्वरूपं ते लक्ष्मीलास्यलीलाकमलदलदृ-
शः कामरूपा भवन्ति ५ प्रत्येकं वा द्वयं वा त्र-
यमपि च परं बीजमत्यन्तगुह्यं त्वन्नाम्ना
योजयित्वा सकलमपि सदा भावयन्तो जपन्ति
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशु-
भ्रबिम्बे वाग्देवी देवि मुण्डस्रगतिशयल-
सत्कण्ठि पीनस्तनाढ्ये ६ गतासूनां बाहु-
प्रकरकृतकाञ्चीपरिलसन्नितम्बां दिग्वस्त्रां
त्रिभुवनविधात्रीं त्रिनयनाम् श्मशानस्थे
तल्पे शववहृदि महाकालसुरतप्रसक्तां त्वा
ध्यायेज्जननि जडचेताप्यपि कविः ७ शिवा-
भिर्घोराभिः शववनिवहैर्मुण्डास्थिनिकरैः प-
रं संकीर्णायां प्रकटितचितायां हरवधूम्
प्रविष्टां संतुष्टामुपरिसुरतेनातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः
वदामस्ते किं वा जननि वयमुच्चैर्जडधियो न

तं॰
स्तो॰
१०॰
270

धाता नो पीशो हरिरपि न ते वेत्ति परमम् त
थापि त्वद्भक्तिर्मुखरयति चास्माकमपि ते त
देतत्त्वं नत्वं न खलु पशुरोषः समुचितः स
समन्तादापीनस्तनजघनधृग्यौवनवतीव
तासक्तो नग्नो यदि जपति भक्तस्तव मनम्
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वश
गाः समस्ताः सिद्धौघा भुवि चिरतरं जीवति क
विः १० समारब्धस्योभृतं जपति विपरीतां य
दि सदा विचिन्त्य त्वां ध्यायन्नतिशयमहाकाल
सुरताम् तदा तस्य क्षोणीतलविहरमाणस्य
स्य विदुषः कराम्भोजे वश्याः सुरहरवधूसिद्धि
निवहाः ११ प्रसूते संसारं जननि जगतीं पाल
यति वा समस्तं क्षित्यादि प्रलयसमये संह
रति वा अतस्त्वां धातापि त्रिभुवनपतिः श्रीप
तिरपि महेशोपि प्रायः सकलमपि किं स्तौमि
भवतीम् १२ अनेके सेवन्ते भवदधिकगीर्वाण
निवहान् विमूढास्ते मातः किमपि न हि जा
नन्ति परमम् समाराध्यामाद्यां हरिहरविरि
ञ्चादिभिरपि प्रपन्नोस्मि स्वैरं रतिरसमहानन्द
निरताम् १३ धरित्री कीलालं शुचिरपि स
मीरोपि गगनं त्वमेका कल्याणी गिरिशरम
णी कालि सकलम् स्तुतिः का ते मातस्तव क
रुणया मामगतिकं प्रसन्ना त्वं भूया भवमनु न
भूयान्मम जडः १४ श्मशानस्थः स्वस्थो ग

लितचिकुरोदिक्पटधरः सहस्रंत्वर्काणां
निजगलितवीर्येणकुसुमम् जपंस्त्वत्प्रत्ये
कंमनुमपितवध्याननिरतोमहाकालिस्वै
रंसभवतिधरित्रीपरिवृढः १५ गृहेसंमार्जे
न्यामपगलितबीजंहिचिकुरंसमूलंमध्याह्ने
वितरतिचितायांकुजदिने समुच्चार्यप्रेम्णा
मनुमपिसकृत्कालिसततंगजारूढोयाति
क्षितिपरिवृढस्सत्कविवरः १६ सपुष्पैःसं
कीर्णंकुसुमधनुषोमन्दिरमहोपुरोध्यायंध्या
यंजपतियदिभक्तस्तवमनुम् सगन्धर्वश्रे
णीपतिरिवकवित्वामृतनदीनदीनःपर्य
न्तेपरमपदलीनःप्रभवति- १७ त्रिपंचारे
पीठेशवशिवहृदिस्मेरवदनांमहाकाले
नोद्यन्मदनरसलावण्यनिरताम् समास
क्तोनक्तंस्वयमपिरतानन्दनिरतोजनोयोध्या
येत्त्वामपिजननिसस्यात्स्मरहरः १८ सलो
लोमास्थिस्वैरंपललमपिमार्जारमसिते
परंचौष्ट्रंमैषंनरमहिषयोश्छागमपिवा ब
लिंतेपूजायामपिवितरतांमर्त्यवसतांनकिं
सिद्धिःसर्वाप्रतिपदमपूर्वाप्रभवति १९
वशीलक्षंमन्त्रंप्रजपतिहविष्याशनरतोदि
वामातर्युष्मच्चरणकमलध्याननिपुणः
परंनक्तंनग्नोनिधुवनविनोदेनचमनुंजपेल्ल
क्षंसस्यात्स्मरहरसमानःक्षितितले २०

इदं स्तोत्रं मातस्तव मनुसमुद्धारणजडः स्वरू
पाख्यं पादाम्बुजयुगलपूजाविधियुतम् नि
शार्द्धे वा पूजासमयमथवा यस्तु पठति प्रला
पस्तस्यापि प्रसरति कवितामृतरसः २१ कु
रंगाक्षीवृन्दं तमनुसरति प्रेमतरलं वशस्तस्य
क्षोणीपतिरपि कुबेरप्रतिनिधिः रिपुः कारा
गारं कलयति च तं केलिकलया चिरंजीवन्मु
क्तः स भवति च भक्तः प्रतिजनः २२ ॥ इति
श्यामास्तोत्रम् ॥ अथ श्यामाकवचम् ॥ श्री
भैरव्युवाच ॥ कालीपूजा श्रुता नाथ तन्त्राणि
विविधाः प्रभो इदानीं श्रोतुमिच्छामि कवचं
पूर्वसूचितम् त्वमेव शरणं नाथ पाहि मां दुः
खसागरात् श्रीभैरव उवाच ॥ रहस्यं शृणु व
क्ष्यामि भैरवि प्राणवल्लभे श्रीजगन्मंगलं
नाम कवचं मन्त्रविग्रहम् पठित्वा धारयित्वा
च त्रैलोक्यं मोहयेत् क्षणात् नारायणोपि यद्धृ
त्वा नारी भूत्वा महेश्वरम् योगेशं क्षोभमनय
द्धृत्वा च रघूद्वहः वरदृप्तान् जघानैव राव
णादि निशाचरान् तस्य प्रसादादीशोपि त्रैलो
क्यविजयी विभुः धनाधिपः कुबेरोपि सुरेशो
भूच्छचीपतिः एवं हि सकला देवाः सर्वसिद्धी
श्वराः प्रिये श्रीजगन्मंगलस्यास्य कवचस्य ऋ
षिः शिवः छन्दोनुष्टुब्देवता च कालिका दक्षि
णेरिता जगतां मोहने दुष्टविजये भुक्तिमुक्ति

ष योषिदाकर्षणे चैव विनियोगः प्रकीर्ति
तः ॥ शिरो मे कालिका पातु क्रींकारैकाक्ष
री शिवा क्रीं क्रीं क्रीं मे ललाटे च कालि
का खड्गधारिणी हूं हूं पातु नेत्रयुग्मं ह्रीं
ह्रीं पातु श्रुती मम दक्षिणे कालिके पातु
घ्राणयुग्मं महेश्वरी क्रीं क्रीं क्रीं रसनां पा
तु हूं हूं पातु कपोलकम् वदने सकलं पा
तु ह्रीं ह्रीं पातु स्वरूपिणी द्वाविंशत्यक्षरी
स्कन्धौ महाविद्यासुखप्रदा खड्गमुण्डध
रा काली सर्वांगमभितोवतु क्रीं हूं ह्रीं चा
क्षरी पातु चामुण्डा हृदयं मम ऐं हूं ऊं ऐं स्त
नद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थलम् अष्टा
क्षरी महाविद्याभुजौ पातु सकर्तृका क्रीं
क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम ह्रीं
नाभिं मध्यदेशं च दक्षिणे कालिकेवतु
ह्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्ष
री ह्रीं ह्रीं दक्षिणे कालिके हूं ह्रीं पातु कटि
द्वयम् काली दशाक्षरी विद्या स्वाहा मम्मो
रुयुग्मकम् ऊं ह्रीं ह्रीं मे स्वाहा पातु कालि
का जानुनी सदा काली हृन्नामविद्येयं च
तुर्वर्गफलप्रदा क्रीं हूं ह्रीं ह्रीं पातु गुल्फौ
दक्षिणे कालिकेवतु क्रीं हूं ह्रीं च स्वाहा पा
तु चतुर्दशाक्षरी मम खड्गमुण्डधराकाली
ली वरदाभयहारिणी विद्याभिः सकला

तं· सा·
५३१
२७२

भिः साः सर्वांगमभितोवतु कालीकपालि
नी कुल्वा कुरुकुल्ला विरोधिनी विप्रचित्ता
तथोग्रोग्रप्रभा दीप्ता घनत्विषा नीलाघ
नाबलाका च मात्रा मुद्रा मिता च माम् एता
सर्वाः खड्गधरा मुण्डमाला विभूषिणाः रक्ष
न्तु सायुधैर्दिक्षु मां विदिक्षु यथा तथा इति ते
कथितं दिव्यं कवचं परमाद्भुतम् श्रीजग
न्मंगलं नाम महाविद्यौघविग्रहम् त्रैलोक्या
कर्षणं ब्रह्मकवचं मन्मुखोदितम् गुरुपू
जां विधायाथ विधिवत्प्रजपेत्ततः कवचं त्रि
सकृद्वापि यावज्जीवं च वा पुनः एतच्छतार्ध
मावृत्य त्रैलोक्यविजयी भवेत् त्रैलोक्यं क्षोभ
यत्येव कवचस्य प्रभावतः महाकविर्भवे
न्मासात्सर्वसिद्धीश्वरो भवेत् पुष्पांजलीन् का
लिकायै मूलेनैव पठेत्सकृत् शतवर्षसह
स्राणां पूजायाः फलमाप्नुयात् भूर्जे विलि
खितं चैव स्वर्णस्थं धारयेद्यदि शिखायां
दक्षिणे बाहौ कण्ठे वा धारयेद्यदि त्रैलोक्य
मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात् पु
त्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भवे
त् बहुपत्याजीववत्सा भवन्त्येव न संशयः
न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः
शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमा
प्नुयात् स्पर्धामुद्धूय कमला वाग्देवी मं दि

रेत्तवे मोक्षं न स्थैर्यमास्थाय निवसत्येव नि
श्चितम् ॥ इदं कवचमज्ञात्वा यो जपेत्कालि दक्षि
णाम् । शतलक्षं प्रजप्यापि तस्य विद्या न सिद्ध्य
ति । स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्
इति भैरवतन्त्रे श्यामाकवचम् ॥ अथ तारास्तो
त्रम् ॥ मातर्नीलसरस्वति प्रणमतां सौभाग्यस
म्पत्प्रदे प्रत्यालीढपदस्थिते शिवहृदि स्मेरा
ननाम्भोरुहे । फुल्लेन्दीवरलोचनत्रययुते
कर्त्रीकपालोत्पले खड्गं चादधती त्वमेव शरण
णं त्वामीश्वरीमाश्रये १ वाचामीश्वरि भक्त
कल्पलतिके सर्वार्थसिद्धीश्वरि गद्यप्राकृतप
द्यजातरचनासर्वार्थसिद्धिप्रदे । नीलेन्दीवर
लोचनत्रययुते कारुण्यवारांनिधे सौभाग्या
मृतवर्षणेन कृपया सिंच त्वमस्मादृशम् २
खर्वे गर्वसमूहपूरिततनो सर्पादिवेषोज्ज्वले
व्याघ्रत्वक्परिवीतसुन्दरकटीव्याधूतघण्टाङ्कि
ते सद्यः कृत्तगलद्रजः परिमिलन्मुण्डद्व
यी मूर्धजग्रन्थिश्रेणिनृमुण्डदामललिते भी
मे भयं नाशय ३ मायानङ्गविकाररूपल
लनाबिन्द्वर्धचन्द्रात्मिके हुंफट्कारमये
त्वमेव शरणं मन्त्रात्मिके मादृशः । मूर्तिस्ते ज
ननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वे
दानां नहि गोचरा कथमपि प्राप्तां नु तामाश्र
ये ४ त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति

ते.
ता.
२७३

273

सायुज्यतां तस्य श्रीपरमेश्वरि हरिहरब्रह्मादि
साम्यत्मनः संसाराम्बुजमज्जनेऽपटनन्वदेवे
न्द्रमुख्यान् सुरानातस्त्वत्पदसेवने हि विमुखाः
किं मन्दधीसेवते ५ मातस्त्वत्पदपंकजद्व
यरजोमुद्रांककोटीरिणस्ते देवा जयसंसंगरे
विजयिनो निःशंकमंके गताः देवोऽहं भुवने न
मे मम सदृतिस्पर्धी वदन्तः परे स्तत्तुल्यां नियतं
यथा स्वचिकरी नाशं व्रजन्ति स्वयम् ६ त्वन्ना
मस्मरणात्पलायनपराद्द्रष्टुं समर्था न ते भूत
प्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः
दैत्या दानवपुंगवाश्च खचरा व्याघ्रादिका जन्त
वो डाकिन्यः कुपितान्तकश्च मनुजे मातः क्षणं
भूतले ७ लक्ष्मीः सिद्धिगणाश्च पादुकमुखाः
सिद्धास्तथा वारिणां स्तम्भश्चापि रणांग
ने गजघटास्तम्भस्तथा मोहनम् मातस्त्वत्पदसे
वया खलु नृणां सिद्ध्यन्ति ते ते गुणाः कीर्तिः का
न्तिमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः ८
ताराष्टकमिदं पुण्यं भक्तिमान्यः पठेन्नरः प्रा
तर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ल
भते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् लक्ष्मी
मनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान् की
र्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां भवेत् वि
ख्यातिं चापि लोकेऽस्मिन्प्राप्यान्ते मोक्षमाप्नुया
त् ॥ इति श्रीनीलतन्त्रे तारास्तोत्रम् ॥

अथताराकवचम् ॥ ईश्वरउवाच ॥ कोटिती
र्थेषुगोप्याति विद्यातिभयमोचिनी दिव्यंहि
कवचंतस्याः शृणुष्वसर्वकामदम् ताराकव
चस्य अक्षोभ्यऋषिः त्रिष्टुप्छन्दः ताराभ
गवतीदेवता सर्वमन्त्रसमृद्धयेविनियोगः ॥
प्रणवोमेशिरःपातुब्रह्मरूपामहेश्वरी ह्रींका
रःपातुललाटेबीजरूपामहेश्वरी स्त्रींकारः
पातुवदनेलज्जारूपामहेश्वरी हूंकारःपातु
हृदयेभवानीशक्तिरूपधृक् फट्कारःपातु
वदनेसर्वसिद्धिफलप्रदा खर्वामांपातुदेवी
शीगण्डयुग्मेभयापहा निम्नोदरीसदास्क
न्धयुग्मेपातुमहेश्वरी व्याघ्रचर्मावृतकटीपा
तुदेवीशिवप्रिया पीनोन्नतस्तनीपातुपार्श्व
युग्मेमहेश्वरी रक्तवर्तुलनेत्राचकटिदेशेस
दावतु ललज्जिह्वासदापातुनाभिंभुवनेश्व
री करालास्यासदापातुलिंगेचशिवप्रिया
पिंगोग्रैकजटापातुजंघायांविघ्ननाशिनी
प्रेतखर्वधरादेवीजानुचक्रेमहेश्वरी नीलव
र्णासदापातुजानुनीसर्वदामम नागकुण्ड
लधरादेवीपातुपादयुगेतथा नागहारधरा
देवीसर्वांगेपातुसर्वदा नागकंकणधरादेवी
पातुप्रान्तरदेशतः चतुर्भुजासदापातुगम
नेशोकनाशिनी खड्गहस्तामहादेवीपातु
मांविजयप्रदा नीलाम्बरधरादेवीपातुमांवि

घ्ननाशिनी कालीहल्ला सदापातु विवादेषु त्रुम
प्यतः ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा ॥
नागरूपधरा देवी भोजने पातु सर्वदा श्वेतक
ली महादेवी शयाने पातु सर्वदा वीरासनध
रा देवी निद्रायां पातु सर्वदा धनुर्बाणधरा दे॰
वी पातु मां विघ्नसंकुले नागांचितकटी पातु
देवी मां सर्वकर्मसु छिन्नमुण्डधरा देवी कान
ने पातु मां सदा चितामध्यस्थिता देवी मारणे
पातु मां सदा द्वीपिचर्मधरा देवी पुत्रदारधना
दिषु अलंकारान्विता देवी पातु मां हरवल्ल॰
भा रक्तरक्तनदी ऐं जे ह्रूं ह्रूं फट् फट् समन्वि
ता बीजरूपा महादेवी पर्वते पातु मां सदा ॥
मणिधरि वज्रिणि देवि महाप्रेतशिवे तथा
रक्तरक्तसदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी श्म॰
शाने तु जोत्पाता कानने पातु मां सदा ॐ
ह्रीं वज्रपुष्पे हूं फट् रूपा नरे सर्वकामदा ॐ
पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी हूं
स्वाहा शक्तिसंयुक्ता दारान्रक्षतु सर्वदा
ॐ आं ह्रूं फट् स्वाहा महेशानी पातु द्यूते दरा
या ॐ ह्रीं सर्वविद्यानृत्यारिणी देवी विद्या॰
न्मां सर्वदावतु ॐ सर्वविघ्नवज्रधरे हूं फट् स्वा॰
हा समन्विता वरिता पातु मां देवी सर्वविघ्न॰
विनाशिनी ॐ आः हरे वेव ज्रे वि हूं फट्
स्वाहा समन्विता पाताले पातु मां देवी ला॰

किनीनामसंस्थिता ह्रींकारीपातुमांपूर्वेण
रूपामहेश्वरी स्त्रींकारीपातुदेवेशीवधूरूप
महेश्वरी हूंस्वरूपामहादेवीपातुमांक्रोधरू
पिणी फट्स्वरूपामहामायाउत्तरेपातुसर्व
दा पश्चिमेपातुमांदेवीटस्वरूपाहरप्रिया
मध्येमांपातुदेवीश्रीहूंस्वरूपानगात्मजा नी
लवर्णंसदापातुसर्वत्रवाग्भवंसदा · भ
वानीपातुभवनेसर्वैश्वर्यप्रदायिनी विद्या
दानरतादेवीपातुवक्त्रेसरस्वती शुभेवादेव
संग्रामेजलेचविषमेगिरौ भीमरूपासदा
पातुश्मशानेभयनाशनी भूतप्रेतालये
चौरेदुर्गामांभीषणवने पातुनित्यंमहेश्व
रीसर्वत्राधिवर्तिका कवचस्यास्यमाहात्म्य
नाहंवर्षशतैरपि शक्नोमिकथितुंदेविभ
वेत्रस्यफलंचयत् पुत्रदारबन्धूनांसर्वे
देशेचसर्वदा नविद्यतेभयंतस्यनृपपूज्यो
भवेच्छुभः शुचिर्भूत्वाम्बिकेवापिकवचंसर्व
कामदम् प्रपठन्वास्मरन्मर्त्योदुःखशोक
विवर्जितः सर्वशास्त्रमहेशानिकविराट्
भवतिध्रुवम् सर्ववागीश्वरोमर्त्योलोकवर
सोपनेश्वरः द्यूतेविवादेचघटयलस्म
भवेद्ध्रुवम् पुत्रपौत्रान्वितोमर्त्योविलासी
सर्वयोषिताम् शत्रवोदासतांयान्तिसर्वैर्बा
वल्लभः सदा गर्वीखर्वोभवत्येववादीसवर

ते. सा. २३५

275

लतिदर्शनात् मन्त्रस्तु वशगतां याति दासवत्
सार्वनीभुजः प्रसंगात्कथितं सर्वं कवचं सर्व
कामदम् प्रपठन्वा स्मरन्मर्त्यः प्रापानुग्रह
लाद्गमः आनन्दवृन्दसिन्धूनामधिपः कवि
राड्भवेत् सर्ववागीश्वरो मर्त्यो लोकवन्द्यः
सदासुखी गुरोः प्रसादमासाद्य विद्यां प्राप्य
स्वर्गोपिताम् तथापि कवचं देवि दुर्लभं भु
वनत्रये गुरुर्देवो हरः साक्षात्पत्नी तस्य हर
प्रिया अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः
मन्त्रो स्याशामहेशानि महिलासंगमं चरेत्
पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा
शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्य
था ब्रह्माविष्णुश्च रुद्रश्च ये देवाः सुरसत्त
माः तेह्यसाधकं देवि लज्जायुक्ता भवन्ति
ते स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः
प्रशंसन्ति सदा देवि तेह्यसाधकोत्तमम्
विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले
प्रशंसन्ति सदा सर्वे तेह्यसाधकोत्तमम्
इति ते कथितं देवि मया सम्यक्कीर्तितम् भ
क्तिमुक्तिकरं साक्षात्कल्पवृक्षस्वरूपकम्
आसाद्याद्य गुरोः प्रसादयद्य इमं कल्पद्रुमालंभ
ते मोदेनापि मदेन वापि रहितो जाड्येन मूढा
लयो सो सिद्धो भुवि सर्वदुःखविपदां पारं प्र
यातं तनको मित्रं तस्य नृपाश्च देवि विपदां न

न्नितस्यास्प्रभाः लिखित्वा धारयेद्यस्तु केयु
रे तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वा
तेते गोरोचनाकुंकुमेन सुचन्दनकेन वा
यावकैर्वा मद्देशानि लिखेन्मन्त्रं समाहितः
अष्टम्यां मंगलदिने चन्द्रे पूर्णमस्यापि वा
सन्ध्यायां देवदेवेशि लिखेन्मन्त्रं समाहितः
मद्यायां श्रवणायां वा रेवत्यां वा विशेषतः
सिंहराशौ गते चन्द्रे कर्कटस्थे दिवाकरे
मीनराशौ गुरौ जाते वृश्चिकस्थे शनैश्चरे
लिखित्वा धारयेद्यस्तु उत्तराभिमुखो भवन्
ने श्मशाप्रान्तरे वापि शून्यागारे विशेषतः
निशायां तु लिखेन्मन्त्रं तस्य सिद्धिरचंचला
भूर्जपत्रे लिखेन्मन्त्रं गुरुणा च मदेश्वरि
ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा
इति श्रीरुद्रयामले तन्त्रे उग्रताराकवचम् ॥
अथ ताराकवचम् ॥ देव्युवाच ॥ तारापूजा
श्रुता नानाविधाश्च सकलाकलया सामग्रे
श्रोतुमिच्छामि कवचं मन्त्रविग्रहम् त्रैलो
क्यमोहनं नाम सर्वापद्विनिवारकम् पुरे
वस्त्वविनेनाथ कृपया मे प्रकाशय ॥ श्रीभै
रव उवाच ॥ देवदानवविद्याधपूजिते शुभे
नवस्वमे त्रैलोक्यमोहनं नाम कवचं शृणु
तोपरम् सर्वविद्यामयं देवि सर्वमन्त्रमयं धुवं

तं. सा.
२२६
276

सर्वरत्नाकरं सर्वसिद्धिविद्याप्रदायकम् व
दक्षासोपि यया ज्ञात्वा सर्वज्ञः पठनाद्यतः य
हूत्वा पठनादीशस्त्रैलोक्यविजयी विभुः प
नाधिपः कुबेरोपि देवाधिपः शचीपतिः पा
ठनाद्धारणात्तस्य यतः सर्वे दिगीश्वराः
सर्वैश्वर्ययुताः सन्तः सर्वसिद्धिमवाप्नुयुः
यस्य प्रसादादीशोहं भैरवाणां हरेश्वरि
कोपाधिपो महाभीमो देवेषु प्रथितः प्रभुः
नदयात्यपसिद्धिभ्यो दयाच्छिष्येभ्य एव च
प्रभक्तेभ्योपि पुत्रेभ्यो दत्वा मन्त्रमवाप्नुयात्
त्रैलोक्यमोहनस्यास्य कवचस्य ऋषिः शि
वः छन्दो विराट् देवता च सोग्रतारा प्रकीर्ति
ता यत्सर्वेषु विद्यायां विजयेषु प्रकीर्तितः
ॐ ह्रीं स्त्रीं हूं च फट् पातु श्रीतारा मे स्तनहृदयम्
ऐं ह्रीं स्त्रीं हूं च फट् पायात्तारिणी हृदयं मम
ह्रीं स्त्रीं हूं च फट् बीजं तारिणी सदावतु ॥
क्लीं ह्रीं स्त्रीं मे शिरः पातु हूं पातु ललाटकम्
साधं च वाग्वरी तारा पायान्नेत्रयुगं मम ॐ ह्रीं
स्त्रीं हूं श्रुती पातु नमश्च पातु नासिकाम् ता
राख्यडाकिनी पायात् ह्रदं तं मम उग्रतारिणी ह्रीं स्त्रीं
हूं फट् च वदनं जिह्वां पायात् ... ह्रीं
स्त्रीं हूं च गलं पातु स्वामिनी नीलसरस्वती ह्रीं
पातु नित्यं तारा रक्तैकजटारूपिणी हूं पायात् च
सदापातु बीजैकाजटारूपिणी ॐ ह्रीं स्त्रीं हूं

फट् पातु हृत्कुब्जा मे भुजद्वयम् श्रीं ह्रीं स्त्रीं
हूं च फट् पायात्पार्श्वं कामस्वरूपिणी
ऐं ऐं ह्रीं श्रीं हूं नमः पायात्कुक्षिं महाचण्डे
री ऐं सौः ॐ ऐं क्लीं फट् स्वाहा कटिदेशं स
दावतु अष्टादशी महाविद्या सालाहुस्व
स्वरूपिणी ब्लूं हूं द्रौं ऐं श्रीं ह्रीं सा गुह्यदे
शं सदावतु सप्तदशी चोग्रतारा मूलता
रास्वरूपिणी ॐ ह्रीं हां हूं नमस्तारायै सक
लपदं ततः इत्येतं तारयपदं तारययुग
वह्वयम् स्वाहेति च महाविद्या जानुनी मम
वेदावतु ऐं सौः ॐ ऐं क्लीं फट् स्वाहा जंघे
पातु परात्मिका ॐ ह्रीं स्त्रीं हूं फट् तारा हूं
सायं तानवाहरी महोग्रतारा पातु मे पा
दानित्यं महेश्वरी ऐं ह्रीं श्रीं स्त्रौः स्हौः वद
वाग्वादिनीति च कामबीजत्रयं नीलस
रस्वती स्वरूपकम् ऐं ऐं ऐं कादिकादिक
लवी स्वाहेति च वतः स्त्रीं महिलिपिमयी
पातु तारा त्रिलोकवपुः इन्द्रो वामादियु
कुर्वीसरस्वत्यनन्तप्रिया कुर्वीयंता
पातु बोधमूलविद्यादक्षिणाहरी तारंमा
याकुर्वेकाली कामकलाततः उग्रतारे
भगं कामः पातु लक्ष्मीः शिवा ऊर्ध्वे साम
हाचोड श्रीं श्रों कामातारादेव्यामयाधुना वि
पिवक्त्र दत्ताः सन्ध्यान्यासं तु मन्त्रपाठं नयेत्

एषा विद्या मया गुप्ता तारादि यामले पुन
सांप्रतं कथितं तुभ्यं कवचाग्रं तथा प्रिये
इति ते कथितं देवि गुह्याद्गुह्यतरं परम्
त्रैलोक्यमोहनं नाम कवचं मन्त्रविग्रहम्
ब्रह्मविद्यामयं भद्रे केवलं ब्रह्मरूपकम्
मन्त्रविद्यामयं चैतत्कवचं मन्मुखोदितम्
गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि
त्रिःसकृद्वा यथाज्ञानं भैरवस्तत्क्षणाद्भ
वेत् सर्वपापविनिर्मुक्तः कुलकोटिसमु
द्धरेत् गुरुः स्यात्सर्वविद्यासु अधिकारी ज
पादिषु शतमष्टोत्तरं चास्य पुरश्चर्या वि
धिः स्मृतः शतमष्टोत्तरं जप्त्वा भवेद्भुवि पु
न्धरः त्रैलोक्यं विचरेद्धीरो गणनाथो यथो
द्रः प्रभुः गद्यपद्यमयी वाणी भवेद्गङ्गाप्र
वाहवत् भूर्जे विलिख्य गुलिकां स्वर्णस्थां
धारयेद्यदि कण्ठे वा दक्षिणे बाहौ योषिद्वा
मे भुजे तथा सर्वसिद्धियुतो भूत्वा विचरेद्भु
वी यथा नद्धात्रे प्राप्य शस्त्राणि ब्रह्मास्त्रादी
नि भैरवि माल्यानि कुसुमान्येव सद्रवेदा
नि भवन्ति हि तस्य गेहे चिरं लक्ष्मीर्वाणीव
क्त्रे वसेद् ध्रुवम् इदं कवचमज्ञात्वा तारां यो भ
जते नरः अल्पायुर्निर्धनो मूर्खो भवत्येव
न संशयः ॥ इति श्रीभैरवतन्त्रे त्रैलोक्यमो
हनं नाम कवचं समाप्तम् ॥ शुभं भद्रम्

अथ गुप्तसाधनं ॥ शृणु देवि प्रवक्ष्यामि
गुप्तसाधनहृदयं प्रिये न प्रकाश्यमिदं का
पि तावत्याः कार्यरक्षणे तावन्न मात्रकाव
र्णं पुटितं मातृकास्थले तेनैव पुटितं वा
र्णं न्यसेदत्रैव प्रार्थयेत् शक्तिबीजं तथा दे
वि विन्यसेत्कवचं प्रयत्नतः वधूबीजं ततो दे
वि विन्यसेत्कवचं समाहितैः वर्मबीजं महेशा
नि न्यसनीयं तदनन्तरम् अस्त्रबीजं तथा
न्यस्य सकलं तदनन्तरम् गुप्तसाधनहृ
दयं देवि न काश्यं कदाचन इत्थं च सिद्धिदा
लोके तथा देवासुरेषु च अवश्यं प्रत्यहं
कार्यं न प्रजानन्ति यस्तथा इति ते कथि
तं किंचिद्रहस्यं रहस्यं सुन्दरि न प्रकाश्यं
तथा केन देवेषु च यथा त्वयि ॥ इति श्री
रुद्रयामले गुप्तसाधनं ॥ अथ बगला
मुखीस्तोत्रम् ॥ चलत्कनककुण्डलो
ल्लसितचारुगण्डस्थलीलसत्कनक
चम्पकद्युतिमदिन्दुबिम्बाननाम् गदा
हतविपक्षकां कलितलोलजिह्वाञ्चलां
स्मरामि बगलामुखीं विमुखवाङ्मनस्स्त
म्भिनीम् १ पीयूषोदधिमध्यचारुविल
सद्रक्तोत्पले मण्डपे सत्सिंहासनमौलि
पातितरिपुं प्रेतासनाध्यासिनीम् स्वर्णा
भां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमा

तं॰
सा॰
२७८

मिंध्यायतियान्तितस्यसद्यःसद्योथसर्वा
पदः २ देवित्वच्चरणाम्बुजार्चनकृतेयःपी
तपुष्पांजलिंभक्त्यावामकरेनिधायचमनुं
मन्त्रीमनोज्ञाक्षरम् पीठध्यानरतोथकुं
भकवशाद्बीजंस्मरेत्पार्थिवंतस्यामित्रमु
खस्यवाचिहृदयेजाड्यंभवेत्तत्क्षणात् ३
वादीमूकतिरङ्कतिक्षितिपतिर्वैश्वानरःशी
ततिक्रोधीशाम्यतिदुर्जनःसुजनतिक्षिप्रानु
गःखंजति गर्वीखर्वतिसर्वविच्चजडतित्व
द्यन्त्रणायन्त्रितःश्रीनित्येबगलामुखिप्र
तिदिनंकल्याणितुभ्यंनमः ४ मन्त्रस्ताव
दलंविपक्षदलनेस्तोत्रंपवित्रंचतेयन्त्रंवा
दिनियन्त्रणंत्रिजगतांजैत्रंचचित्रंचते मा
तःश्रीबगलेतिनामललितंयस्यास्ति
जन्तोर्मुखेत्वन्नामग्रहणेनसंसदिमुखस्तंभो
भवेद्वादिनाम् ५ दुष्टस्तंभनमुग्रविघ्नश
मनंदारिद्र्यविद्रावणंभूभृ ... शमनंचल
न्मृगदृशांचेतःसमाकर्षणम् सौभाग्यैक
निकेतनंममदृशःकारुण्यपूर्णेक्षणंमृत्यो
र्मारणमाविरस्तुपुरतोमातस्त्वदीयंवपुः ६
मातर्भंजयमद्विपक्षवदनंजिह्वांचसंकी
लयब्राह्मीमुद्रयदेवदैत्यधिषणामुग्रांग
तिंस्तंभय शत्रूंश्चूर्णयदेवितीक्ष्णगदया
गौरांगिपीताम्बरेविघ्नौघंबगलेहरप्रण

मनोंकारस्वरूपेणपूर्णेनलाणे ७ मातर्भैरविभद्र॰
कालिविजयेवाराहिविश्वाश्रयेश्रीतिलयेसम
येमहेशिबगलेकामेश्विवामेरसे मातंगि
त्रिपुरेपरात्परतरेस्वर्गापवर्गप्रदेदासोऽहं
शरणागतःकरुणयाविश्वेश्वरित्राहिमाम् ८
संरंभेचौरसंघेप्रवदनसमयेबन्धनेव्याधि
मध्येविद्यावादे ···· प्रजपतिनृपतौदिव्य
कालेनिशायाम् वश्येवास्तंभनेवारिपुव
धसमयेनिर्जनेवावनेवागच्छंस्तिष्ठंस्त्रिका
लंयदिपठतिशिवंप्राप्नुयादाशुधीरः ९ स
ंविद्यापरमात्रिलोकजननीविघ्नौघसंदा
रिणीयोषाकर्षणकारिणीजनमनःसंमो
हनंदायिनी स्तंभोत्सारणकारिणीपशुम
नःसन्दोहसन्दायिनीजिह्वाकीलनभैर
वीविजयतेब्रह्मादिमन्त्रोयथा १० वि॰
ंधात्लक्ष्मीसर्वसौभाग्यमायुःपुत्रैःपौत्रैःस
ंसाम्राज्यसिद्धिम् मानंभोगंवश्यमारोग्य॰
सौख्यंप्राप्नंतत्तद्भूतलेस्मिन्नरेण ११ त्वत्क
तेनपसमाहंगदितंपरमेश्वरिदुष्टानांनि॰
ग्रहार्थायतंगृहाणनमोस्तुते १२ इतिश्री
रुद्रयामलेबगलामुखीस्तोत्रंसमाप्तम् ॥
अथप्रसंगात्बगलामुखस्यदयोनिरूप्यते ॥
अथबगलामुखपचाराः ॥ सर्वोपचारमन्त्रा॰
लिखितास्तापीपूर्वाःकल्पयामिनमःइत्येताः

तं॰
सा॰
२३५
279

कार्याः ऐं ह्रीं श्रीं पाद्यं कल्पयामि नमः एवं
मर्घ्यं कल्पयामि नमः इति क्रमेण सन्नारोप
णं सुगन्धितैलाभ्यंगं मज्जनशालाप्रवेश
नं मज्जनमण्डपमानपीठोपवेशनं दिव्यस्ना
नीयं उद्वर्तनं उष्णोदकस्नानं कनककल
शच्युतसकलतीर्थाभिषेकं धौतवस्त्रपरिमा
र्जनम् अरुणदुकूलपरिधानं अरुणदुकू
लोत्तरीयं आलेपमण्डनप्रवेशनं चन्दनाग
रुकुंकुममृगमदकर्पूरकस्तूरीगोरोचनादि
व्यगन्धसर्वांगविलेपनं केशभारस्य कालाग
रुधूपमल्लिकामालतीजातीचम्पकाशो
कशतपत्रपूगकुद्दरीपुन्नागकल्हारयुग्मं स
र्वर्तुकुसुममालाभूषणमण्डपप्रवेशनम्
भूषणमणिपीठोपवेशनं नवमणिमुकुटं
चन्द्रशकलं सीमन्तसिन्दूरम् तिलकर
त्नं कालांजनं पालीयुगलम् नासाभर
णम् अधरयावकं ग्रथनभूषणम् कनकचि
त्रपदकम् महापदकं मुक्तावलिं एकाव
लिं देवच्छन्दकं केयूरयुगलचतुष्टयम्
वलयावलीं ऊर्मिकावलीं कांचीधामक
टिसूत्रं शोभाख्याभरणं पादकटकं रत्न
नूपुरं पादांगुलीयकं एककरे पाशं
अन्यकरेंकुशं इतरकरे पुण्ड्रेक्षुचापं
परकरे पुष्पबाणान् श्रीमाणिक्यपादं समावे

णास्त्राभरणदेवताभिः मदमद्रासिंहास-
नाधिरोहणम् कामेश्वरपर्यङ्कोपवेशनं
अमृतासनचषकम् आचमनीयं कर्पूर-
वाटिका आनन्दोल्लासविलासहासं मं-
गलारात्रिकं श्वेतच्छत्रम् चामरयुगलं
दर्पणम् तालवृन्तम् गन्धम् पुष्पम् धू-
पम् दीपम् ताम्बूलम् नैवेद्यम् कल्प-
येत् एतेषामुपचाराणामभावे एते
मन्त्रा जप्याः तथा च नवरत्नेश्वरे चतुः-
षष्ट्युपचाराणामभावेन तन्मन्त्रं जपेत् तत्र
देवकल्पं विंद्यात्साधकः स्थिरमानसः ॥
अथाष्टादशोपचाराः ॥ आसनं स्वागतं
पाद्यमर्घ्यमाचमनीयकं स्नानं वासोप-
वीतं च भूषणानि च सर्वशः गन्धं पुष्पं त-
था धूपं दीपमन्नं च तर्पणम् माल्यानुले-
पनं चैव नमस्कारविसर्जनं अष्टादशोप-
चारैस्तु मन्त्री पूजां समाचरेत् ॥ अथ षोड-
शोपचाराः ॥ पाद्यार्घ्याचमनीयं च स्नानं
वसनभूषणे गन्धपुष्पधूपनैवेद्याचमनं
तथा ताम्बूलमर्चनास्तोत्रं तर्पणं च नम-
स्क्रिया प्रयोजयेत्प्रपूजायामुपचारांस्तु
षोडश ॥ अथ दशोपचाराः ॥ पाद्यमर्घ्यं
तथा चामंमधुपर्काचमनं तथा गन्धाद-
यो नैवेद्यान्ता उपचारा दश क्रमात् ॥

तं॰
सा॰
५८॰
मू॰

280

अथ पंचोपचारमन्त्राः ॥ यथा ॥ उद्यद्भा-
स्करनं ॐ मारुणपयोधाराभिराप्लाविताना-
नारत्नमणिप्रवालघटितां रत्नां गृहाण स्व-
स्तिके श्रांह्रांस्तरसुन्दरीभिरभितो हस्ता-
म्बुजैर्भक्तितो मातः सुन्दरि भक्तकल्पल-
तिकां श्रीपादुकामाचरेत् १ देवेन्द्रादिभिर-
र्चितं सुरगणैरादाय सिंहासनं चंचत्कांचन-
संचयातिरचितं चारुप्रभाभास्वरम् एत-
च्चम्पककेतकीपरिमलतैलं महानिर्मलं
गन्धोद्वर्तनमादरेण तरुणीदत्तं गृहाण स्व-
स्तिके २ पश्चादेवि गृहाण शम्भुगृहिणि श्री-
सुन्दरि प्रायशो गन्धद्रव्यसमूहनिर्भरभरं
धात्रीफलं निर्मलम् तत्केशान् परिशोध्य
कंकतिकया मन्दाकिनीस्रोतसि स्नात्वा प्रो-
ज्ज्वलगन्धकं भवतु ते श्रीसुन्दरि त्वन्मदे ३
सुराधिपतिकामिनीकरसरोजनालीधृतां
सचन्दनसकुंकुमागुरुभरेण विभ्राजिताम्
महापरिमलोज्ज्वलां सरसशुद्धकर्पूरिकां स-
गृहाण वरदायिनि त्रिपुरसुन्दरि श्रीपदे
गन्धर्वामरकिन्नरप्रियतमासन्तानहस्ता-
म्बुजप्रस्तारध्रियमाणमुत्तमतरं काश्मीरजा-
पिंजरम् भातभास्करमण्डलं गलत्कान्ति
प्रदानोज्ज्वलं चैलं निर्मलमातनोतु वसनं
श्रीसुन्दरि त्वन्मदे ५ स्वर्णाकल्पितकुं-

५

४

एतल्लसच्छ्रुतियुगे दलासु जे मुद्रिकामध्ये
सावमनानितस्फलके मंजीरमेखिह
ये द्वारावल्लभिकंकणौष्ठकणरणन्त्वा रैर
करहंहकेविन्यस्तमकुटं शिरस्यनुदिनं
दोलन्मदस्युयताम् ८ ग्रीवायां धृतका
न्तिकान्तपटलाग्रैवेयकं सुन्दरं सिन्दूरं वि
लसल्ललाटफलके सौन्दर्यमुद्रापदम्
रागेनाञ्जनमञ्जुलोत्पल ·· श्रीमो
वेन्दोलोचनेनतद्दिव्यौषधिनिर्मितं रचयतः
तु श्रीशांभवि श्रीपदे ९ अमन्दतरमन्द
रोन्मथितदुग्धसिन्धूद्भवं निशाकरकरो
पमं त्रिपुरसुन्दरि श्रीपदे गृहाणमुखे
मौक्तिकं मकरविम्बसाविद्रुमैर्विनिर्मित
मघच्छिदे वनिताम्बुजस्यायिनम् १०
कस्तूरीद्रवचन्दनागुरुसुधाधाराभिरा
श्रावितं चंचच्चम्पकपाटलादिसुरभिः
द्रव्यैः सुगन्धीकृतम् देवस्त्रीगणमस्तका
स्थितमहारत्नादिकुम्भव्रजैरंभः शांभवि
संभ्रमेणविमलं दत्तंगृहाणाम्बिके ११
कल्हारोत्पलनागकेसरसरोजाख्यावली
मालतीमल्लीकैरवकेतकादिकुसुमैरक्ता
श्वमारादिभिः पुष्पैर्माल्यभरेणवैसुरभि
नानानारसस्रोतमातामाम्भोजनिवासि
नी श्री सुन्दरीमृजये १२ मासीगुग्गुलच

भगवती

तं॰
सा॰
२८२
281

स्नागुरुरजःकर्पूरशैलेयजैर्माधीकैः सह
कुंकुमैः सुरभितैः सर्पिर्भिरामिश्रितैः सौ
रभ्यस्थितिमंदिरे मणिमये पात्रे भवत्प्रीतये
धूपोयं सुरकामिनीविरचितः श्रीसुन्दरि त्व
न्मुदे ११ रत्नद्रवपरिस्फुरद्रुचिरत्नयष्टि
न्वितो महातिमिरनाशनः सुरनितम्बिनी
निर्मितः सुवर्णचषकस्थितः सघनसार
वर्तिकान्वितस्तव त्रिपुरसुन्दरि स्फुरतु देवि
दीपो मुदे १२ लवंगकलिकोज्वलं बहु
लनागवल्लीदलैः सजातिफलकोमलं सघ
नसारपूगीफलम् सुधामधुरिमाकुलं रु
चिररत्नपात्रे स्थितं गृहाण मुखपंकजे
स्फुरितमम्ब ताम्बूलकम् १३ शरत्प्रभव
चन्द्रमः स्फुरितचन्द्रिकासुन्दरं दलत्सुरत
रंगिणीललितमौक्तिकाडम्बरम् गृहाण
नवकांचनप्रभवदण्डखण्डोज्वलं महात्रि
पुरसुन्दरि प्रकटमातपत्रं महत् १४ मात
नस्त्वन्दुदमाननोल्लसुभगस्त्रीभिः समान्दो
लितं धुन्वे चामरमिन्दुकुन्दसदृशं प्रस्वेद
दुःखापहम् सद्योगस्त्यवसिष्ठनारदशु
कव्यासादिवाल्मीकिभिः स्वे चित्ते क्रियमा
णएव कुरुतां शर्म्माणि वेदध्वनिः १५ स्वर्गा
गणे मंगलवेणुवीणाभेरीनिनादैरुपगीय
माना कोलाहलैराकलितातनवास्तुविद्या

परोनित्यकल्याणबोधाय ४८ देविभक्त्या
संभाविनस्तुतेश्रीयन्त्रं यदिशक्तितो विलभ्यते
एतैः षोडशभिः पद्यैरुपचारोपकल्पितैः
यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ॥

अथ द्रव्याणां निर्माल्यकालनिर्णयः ॥

तत्र योगिनीतन्त्रे ॥ मणिमुक्ताप्रवालानि दे
वदत्तानि यानि च न निर्माल्यं द्वादशाहं तु ता
म्रपात्रं तथैव च पटीशाटी च षण्मासं नैवे
द्यं दत्तमात्रतः मोदकं पायसं चैव यामार्धेन
महेश्वरि पट्टसूत्रं त्रिमासान्तं स्वयम्भूतं ब
न्धः स्मृतम् यावदुत्सं भवेदन्नं परमान्नं तथै
व च मस्तकं रुधिरं चैव श्रद्धोत्रात्रेणपार्वति
मद्यं तैदपिष्टगन्धं च याज्ञं याम्येन सुन्दरि
करवीरं मल्लिकां चैव बिल्वपत्रं तथैव च तथा
उत्पलमाल्यं च निर्माल्यं सार्धयामके मा
ल्यं वै करवीरस्य पद्मस्य बिल्वकस्य च य
मार्धेन महेशानि ताम्बूलं दत्तमात्रतः न
निर्माल्यं दाडिमं च तथा बिल्वफलं प्रिये
सौगन्धिकं च कदलीप्रयत्नेन निवेदयेत्
कदलीबीजपूरं च उगन्धकं निवेदयेत् ॥
इति द्रव्याणां निर्माल्यकालनिर्णयः ॥

अथ रुद्राक्षमाहात्म्यम् ॥ श्रीकालिकायां रुद्र
योः कण्ठे कर्णयोश्चापि यो नरः रुद्राक्षधा
रयेद्भक्त्या स शैवं लोकमाप्नुयात् नववक्त्रं

तं॰ सा॰ १८२

नरुद्राक्षं धारयेद्वामबाहुना चतुर्दशान्
वैचैव शिखायां धारयेद्बुधः एकवक्त्रो
शिवः साक्षाद्ब्रह्महत्यां विपोहति ब्रवथ्य
तं प्रतिस्रोतो व द्विक्लिस्तम्भं करोति च द्विवक्त्रो
हरगौरी स्याद्गोवधाद्यघनाशनं त्रिवक्त्रो
ग्निजन्मा स्त्रीपापराशिं प्रणाशयेत् चतु
र्वक्त्रः स्वयं ब्रह्मा नरहत्यां विपोहति पंचव
क्त्रः कालाग्निरगम्याभक्ष्यपापनुत् षड्वक्त्र
स्तु गुहः साक्षाद्गर्भहत्यां विपोहति सप्तव
क्त्रस्त्वनन्तः स्यात् स्वर्णस्त्रीवाद्यनुत्तदा वि
नायकोष्टवक्त्रः स्यात् सर्वानृतविनाशकृ
त् भैरवो नववक्त्रस्तु शिवसायुज्यकारकः
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतपिशाचहा
एकादशमुखो रुद्रः नानायज्ञफलप्रदः
द्वादशास्यो भवेदर्कः सर्वक्रतुफलप्रदः
त्रयोदशमुखः कामः सर्वकामफलप्रदः
चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः
निश्छिद्राश्च सुपक्वाश्च रुद्राक्षा धारणे स्मृ
ताः पंचामृतैः पंचगव्यैः स्नानकाले प्रयो
जयेत् रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पंचाक्षरं
तथा ॐ त्र्यम्बकादिमन्त्रस्तु त्र्यम्बकं यजा
महे सुगन्धिं पुष्टिवर्धनं उर्वारुकमिव बन्ध
नान्मृत्योर्मुक्षीय मामृतात् यथा ॐ ह्रौं
अघोरे ह्रौं ह्रं घोरतरे घोरे विना मन्त्रेण योऽर

नैरुद्राक्षंभुविमानवः सयातिनरकंघोरं
यावदिन्द्राश्चतुर्दश ऐंह्रींह्रींसर्वतःसर्वां
गेनमस्तेरुद्रस्वरूपिणे अनेनापिचमन्त्रेणरु
द्राक्षस्यद्विजोत्तमः प्रतिष्ठांविधिवत्कृत्वा
ततोधिकंफलंलभेत् ततोयथास्वमन्त्रै
र्धारयेद्भक्तिसंयुतः तत्रक्रमेणमन्त्राः
ऐंॐभूंफंनमः ऐंऐंनमः ॐह्रींनमः ऐं
ह्रैंनमः ऐंॐह्रूंनमः ॐॐह्रूंह्रूंनमः ॐसः
ह्रैंनमः ॐह्रूंनमः ॐह्रींनमः ॐक्षींनमः
ॐह्रूंह्रींनमः ॐह्लांह्रौंनमः ॐनमोनमः
रुद्राक्षैर्देहसंस्थेननरकूटोम्रियेनयदि ॥
सोपिरुद्रपदंयातिकिंपुनर्मानवागुरु स
र्वविष्णातिरुद्राक्षमालयादेहसंस्थया यः
करोतिनरःपुण्यंसर्वंकोटिगुणंभवेत् यो
ददातिद्विजातिभ्योरुद्राक्षंभुविषण्मुख
तस्यप्रीतोभवेद्रुद्रः स्वपदंचप्रयच्छति ॥
इतिपद्मपुराणेरुद्राक्षमाहात्म्यम् ॥ स्कन्द
पुराणे ॥ कार्तिकेयउवाच ॥ एकद्वित्रिःचतु
ष्पञ्चषट्सप्तवसवोनव दशैकादशद्वादश
त्रयोदशचतुर्दश एतेषांतुमुखानांतुदेव
ताकोत्रशंकर गुणंचकीदृशंतेषांकथयस्व
यथार्थतः ॥ श्रीशंकरउवाच ॥ शृणुष
ण्मुखत्वंनवेनवक्रैवक्त्रैर्यथाक्रमम् ॥ एक
वक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति

नं· सा· २८३

283

हिवक्त्रो देवदेवेशो च गोवर्धंनामधेयेद्भवम् त्रि
वक्त्रो दहनस्साक्षाद्भ्रूणहत्यां व्यपोहति चत्व
वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति पंचव
क्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः षड्
क्त्रः कार्तिकेयस्तु धारणाद्दक्षिणे भुजे ब्रह्म
हत्यादिभिः पापैर्मुच्यते नात्र संशयः सप्त
वक्त्रो महासेन अनंतो नाम नागराट् गुरु
हत्यादिभिः पापैर्मुच्यते नात्र संशयः अष्ट
वक्त्रो महासेन साक्षाद्देवो विनायकः पृष्ठोद
करेणापि संस्पृशेद्वा गुरुस्त्रियम् एवमादी
नि पापानि अतिपापानि सर्वशः विघ्नास्त
स्य च नश्यन्ति स नरो याति परां गतिम् गणा
स्तेन सर्वे पुत्र वक्त्रस्य धारणात् नववक्त्रो
भैरवः स्याद्धारयेद्वामके भुजे कपिलं मुक्ति
दं प्रोक्तं मम तुल्यबलो भवेत् लक्षकोटि
सहस्राणि ब्रह्महत्यां करोति यः तत्सर्वं द
हते क्षिप्रं नववक्त्रस्य धारणात् दशवक्त्रो म
हासेन साक्षाद्देवो जनार्दनः ग्रहाश्चैव पिशा
चाश्च वेताला ब्रह्मराक्षसाः पन्नगाश्च विन
श्यन्ति दशवक्त्रस्य धारणात् वक्त्रैकादशमुद्रा
लो रुद्रा एकादश स्मृताः शिखायां धारये
न्नित्यं तस्य पुण्यफलं शृणु अश्वमेधसह
स्रं वाजपेयशतानि च हेमशृंगाश्च लक्ष
सम्यग्दत्तस्य यत्फलम् तत्फलं समवाप्नो

निरुद्रैकादशधारणात् रुद्राक्षैर्द्वादशैर्वक्त्रैः
कण्ठदेशे च धारणात् आदित्यस्तुष्यते नित्यं
द्वादशार्कोऽध्यवस्थितः त्रयोदशमुखः का
मः सर्वकामफलप्रदः चतुर्दशमुखः श्री
कण्ठो वै श्रोङ्कारकरः परः ॥ तत्र क्रमेण मन्त्राः
ॐ ऐं ॐ श्रीं ॐ श्रीं श्रीं ऐं ज्रीं हुः ॐ ह्रीं ॐ ह्रीं ॐ ह्रां
ॐ टं वं ॐ ह्रां ॐ ह्रीं ॐ श्रीं ॐ ह्रां ॐ फ्रां ॐ हौं स्लों
ॐ रुं मां ॥ इति रुद्राक्षसंस्कारः ॥ अथ नैमि
त्तिकादिकर्मभंगे प्रायश्चित्तमाह ॥ गौतमी
ये ॥ यद्यत्कर्मणि वैगुण्यं नित्ये नैमित्तिके
तथा सहस्रं प्रजपेन्मन्त्रं मूलं चायुतमेव
वा नित्ये सहस्रं प्रजपेन्नैमित्तिके तथायुतम्
इति विस्तरविषयम् ॥ अन्यत्र तन्त्रराजे ॥ नि
त्यातिक्रमदोषाणां शान्त्यै विद्याशतं जपेत्
नैमित्तिकातिक्रमेण सहस्रं प्रजपेन्मनुम्
पापसंकेरत्र ॥ सर्वेषामेव पापानां संकरे स
मुपस्थिते प्रायश्चित्तं ततो जपेत्मयुतं मन्त्र
नापतः अथ विस्त्राराधनमन्त्राः ॥ तत्र गो
तमीये ॥ यस्य दर्शनमिच्छन्ति देवाः स्वस्वदृ
दयः कृपया देवदेवेश मदग्रे सन्निधी भव
तस्य ते परमेशान स्वागतं प्रभो कृतार्थोऽ
स्म्यनुगृहीतोऽस्मि सफलं जीवितं मम यः
दागतोऽसि देवेश चिदानन्दमयाच्युत आज्ञा
नाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च

ते॰
सा॰
२८४
284

यदपूर्णं भवेत्तत्त्वं तत्त्वया प्रतिमुखो भव इत्या
वाहनमन्त्राः ॥ सङ्कल्पलेशसंपर्कान्यपरमान
न्दसंभवः तस्मै ते परमेशान पाद्यमावकल्प
ये इति पाद्यं देवानामधिदेवाय देवानां देवता
यच आचामं कल्पयाम्येष स्वधया प्रतिदे
तवे इत्याचमनीयम् तापत्रयदहं दिव्यं पर
मानन्दलक्षणम् तापत्रयविमोहाय तवा
र्घं कल्पयाम्यहम् इत्यर्घ्यम् सर्वकालुष्य
हीनाय परिपूर्णसुधात्मकम् मधुपर्कमिदं
देव कल्पयामि प्रसीद मे इति मधुपर्कम् उ
च्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः
शुद्धिमाप्नोति तस्मै ते पुनराचमनेविदम्
इति पुनराचमनीयम् परमानन्दबोधाब्धि
निमग्ननिजमूर्तये सांगोपांगमिदं स्नानं क
ल्पयाम्यहमीशाने इति स्नानम् मायाचि
त्रपटच्छन्ननिजगुह्योरुतेजसे निरावर
णविज्ञानवासस्ते कल्पयाम्यहम् इति वा
सः यमाश्रित्य महामाया जगत्संमोहनी
सदा तस्मै ते परमेशाय कल्पयाम्युत्तरीय
कम् इत्युत्तरीयम् यस्य शक्तित्रयेणेदं संप्रो
तमखिलं जगत् यज्ञसूत्राय तस्मै ते यज्ञसू
त्रं कल्पये इति यज्ञसूत्रम् स्वभावसुन्दरा
ङ्गाय सर्वसंस्थाश्रयाय ते भूषणानि विचि
त्राणि कल्पयामि सुरार्चित इति भूषणम्

नमस्ते देवदेवेश सर्वतृप्तिकरं परंअखण्डा
नन्दसंपूर्णं गृहाण जलमुत्तमम् इति
जलम् परमानन्दसौरभ्यपरिपूर्णदिग
न्तरम् गृहाण परमं गन्धं कृपया परमे
श्वर इति गन्धः तुरीयागुणसम्पन्नं ना
नागुणमनोहरम् आनन्दसौरभं पुष्पं
गृह्यतामिदमुत्तमम् इति पुष्पं वनस्प
तिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः आ
घ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्
इति धूपः स्वप्रकाशो महातेजाः सर्वत्र
तिमिरापहः सबाह्याभ्यन्तरंज्योतिर्दी
पोयं प्रतिगृह्यताम् इति दीपः ॥ तथा
च गौतमीये ॥ पूजा च पंचधा प्रोक्ता ता
सांभेदाञ्छृणुष्व मे अभिगमनमुपादानं
योगः स्वाध्याय एव च इज्या पंचप्रकारा
चोक्रमेण कथयामि ते तत्राभिगमनं ना
म देवतास्थानमार्जनम् उपलेपनं नि
र्माल्यदूरीकरणमेव च उपादानं नाम
गन्धपुष्पादिचयनं तथा योगो नाम स्व
देवस्यात्मत्वेनैव भावना स्वाध्यायो ना
म मन्त्रार्थं सन्धानपूर्वको जपः सूक्तस्तो
त्रादिपाठस्सूक्तैः संकीर्तनं तथा तत्त्वादि
शास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः
इज्या नाम स्वेष्टदेवपूजनं चयथार्थतः

ने॰ मा॰ २८५

285

इति पंचप्रकारा कथिता नव स्वभ्रत सा॰
ष्विमामोघमालोक्य सायुज्यसात्रपदाः
क्रमात् अथ द्वादशशुद्धिश्चैव सर्वाना
मिहोच्यते गृहोपलेपनं चैव तथा चगम
नेष्वे: भक्त्या प्रदक्षिणं चैव पादयोः शो॰
धनं तथा पूजार्थं पत्रपुष्पाणां भक्त्यैवो॰
त्तलनं द्वेः करयोः सर्वशुद्धी नामियं॰
शुद्धिर्विधीयते. तन्नामकीर्तनाश्चैव गुण
नामपि कीर्तनम् भक्त्या श्रीकृष्णदेवस्य
वचसः शुद्धिरिष्यते तत्कथाश्रवणं चै
व तस्योत्सवनिरीक्षणम् श्रोत्रयोर्नेत्रयो
श्चैव शुद्धिस्सम्यगिहोच्यते पादोदकस्य
निर्माल्यमालानामपि धारणम् उच्य
ते शिरसः शुद्धिः घ्राणतस्यद्वेः पुनः घ्रा
घ्राणं गन्धपुष्पादि निर्माल्यस्य तपोधन
विशुद्धिस्स्यादनतस्य घ्राणस्याविविधी
यते पत्रपुष्पादिकं यच्छ्रीकृष्णपादयुग्मा॰
र्पितम् तदेकपावनं लोके तद्धि सर्वं विशो
धयेत् ललाटे च गदाकार्यमूर्ध्वं पुंड्रं॰
शार्ङ्गं मूलमथा नन्दकं चैव हृन्मध्ये शंखं च॰
कं भुजद्वये शंखचक्रांकितो विप्रः श्मश
शाने म्रियते यदि प्रयाणे या गतिः श्रीका
सा गतिस्तस्य गोतम तत्रान्तरे यानेनैव
द्वकामिभिर्या यानेभवनेगृहे देवानत्वेश्रुम

वाचश्चप्रमाणस्तदग्रतः उच्छिष्टे चैव वचा
शौचे भगवद्वन्दनादिकम् एकहस्तप्र
णामस्त्वयन्पुरस्तात्प्रदक्षिणम् पादप्र
सारणं चाग्रे तथा पर्यंकबन्धनम् शय
नं भक्षणं चापि मिथ्याभाषणमेव च उ
च्चैर्भाषा मिथो जल्पो वेदनानि च विग्रहः
निग्रहानुग्रहौ चैव अधोवायुविमोचनं
शक्तौ गौणोपचारश्च अनिवेदितभोजनं
तत्तत्कालोद्भवानां च फलादीनामनर्प
णम् विनियुक्तावशिष्टस्य प्रधानं व्यंज
नस्य यत् पृष्ठीकृत्यासनं चैव परानिन्दा
परस्तुतिः गुरौ मौनं निजस्तोत्रं देवतानि
न्दनं तथा अपराधास्तथा विष्णोर्द्वात्रिंश
शत्परिकीर्तिताः वाराहे केशवाग्रे
न्नृत्यगीतं न करोति दरेदिने वह्निना किं
न दग्धोसौ गतं किं न रसातलम् नारदी
ये श्रवणं कीर्तनं विष्णोः कलौ मन्त्रजप
दिकम् दानं तत्प्रीतये तस्य नान्यथाति
विक्षिप्यते गौतमीये शालिग्रामशिला
तोयमपीत्वा यस्तु मस्तके प्रक्षेपणं प्रकुर्वी
तब्रह्महा स निगद्यते विष्णोः पादोदकं पी
त्वा कोटिजन्माघनाशनम् तदेवाष्टगुणं
पापं भूमौ बिन्दुनिपातनात् आगमस्य ॥
दन्ताद्धेतियदाच्छिनोपितुलसीलेयं चर

ने· सा· २८६ 286

नोयंपदेनैवयंवहुमध्यपानवल्लितंगुर्वं
गनामंगमम् स्वामादीनमतिस्थितिर्दं
रिजनैस्तत्संगजंकिल्बिषंसालिग्रामशि
लयूमिदंमहिमाकिंण्वेषलोकोत्तरः ॥
स्वप्नप्रबोधकालेष्ठमन्त्राणामभिधीयते
मन्त्रविद्याविभागेनद्विविधामन्त्रजातयः
मन्त्राःपुंदेवताःप्रोक्ताःविद्याःस्त्रीदेवताः
स्मृताः पुंमन्त्राहुंफडन्तास्युर्द्विठांताः
स्युःस्त्रियःमताः नपुंसकानमोन्ताःस्यु
रित्युक्तामनवस्त्रिधा एवमन्याभवेद्द्वि
धामदाथाहूनगीयते एवंमन्त्रेपि अग्नी
षोमात्मकामन्त्राविज्ञेयाःक्रूरसौम्ययोः
कर्मणोर्वह्नितारान्त्यवियत्प्रायःसमी
रिताः आग्नेयामानवाःसौम्याभूयिष्ठ
न्दुमतालवाः आग्नेयाःसंप्रबुद्धास्तेप्रा
णेचरतिदक्षिणे भागेन्यस्मिन्स्थितेसम्
सौम्याबोधंप्रयांतिते उभयंप्रतिकले
वैप्रबुद्धासमन्त्रिणःसदा यद्वा प्राणमा
नसमायोगाच्छिवब्राह्मोस्लमेलनम्
प्रबोधकालाविज्ञेयाःस्वापकालस्त्व
तःपरम् तथा वामबाहोयदावायु:
हूस्वानोयोजनंतदा दक्षिणस्यांयदा
वायुस्तदादीर्घाणियोजिताः उभयत्र
स्थोयदावायुस्तदास्यादुभयात्मकः

संपुटीकृतमन्त्रेण प्रदिलान्तात्मबिन्दुका
न् पुनन्तु सविसर्गान्तान्दकारं केवलं त
पेत् एवं न स्नायदिष्टश्चेत् शुभ्रुदः प्रीत्यभिवृ
द्धिदाः ॥ इति स्वप्नप्रबोधकालः ॥ अथ यो
गासनानि ॥ पद्मासनं स्वस्तिकाख्यं भ
द्रं वज्रासनं तथा वीरासनमिति प्रोक्तं क्र
मादासनपंचकम् ऊर्वोरुपरि विन्यस्य स
म्यक् पादतले उभे अंगुष्ठौ च निबध्नीयाद्ध
स्ताभ्यां व्युत्क्रमात्ततः पद्मासनमिति प्रो
क्तं योगिनां हृदयंगमम् जान्वोरन्तरे स
म्यक् कृत्वा पादतले उभे ऋजुकायो विशेद्यो
गी स्वस्तिकं तत्प्रचक्षते सीवन्याः पार्श्व
योर्न्यसेद् गुल्फयुग्मं सुनिश्चितम् वृष
णाधः पार्श्वपादौ पाणिभ्यां परिबन्धयेत्
भद्रासनं समुद्दिष्टं योगिभिः परिकीर्ति
तम् ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मु
खांगुली करौ निदध्यादाख्यातं वज्रासनम
नुत्तमम् एकं पादमधः कृत्वा विन्यस्योरौ त
थोत्तरम् ऋजुकायो विशेद्योगी वीरासनमि
तीरितम् अथ मुद्राप्रकरणम् ॥ अथ मु
द्राः प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताः याभिर्वि
रचिताभिस्तु मोदन्ते सर्वदेवताः अर्चने ज
पकाले च ध्याने काम्ये च कर्मणि स्नाने चा
वाहने शंखे प्रतिष्ठायां च रक्षणे नैवेद्ये च त

तं· सा· ५८७

९८७

थान्यत्र तन्त्रकल्पप्रकाशिते स्थले मुद्राः
प्रदृष्टव्याः स्वस्वलक्षणलक्षिताः प्राया
दृष्टादिका मुद्रा नवसाधारणा मताः तथा
षडंगमन्त्रास्तु सर्वतन्त्रेषु योजिताः एको
नविंशतिमुद्रा `````` या तथा गरुडा
ख्या तथा मुद्रा विष्णोः सन्तोषवर्धिनी
नारसिंही च वाराही हयग्रीव धनुस्तथा
बाणमुद्रा च परशुर्जगन्मोहनिका तथा
काममुद्रा पराख्याता शिवस्य दश मुद्रिका
लिंगयोनित्रिशूलाक्षमालेष्टाभीमृगा
ख्यिका खट्वांगा च कपालाख्या डमरुः शि
वतोषदाः सूर्यस्यैकैव पद्माख्या सप्त मुद्रा
गणेशितुः दन्तपाशांकुशाविघ्नपरशुल
ड्डुसंज्ञकाः बीजपूराह्वया मुद्रा विज्ञेयाव
ह्निपूजने पाशांकुशवराभीतिखड्गचर्मध
नुश्शराः मौसली मुद्रिका दौर्गी मुद्राः शु
क्रप्रियंकराः लक्ष्मी मुद्रा च नेलक्षणा वा
ग्वादिन्यास्तु पूजने अक्षमाला तथा वीणा
ख्या व्याख्यापुस्तकमुद्रिकाः सप्तजिह्वाह्वया मु
द्रा विज्ञेया वह्निपूजने मत्स्यमुद्रा च कूर्मा
ख्या लेलिहा मुण्डसंज्ञकाः महायोनिरि
ति ख्याता सर्वसिद्धिसमृद्धिदा शक्त्यर्चने म
हायोनिः श्यामादौ मुण्डमुद्रिकाः मत्स्यकू
र्माख्यलेलीहा सर्वसाधारणी मता

दशमा मुद्रिका ज्ञेया त्रिपुरायाः प्रपूजने
संक्षोभद्रावणाकर्षवश्योन्माद महांकुशाः
खेचरी बीज योन्याख्यो त्रिखण्डा परिकीर्ति
ताः ॐ भमुद्राभिषेके स्यात्पद्ममुद्रासने
तथा कालकाली प्रयोक्तव्या विघ्नप्रश
मकर्मणि गालिनी च प्रयोक्तव्या जलशो
धनकर्मणि श्रीगोपालार्चने वेणुः नृह
रौ नारसिंहिका वराहस्य च पूजायां वा
राह्याख्यां प्रदर्शयेत् रामार्चने पञ्चबाण
मुद्रे च परशुलक्ष्या । परशुरामस्य विते
या जगन्मोहनसंज्ञिका वासुदेवाह्वया
ध्याने ॐ भमुद्रावरणे सर्वत्र प्रार्थने
चैव प्रार्थनाख्यां प्रयोजयेत् ॥ मुद्राल
क्षणमाह यामले ॥ मोदनात्सर्वदेवानां
द्रावणात्पापसन्ततेः तस्मान्मुद्रेयमाख्या
ता सर्वकामार्थसाधने उद्दिष्टान्तक्रमान्मु
द्राः प्रोच्यन्ते लक्षणानि च हस्ताभ्याम
ञ्जलिं बद्ध्वानामिकामूलपर्वणोः अंगु
ष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहिनी स्मृ १
अधोमुखी त्वियं चेत्स्यात्स्थापिनी मुद्रिका
स्मृता २ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगा
त्सन्निधापनी ३ अंतःप्रवेशितांगुष्ठा सै
व संरोधनी मता ४ उत्तानमुष्टियुगला
सम्मुखीकरणी मता ५ देवतांगे षडंगा

तं· सा·
१८८

नं न्यासः स्यात्सकलीकृतिः ८ सव्य
दक्षकराङ्गुष्ठौ योयोमवेत्तर्जनी अव
गुण्ठनमुद्रेयमभितो भ्रामिता मता ७ अ
न्योन्याभिमुखौ श्लिष्टकनिष्ठानामिकायु
तः ॥ तथैव तर्जनीमध्यापेन मुद्रा समीरि
